# ॥ शारीरक ॥

वेदान्तसूत्रम्भगवद्व्यासकृतं ।

गुरु विरजानन्द दण्डी
सन्दर्भ पुस्तकालय
2560
दयानन्द महिला महाविद्यालय

परमहंस परिव्राजकाचार्य श्री मच्छङ्करानन्द कृत वृत्तिसहितं

पण्डित कृपाराम

सु

काश्य

ओ३म
गुरु विरजानन्द दण्डी
संदर्भ पुस्तकालय
दयानंद महिला महाविद्यालय
कुरुक्षेत्र
वर्गीकरण नम्बर 2560
पु. परिग्रहण क्रमांक ..........

चन्द्रप्रभायन्त्रे मै

श्रीजगन्नाथशर्मविदुषा प्रकाशिता च

संवत् १८४५

प्रथम वार १००० पुस्तक ] [ मूल्य १)

# श्रीगणपतयेनमः ॥

श्रीं नमस्तुभ्यं महामाये वरदे काम रूपिणि । विद्यारंभं करिष्यामि सिद्धि र्भवतुमे सदा ॥ १ ॥ शंकरस्य नमस्कारं कृत्वा शंकर भाष्यगा । सूत्रव्याख्याहि रचयते सुखार्थं क्रियते मया ॥ २ ॥ वेदांत मीमांसा शास्त्रस्य व्याचिख्यासि तस्येद मादिमं सूत्रं । अथो तस्य ध्यायेनाऽकर्तृत्वादि रूपस्यात्मनो वधारणं तदव धारणा चाविद्या निवृत्ते र्मोक्षस्य सिद्ध रित्यात्मनो ब्रह्मणो विचारस्य कर्त्तव्यता माह ॥ ३ ॥

## अथातोब्रह्मजिज्ञासा ॥ १ ॥

अथ शब्दः साधन चतुष्टय संपत्यानं तर्य्यमाह अतः शब्दो हेत्वर्थः ज्ञातुमिच्छा जिज्ञासा ब्रह्मणो ब्रह्म जिज्ञासा यस्मादग्नि होत्रादि कर्मानित्य फलं ब्रह्मज्ञानं चानंत फलं तस्माच्छमदमादि साधन चतुष्टय संपत्य नंतरं ब्रह्मणो वक्ष्यमाण लक्षणस्य जिज्ञासा कर्त्तव्येति वाक्य शेषः ॥ १ ॥ पूर्वाधिकरणे ब्रह्म जिज्ञास्य मित्युक्तं किंलक्षणं पुनस्त द्ब्रह्मे त्यत आह भगवान्सूत्रकारः ॥

## जन्माद्यस्ययतः ॥ २ ॥

जन्मोत्पति रादिर्यस्य तदिदं जन्मस्थिति भंगं जन्मादि अस्य प्रत्यक्षा धुपस्थापि तस्य विचित्रस्य जगतो यतो जन्मादि यस्मात्सर्वज्ञात्सर्व शक्तेः कारणा द्भवति तद्ब्रह्मे ति वाक्य शेषः ॥ २ ॥ पूर्वाधि करणे सत्य ज्ञानादि रूपस्य ब्रह्मणो विस ष्टंश जगज्जन्मादिकारण त्वं तटस्थ लक्षण मुक्तं अर्थात्सर्वज्ञता चइदानीं वेदस्या म्नाय मानत्वेन तामाचिख्य अस्य महत इत्यादि वाक्यादेदजन्मनः प्रतीते कृत्स्नां सर्वज्ञतां समाधत्ते ॥

## शास्त्रयोनित्वात् ॥ ३ ॥

विचित्रस्य ऋग्वेदादेः शास्त्रस्य योनिः कारणं तस्य भावस्तत्वं तस्मात् प्रवृत्तिश्च निवृत्तिश्च पुंसां येनोप दिश्यते तद्धर्माची पदि श्यंते शास्त्रं शास्त्र विदोविदुः अथवा पूर्वाधि करणे यतो वेत्यादि शास्त्रं मविचारितं किंतु चि-त्वादिकं सकलं कमित्यातु मान सुक्त मिति शंकां निवर्त्तं यितु मन्याय गम्यत्वे न ब्रह्मणः शास्त्रै कप्रमाणता माह शास्त्रे ति यथोक्त ऋग्वेदादिशास्त्रं योनिः कारणं प्रमाण गम्यत्व सूक्तं साचादेव शास्त्र कर्तृत्वे न चार्थाक्षिप्तं ॥ ३ ॥ तदिदानीं सिद्धार्थे शास्त्रस्य संगतो प्रवृणाद्य भावात् जैमनिय वचन विरोधाद्या चिपय समाधत्ते ॥

## तत्तु समन्वात् ॥ ४ ॥

तुशब्दः पूर्व पचव्या वृत्यर्थः त्वदुक्तं नकुतः तद्यथोक्तं ब्रह्म वेदांत शास्त्रा-दव गम्यते-कथं समन्वयात् सम्यगन्वयः समन्वयः षविध तात्पर्य लिंगं तस्मात् पूर्वाधि करणे पुचस्ते जात इत्यादौ संगति श्रवणस्य रज्जु रियं नायं सर्प इत्या दौ प्रयोजनस्य चदर्शनात् जैमिन्यादि वचनानां कर्माभि प्राय कत्वात् सर्वज्ञे सर्वं सक्तौ ब्रह्मणि शास्त्रं प्रमाण मेव समन्वया दित्युक्तं नच ब्रह्मणः सर्वज्ञत्वं सर्वं सक्ति मत्वं च ज्ञानं नस्य भावाद द्वितीय त्वाच्च तस्मा दुपचारा प्रधाना-दिक मेव सर्वज्ञं सर्वं शक्तिच चतस्तत्रैव समय इति प्राप्त इदं सूत्रं ॥ ४ ॥

## ईक्षतेर्नाशब्दं ॥ ५ ॥

नसांख्यादि परिकल्पितं प्रधानादि वेदांत शास्त्रेषु प्रति पाद्यते कुतः अशब्दं हि तत् कथं ईक्षतेः चेतनत्व श्रवणात् इत्यर्थः तत्ते जऐ चंतता चाप ऐचंत इत्यादौ तेज चदिवत् उपचारा दय मीचण शब्दः इति प्राप्त इदं सूत्रं ॥ ५ ॥

## गौणश्चेन्नात्मशब्दात् ॥ ६ ॥

गुणयोगा दुपचारा त्प्रवृत्ती गौणत्वं यदि प्रधाना दीना मितिब्रूयेतन्न कुतः आत्म शब्दात् आत्मेति शब्द स्तस्मात् तथाहि अनेन जीवे नात्मनेति देवतायां आत्मशब्द इति नन्वात्म शब्दोस माला मद्र सेन इति वत्मूल्य वाची भूतात्मे न्द्रि यात्मे ति चेतना चेतनाया चीवाज्योतिः शब्दो यथा क्रतुज्वल नवाची त्यत आह ॥ ६ ॥

## तन्निष्ठस्यमोक्षोपदेशात् ॥ ७ ॥

नैत्वत्तु वर्त्तते त्वदुक्तं नकुतः तस्मिन् प्रकृते सदचि मादिगुणे निष्ठा तादात्म्य बुद्धिर्यस्य सोयं तन्निष्ठस्तस्य श्वेत केतोस्तत्त्व मसीति वाक्यात्म त्वस्य चेतनस्य मोक्षो ऽविद्या तत्कार्य नाशस्तस्य तावदेव चिरंया वन्नविमोक्ष्ये थसंपत्स्य इत्युप देशः श्रुत्या कथनं तस्मात् अरुंधती दर्शन न्यायेन तन्निष्ठते त्यत आह ॥ ७ ॥

## हेयत्वावचनाच्च ॥ ८ ॥

यद्ययं ज्ञानयोग्यं ज्ञेयं तस्यभावो ज्ञेयत्वं नाय मात्मेति ब्रूयात् नचतस्य वचन मभिधानं तस्मात्रा रुंधती नयः चकार सत्वन्य दोषार्थः संयोगाभि प्रयोगांता इति न्याये नावच नमित्यत आह ॥ ८ ॥

## स्वाप्ययात् ॥ ९ ॥

एतत्कारणं प्रकृत्य यत्रै तदित्युप क्रम्यस्व पितित नाम निर्वचनी नस्वयं ह्यपीती भवतो तिस्व स्मिन्नात्मनि चेत नस्याप्ययो लयः तस्मात् कस्मिंश्चि त्साम्ये प्रधानादि जग त्कारणंस्या दित्यत आह ॥ ९ ॥

## गतिसामान्यात् ॥ १० ॥

स्यादेवं यदि कचिद्वेदांतेषु तदप्य वगम्ये तनत्वव गम्यते सर्वेष्वपि वेदांतेषु

गतिरव गतित्वेत नकारण त्वस्यैव सामान्यं समानस्य भाव सामान्यं तस्मात् नत्वदुक्तं नन्वस्तु चेतनंकारणं माभूत्सर्वज्ञ मित्यत आह ॥ १० ॥

## श्रुतत्वाच्च ॥ ११ ॥

श्रुतस्य भावः श्रुतत्वं तस्मात्सर्वज्ञं कारणं साक्षाद्वेदेनोक्तत्वा दित्यर्थः चकारः सुरचना सुप पत्त्यादिकं समुच्चि नोति पूर्व्वाधिकरणे ऽपते असौगौणि श्रवणात्वाये पठितस्यापि ब्रह्मणो मुख्य मोक्षस्य मुक्त आत्मा शब्दादिभ्यः अन सुमयपे विकारे प्राचुर्ये चतुष्टत्वात् प्राय इष्टाविकारार्थ तैवेत्यानंदमयो जीवः प्रत्युदा हरणे नाचिन्त्य प्रथम मेक देशिनां मते समाधानं ब्रूमः ॥ ११ ॥

## आनंदमयोभ्यासात् ॥ १२ ॥

अन्यों तरात्मा आनंद मय इत्यत्रा नंदमयः परमात्मा कुतः तं प्रकृत्यय देव आकाश आनन्दो नस्या दित्यादि नावत्र कृत्वोभि धान मभ्यास स्तस्मा-त् ॥ १२ ॥

## विकारशब्दान्नेतिचेन्नप्राचुर्यात् ॥ १३ ॥

विकार वाचि मयट् शब्दो विकार शब्दः तस्मात्रा नंदमयः परमात्मेति चेत् एवं यदितन्न प्राचुर्यात्त प्रकृत वचने मयड् इति सूत्रात् प्राचु र्यार्थं ताप्य वगम्यते ततश्चा नंद विकारोणा नंदमयः सः किंतु आनंद प्रचुर इत्यर्थः मयट उभय साधारणो प्राचुर्यं एवाय मित्यत्रको हेतु रित्यत आह ॥ १३ ॥

## तद्धेतुव्यपदेशाच्च ॥ १४ ॥

तस्यहेतुः कारणं एवह्ये वा नंदयातीति श्रुत्याव्यप देशो भिधानं तस्मात् चकार अनंद मयस्य कारण श्रवण माहनतु जीवोवा प्रधानं वा आनन्दस्य कारण मस्तित्यत आह ॥ १४ ॥

## मांत्रवर्णिकमेवचगीयते ॥ १५ ॥

मंत्रवर्णे प्रतिपाद्यं मांत्र वर्णिकं सत्य ज्ञानादिरूपं गुहाप्रविष्टं यत्त दैवा-नं दमय शब्देन गीयते चकार उक्त दूषणांतर समुच्चयार्थः अस्तु प क्रमादिना जीव एवेत्यत आह ॥ १५ ॥

## नेतरोनुपपत्तेः ॥ १६ ॥

इतरो जीव इहन ग्राह्यं कुतः इदंसर्व मसृजती त्याद्यनुप पत्तेः नउप पत्तिर नुपपत्तिः तस्याः नन्वस्तु इदं संकुचित मित्यत आह ॥ १६ ॥

## भेदव्यपदेशाच्च ॥ १७ ॥

भेदोत्क्ष व्यभावः रसंह्येवायं लब्ध्वानंदी भवतीति श्रुत्यातस्यव्यप देशस् तस्मात् चकारः संकोचानुप यत्यर्थः प्रकरणादि कमपि जोवस्य प्रधानस्य वा-स्त्वित्यत आह ॥ १७ ॥

## कामाच्चनानुमानापेक्षा ॥ १८ ॥

सोकाम यतेति श्रुत्यायोभि हितः कामस् तस्माच्चेतन एवानु मीयते इत्यनु-मानं प्रधानं तस्यानपेक्षा प्रसङ्ग इति यावत् चकारः पूर्ववत् नन्वस्तूप चरितः काम इत्यत आह ॥ १८ ॥

## अस्मिन्नस्यचतद्योगंशास्ति ॥ १९ ॥

अस्मिन् प्रकरणे अस्य चेतनस्यतन योगस्ता दात्म्यं शास्ति उपदि शति-शास्त्रं यदा ह्येवैष इत्यादिना चकारःपरिहार समुच्चये अथवा पुच्छ शब्दस्य लाङ्गूले रूढस्या वयवे आधारेच लाक्षणि कत्वस्य तुल्यत्वे व यवप्राये पाठा त् ब्रह्म पुच्छ मित्यत्रापि ब्रह्मानन्दस्या वयव इति प्रत्युक्तरणे नाक्षिप्य समा-धत्ते सिद्धान्तेन ॥ १९ ॥

## आनन्दमयोभ्यासात् ॥

अन्योन्त रात्मानं दमय इत्यत्र ब्रह्म पुच्छं प्रतिष्ठेति स्वप्रधान मेव ब्रह्म कुतः असन्न वेत्यादिना ब्रह्मणो भ्यासात् ॥

## विकारशब्दान्नेतिचेन्नप्राचुर्यात् ॥

विकारो वयव: पुच्छं तस्यशब्द: तस्मान्नस्य प्रधान मिनिचेत् एवं यदितन्न प्राचुर्यात् विकार प्राय पाठात् विकार शब्देन ब्रह्मण: स्वप्राधान्यं निवर्त्त य-तीत्यर्थ: ॥

## तद्धेतुव्यपदेशाच्च ॥

तस्यनं दमयादे र्जगतो हेतु: कारणं भाव प्रधानो निर्देश: तेन तद्धेत त्वव्यपदेश: श्रुत्याभिधानं तस्मात् शेषिष्वानं दमदस्यानेषु ब्रह्मस्व प्रधान मिति पठित्वा पूर्ववद्व्याख्यानं पूर्वाधि करणे मयटो विकारे आनन्दस्या नन्दमात्रे ब्रह्मणो देश कालवस्त्व परिछिन्न वस्तुनि मुख्यार्थत्वे न पुन: प्राचुर्या नन्दमया वयवेषु अत: प्रायपाठो वाधित: पुनरित्रापि मर्यादा धार रूपाणां स्वयणा जीव एव प्राप्तेश्वर्य विशेष: कश्चिरस्या दित्यत आह ॥

## अंतस्तद्धर्मोपदेशात् ॥ २० ॥

अथ यएषोंतरा दित्येय परमेश्वर: कुत: तद्धर्मोंप देशात् तस्य धर्मास्त धर्मा अपहत पाप्मत्वा दयस्तेषां उदेति हवै सर्वेभ्य: पापमभ्योय एवं वेदेत्या-दि श्रुत्युपदेशोभिधानं तस्मात् नन्वादित्यादिभ्यो नान्य ईश्वर इत्यत आह ॥ २० ॥

## भेदव्यपदेशाच्चान्य: ॥ २१ ॥

अस्ति देवता दिभ्योन्य ईश्वर: कुत: यआदित्ये तिष्ठन्नि त्यादिनाधा धाराधेय भेदस्य व्यप देशात् चकार उक्तव्या इत्यर्थ: पूर्वाधि कारणे नन्यथा

सिद्ध लिङ्ग वशादन न्यनासिद्ध रूपत्व सत्वादि नीतम् अथवा काशत्यु त्वारूढा सर्व भूतो इमादेलिंगस्य संकोच इति प्रत्यु दा हरणो नाचिम्य समाधत्ते ॥ २१ ॥

## आकाशस्तल्लिंगात ॥ २२ ॥

आकाश इति जीवाचेत्या काशशब्दः परमात्मा कुतस्तस्य परमात्मनो लिंगं सर्व भूतोत्पत्यादि तस्मात् पूर्वाधि करणस्य लोकस्य कागति रिति सर्व कारणस्य प्रदर्शनात् उत्तरेपि सर्व कारण माकाशं श्रुत्या निरूप्य व्यवस्था पितं अवतुन ताहक् किञ्चिदस्ति प्रत्यु त सुषुप्ता विन्द्रियाणां सर्वभूतसाराणां प्राण लयोत्पत्तो: स्वथा अस्ताव देवता मुख्यप्राण। ति प्रत्यु दाहरणे नाचि प्याति देशेन समाधत्ते ॥ २२ ॥

## अतएवप्राणः ॥ २३ ॥

प्राणइति जीवाचेत्यत्र प्राणशब्दः परमात्मा कुतः अतएव सर्व भूतो इमा दि लिंगादेव पूर्वाधि करणे तल्लिङ्गादा काशप्राण श्रत्यो ब्रह्म परत्वमुक्तं नाच ज्योतिर्वाक्ये तदस्तीति रूढमेव ज्योतिरिति प्रत्यु दा हरणेन ज्योतिर्लिं- ग श्रवणादिति दृष्टांते नाचिम्य समाधत्ते ॥ २३ ॥

## ज्योतिश्चरणाभिधानात् ॥ २४ ॥

अथ यदतः परोदिवो ज्योरिति ज्योति: शब्दं ब्रह्मैव कुतः चरणा भिधा- नात् पूर्वस्मिन् गायत्री वाक्य पादोस्य स्यादिना चरणानां पदानां मुक्तत्वात् ॥ २४ ॥

## छन्दोभिधानान्नेतिचेन्नतथाचेतोर्पणनिग दात्तथाहिदर्शनं ॥ २५ ॥

पूर्वस्मिन्वाक्ये गायत्रीया इदं सर्व मेवे त्यादिना गायत्र्याख्यस्य छन्द सो- भि धानात् नब्रह्मण इतिचेत् एवं यदितत्र तथाचेतो र्पण मिगदात् चेतसो

मनसो गायत्राख्ये छन्दसि ब्रह्मदृष्ट्या समर्पणं निगद्यते कथ्यते ऽनेनेति निग द स्तस्मात् तथाहि दर्शनं ह्रियस्मात् यथा च चेत सोर्पणस्य दर्शन मवलोकनं तथा न्यत्रापि दर्शनं एत मेव वहृचो महत्युक्थे मीमांसते इत्यादि अथवा चेतसोर्पण निगदा दिति चेत सोर्पणं यथाहि गायत्री शब्द भिधेये ब्रह्मणि निगद्यते तथाहि दर्शनं अन्यत्रापि छन्दो भिधायिना शब्देनसैषा विराडन्ना दीनि ब्रह्माभि धनस्य ब्रह्मणे च गायत्री दृष्टिः किंनस्या दित्यत आह॥ २५ ॥

## भूतादिपादव्यपदेशोपपत्तेश्चैवं ॥ २६ ॥

भूतमिदं सर्वमादि शब्देन पृथ्वी शरीर हृदयानि तान्येव पादा विभागा स्तेषां व्यपदेशः कथन स्तस्योप पत्तिः संभवः तस्मात् एवं गायत्रां ब्रह्म दृष्टिः गायत्री शब्दा भिधेये ब्रह्मणिना ऽक्षर मात्रं गायत्री भूता दिपादवत् चकार. पुर्व पक्षिणोपि पूर्ववाक्य-ब्रह्मणे नुप पत्तिमाह ॥ २६ ॥

## उपदेशभेदान्नेतिचेन्नोभयस्मिन्नप्यविरोधात् । २७ ।

उपदिश्यते इतिवाक्यं परोदिवः अमृतं दितीयं पञ्चमी सप्तम्यं तत्वेन एतस्य पूर्वस्यच भेदात् एवं यदितन्न कुतः उभय स्मिन्न पिपञ्च द्वयेपि प्राति-पदि कार्यस्ये कत्वात् ब्रह्म प्रत्यभिज्ञानान्न विरोधः तस्मात् अथवा यत्सप्तम्यं तत्वेन सप्तम्यं तत्वे न वा व्यपदेश उभयस्मिन्न पिइच्छा ग्रेश्वेनः इच्छा यात्य-रतः श्येनइति सप्रत्यभि ज्ञानान्न विरोध इति पूर्वाधि करणे दिविदिव इतिच प्रकृत्यर्थ साचित्व प्रत्यभि ज्ञानेन ब्रह्म प्रतीतौ यच्छ्रुतेः प्रसिद्धार्थं प्रधानात् ब्रह्मैव युक्तं• अत्रापि पदार्थस्य प्राणादेः प्रधानत्वात् उप क्रमोप संहारादि वाक्यार्थं स्तदनु सारेण नय इति देवता जीवोवामुख्यप्राणोवाएकं वादयंवाअयंवाब्रह्मापिवानसुब्रह्मे वेतिदृष्टांतेनाचिम्यसमाधत्ते ॥ २७ ॥

## प्राणस्तथानुगमात् ॥ २८ ॥

प्राणोस्मि प्रज्ञा त्मात्मेति प्राणशब्दः परमात्मा कुतस्तथा नुगमात् तथा-हींद्र प्रर्द नाख्या यिकायां यत्त्वं मनुष्याय हिततमं मन्यसे इत्यादि लिंग वाक्यपर्या लोचनया परमात्मनो नुगम उपगमो यस्मात् ॥ २८ ॥

## नवक्तु रात्मोपदेशादिति चेदध्यात्मसंबंध भूमाह्यस्मिन् ॥ २९ ॥

नात्र परमात्मोप देशः कुतः वक्तुरिन्द्रस्या त्मनउपदेशः कुतः तं मामा पुरमृत मुपास् स्वेत्यादिना तस्मात् इति चेत् एवं यदिनेति पूर्वस्मा दनुवर्तते त्वदुक्तं नकुतः अध्यात्म सम्बन्ध भूमा ह्यस्मिन् हियस्मात् अस्मिन् प्रकरणे आत्मान मधिकृत्य वर्तत इत्यध्यात्मं तस्य संबन्धः तत्रवात्म प्रतिपाद कानि-याव दस्मिन् शरीरे प्राणो वसति तावदा पुनरायर्च विजिज्ञासीत वक्तारं विद्या दित्युप क्रम्य तद्यथा रथस्यारेषु इत्यादीनि तस्य भूमावाहुल्यं वाग्यं तर्हि-मामा पुरित्यादिना वक्तुरिन्द्रस्या त्मोपदेशः ॥ २९ ॥

## शास्त्रदृष्ट्यातूपदेशोवामदेववत् ॥ ३० ॥

शास्त्रस्य तत्त्व मसीत्यादे र्दृष्टिरर्था वगतिः तया उपदेशो भिधानं वाम-देव वत् यथा वामदेवोहं मनुरभव मित्याद्युक्त वानेवमिति ॥ ३० ॥

## जीवमुख्यप्राणलिंगान्नेतिचेन्नोपासात्रैविध्यादाश्रितत्वादिहतद्योगात् ॥ ३१ ॥

जीवश्च मुख्य प्राणश्च तयोर्लिंगं वक्तारं विद्यादिति जीवस्य प्राणएव प्रज्ञा-त्मेदं शरीरं परि गृह्योत्थादि प्राणस्य तस्मान्न परमात्मन एव ग्रहणमिति चेदेवं वदितन्न उपासात्रै विध्यात् उपासन मुपासात्रिविधो विधाः यस्याःसात्रि-

विधातस्या भावस्त्रैविध्यं उपासात्रैविध्यं तस्मात् जीव मुख्यप्राण ग्रहणे वाक्यभेदः स्यात् नब्रह्म ग्रहण इत्यर्थः प्राणशब्दः कथं ब्रह्मणी त्यतयाह आ-श्रितत्वात् अन्यत्रापि प्राणइति होवाचेत्यादौ ब्रह्मणिच स्वीकारात् तत्तल्लिङ्गा-दिति चेन्नाह इह तद्योगात् इहास्मिन्न ध्यायेतेषा लिङ्गानां योगात् विद्य-मानत्वा त्तत्राचार्यैकदेशो यस्तुएवं व्याचष्टे जीवमुख्य प्राण लिंगेष ब्रह्मण-एव उपास्याया स्त्रैविध्यं विवक्षित मुक्तं तथापि जीव ब्रह्मदेवता मुख्यप्राणानां लिंगसन्निपाते ब्रह्मलिंगं बलीय इति तेनोक्तं यद्यप्यं तस्तद्धर्मोपि देशात् इत्यत्र तदप्युक्तं तथाप्यत्र यथार्थं कारण धर्मयोः सन्निपाते कारण मेवाश्रय मिति विशेषः ॥ ३१ ॥

# इतिसूत्रदीपिकायां प्रथमाध्यायस्यप्रथमः पादः ॥

---

पूर्वे पादेस्पष्ट ब्रह्म लिङ्गानि वाक्यानि विचारितानि द्वितीयपादे ऽस्पष्टती ष्टब्रह्म लिंगानि वाक्यान्यु पासना प्रचुराणि रूढ़ि विषयाणि विचार्यंते ॥

## सर्वत्रप्रसिद्धोपदेशात् ॥ १ ॥

सर्वेष्वपि वेदांतेषु यत्प्रसिद्धं ब्रह्मसिद्धं रासं वनेन इदसर्वं खल्विदं ब्रह्मेति त्युक्त माह ॥ १ ॥

## विवक्षितगुणोपपत्तेश्च ॥ २ ॥

वक्तुमिष्टा विवक्षिता उपासनायां उपादेयत्वे नोपदिष्टाःसत्य सङ्कल्प प्रभृत यः विवक्षितास्तेते गुणाश्चेति तेषां यस्मिन् ब्रह्मण्युपपत्तिः संभवः तस्याः चकार उभय साधारण्य निवारणार्थः जीवे पिकेषां चित्सद्दश त्वात् जीव एवेत्यस्या दित्यत आह ॥ २ ॥

## अनुपपत्तेस्तु नशारीरः ॥ ३ ॥

शारीरो जीव इह नग्राह्यः कुतः सत्य सङ्कल्पादीनां तस्मिन्न नुपपत्ते

रसत्वादेवन नुखशुत्वादीनां जीवधर्माणां ब्रह्मण्य संभवः सम: यतो जीवः किंनस्या दित्यतश्चाह ॥ ३ ॥

## कर्मकर्तृव्यपदेशाच्च ॥ ४ ॥

एतमिति ब्रह्मण: कर्मत्वस्य अभिसं भविताश्मीति जीवस्य कर्त्तृत्वस्य व्यप देश स्तस्मात् चकारोण त्वादेर्ब्रह्मणि सद्भावे समुच्चयार्थः ननुमा मद्दं जाना मोति वदयं कर्म कर्त्तृ व्यपदेश: स्यादित्यतश्चाह ॥ ४ ॥

## शब्दविशेषात् ॥ ५ ॥

शब्दाज्जीवस्या भिधायिनःशाखांतरें तराब्म चिति सप्तमी तत्पुरुषेद्धि रण्मयत्वादि गुणाभि धायको विशेषोन्य स्तस्मात् सति चान्यस्मिन् कस्मिन् कर्म कर्त्तृ भाव इत्यभि प्रायःशब्दोपि यजमानःप्रस्तर इत्यादिवद प्रसिद्धार्थः ॥ ५ ॥

## इत्यतश्चाहस्मृतेश्च ॥ ६ ॥

स्मरणं स्मृतिः ईश्वरः सर्वभूताना मित्यादिः चकारः प्रसिद्धांतर समुच्चयार्थः ॥ ६ ॥

## अर्भकौकस्त्वात्तद्व्यपदेशाच्चनेति चेन्ननी चाय्यत्वादेवंव्योमवच्च ॥ ७ ॥

अर्भ कमल्पमो कोनीडं यस्याः सार्भ कौकाः तस्याभावस्तत्त्वं तस्मात् एषश्चाक्मां तद्दंदय इति परिच्छिन्नाय तनत्वाच्च वैवत्त मेवं तस्यजीवस्य व्यप देशो भिधानं अणीयान् ब्रीहेर्वाय वाद्वा इत्यादि तस्मात् चकार उक्त समुच्चयार्थः नत्रह्म ग्रहणं न्याय्यमिति चेदेवं यदितन्न कुतः नीचाय्य त्वात् एव मणीयस्त्व गुणईश्वरो नीचाय्यो द्रष्टव्यः तस्यभावस्तत्वं तस्माद्दशो मवच्च यथा सर्वं गतमपि व्योमसूची पाशाद्य पेक्षयार्भकौ काषणी यद्यएवं चकारो ब्रह्मणः सर्वात्मत्व समुच्चयार्थः ॥ ७ ॥

## संभोगप्राप्तिरितिचेन्नवैशेष्यत् ॥ ८ ॥

सम्यग्भोग: संभोग: सुख दु:खादिस्तस्य प्राप्ति: सर्वात्मत्व ईश्वरस्य भोक्तृत्वादि प्रसंग इतिचेत् एवं यदितन्न कुत: वैशेष्यात् अनश्नन्नन्योभि चाकशीतीत्यादिना जगतरूपस्य भोग्या भावस तस्मात् पूर्वाधि करणे सर्वं खल्विदं ब्रह्मेत्य परादपि वाक्यात्मनो मयवाक्यं ब्रह्म स्वीकृतं तस्यच वैशेष्येण हेतुना भोक्तृत्वं समर्थितं तस्मादेव जीवोभोक्ता अत्तायस्यै तस्मिन् वाक्ये अयसं हर्तृत्वं तथा व्यभिरस्वाद इति श्रुतिलोक प्रसिद्धिभ्यां अरैवात्ताय इत्समास प्रसिद्धिभ्यां मनोमयं ब्रह्मेति दृष्टांते नाक्षिप्य समधत्ते ॥ ८ ॥

## अत्ताचराचरग्रहणात् ॥ ९ ॥

अत्तासंहर्त्ता परमेश्वर: कुत: चराचर ग्रहणात यस्यब्रह्मच क्षत्रंचेत्यादिना चराचरस्य जंगम स्थावरस्य ग्रहणं स्वीकरणं तस्मात् नन्वग्नि जीवयोरपि साधारण्ये कुत: परमात्मै वात्तेत्यत आह ॥ ८ ॥

## प्रकरणाच्च ॥ १० ॥

प्रकरणं महावाक्यं नजायते म्रियते इत्यादि तस्मात् चकार: कइत्था वेदेत्यादि दुर्वि ज्ञानत्वादि समुच्चयार्थ: पूर्वाधि करणे मृत्यु सन्निपातात् ब्रह्मक्षत्रादि विश्वमित्या क्षिप्त्वेश्वर: संहर्त्तेत्युक्तं इहापि वच्छब्दस्य सन्निहित गुहा प्रविष्टादि शब्दानु सारेण बुद्धि जीव परत्व मिति दृष्टान्तेना क्षिप्य समाधत्ते ॥ १० ॥

## गुहांप्रविष्टावात्मानौहितदर्शनात् ॥ ११ ॥

गुहायु हिहृदयं तातां प्रविष्टौ तस्या: अन्त: स्थितौजीव परमात्मानौ हियत्र:तस्य जीवस्य दर्शनं प्रत्यक्षेण तस्य परमात्म नश्चदर्शनं श्रुत्या गुहाहितमित्यादि कया तस्मात् नगुहुष रप्यस्ति दर्शनमित्यत आह ॥ ११ ॥

## विशेषणाच्च ॥ १२. ॥

सोऽध्वनः पार माप्नोति इतिगंतत्वेन जीवस्यत द्विष्णोः परम पदमिति गम्यत्वेन परमात्मनो विशेषणं तस्मात् चकारो बुद्धिः प्रकृति विशेषणा भावं समुच्चिनोति पूर्वाधि करणे प्रथमं पिबंता विति सदृशयो र्जीव परमात्मनोर्ग्रहणा नुसारेण गुहा प्रविशादि चरमं नोतं यथा तद्वदेव एषप्रथमं छायात्मनः प्रतीति रक्षत स्वादोनां नयनं तस्मिन् षना प्यत्यंता दृचिः सर्किं जोवीवा देवतात्मा वेति दृष्टांतिना चिप्य समाधत्ते ॥ १२ ॥

## अंतरउपपत्तेः ॥ १३ ॥

यए षोचिणो इति चक्षुर्यौतरः पुरुषः सपरमेश्वरः कुतः षमृतत्वा भयत्वा दीनां तत्रोप पत्तेः संभवात् कथं परमेश्वरः सर्वगतो चिषीत्वत षाह ॥ १३ ॥

## स्थानादिव्यपदेशाच्च ॥ १४ ॥

सर्वगतस्या प्युपासनार्थः स्थानस्य पृथिव्यादेः षादिशब्देन रूपस्य हिरण्यश्मश्रु ादेर्नाम उदितत्वादेर्यः पृथिव्यां तिष्ठन्निदिना व्यपदेश स्तस्मात् चकारोऽन्यस्य स्थानाद्य भाव समुच्चयार्थः माभूदप नाचिणाचि सुखेविशत षाह ॥ १४ ॥

## सुखविशिष्टाभिधानादेवच ॥ १५ ॥

वाक्योप क्रमे प्रक्रांतस्य सुखविशिष्टस्य प्राणो ब्रह्मकं ब्रह्मेत्यादिना ब्रह्मण एव नतव्यस्याभिधानं तस्मादच ब्रह्मण एवग्रहणं चकारोदेशः सद्दसिद्ध चक्षुस्थानं षस्तिचक्षचि जीवस्यानु यास्यस्याव्यापिनी चिस्थाना संभव समुच्चयार्थः उपक्रमो प्यन्यस्य किं नस्या दित्यत षाह ॥ १५ ॥

## श्रुतोपनिषत्कस्यगत्यभिवानाच्च ॥ १६ ॥

श्रुताउप निषत् येन श्रुतोप निषत्क स्तस्य यागति रीश्वर श्रु तिस्मृति

प्रसिद्धो देवया नाख्यो मार्गस्तस्य येऽर्च्चिर्वाभिस्मन् ऽशब्दं कुर्वन्तीत्यादिनाभिधानात् चकारो ब्रह्मशब्दा दन्यथा नुपपत्ति समुच्चयार्थः छायात्म विज्ञानात्म देवतात्म परमात्मनां कथं चि दुपपत्तिसाम्ये कुतः परमात्मैव गृह्यते नेतर इत्यत आह ॥ १६ ॥

## अनवस्थितेरसंभवाच्च नेतरः ॥ १७ ॥

नअवस्थिति रनवस्थितः सर्वदा अवर्त मानत्व छायात्मानः पुरुषां तरस्य समीपे ऽसत्व विद्य मानत्व विज्ञा नात्मनो रसादि ग्रहणे सुषुप्ति समयेवाऽविद्य मानत्व देवतात्मनो नियाम काभा वाद विद्य मानत्व तस्याः नकेवल मेतत् अस्य तत्वादीनां त्रयाणा मप्यसंभवः समानः जन्मादि सत्वात् तस्माच्च कार उक्तानुक्त दूषण समुच्चयार्थः नईश्वरादन्यः छायात्मा विज्ञानात्मा देवतात्मेति च पूर्वाधि करणे स्थानादि व्यपदेशादि नांतरा चिणो ईश्वर इत्युक्तंस्थानं जीवस्या प्यमृत त्वादिच प्रधानस्यापि स्यादित्या चिप्य समाधत्ते ॥ १७ ॥

## अन्तर्याम्यमधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १८ ॥

यःपृथिवी मन्तरोय मयती त्यादाव तर्पमयति नियमयतीत्यंतर्यामी उद्दिष्टः सपरमेश्वरोधि दैवादिषु दैवमधि कृत्यवर्तत इत्य धिदैवं आदिशब्देना ध्यात्ममधि भूतमित्यादिते ष्वधिदैवादिषु कुतः तद्धर्मव्यप देशात्तस्य परमेश्वरस्य धर्मास्तद्धर्मा: यंपृथिवी नवेदे त्यादिना दुर्विज्ञानत्वादयः तेषांव्यप देशादभिधानात् अदृष्टत्वादि गुणेभ्यः प्रधानं किंनस्या दित्यत आह ॥ १८ ॥

## नचस्मार्तमतद्धर्माभिलापात् ॥ १९ ॥

नचस्मृत्यी प्रतिपाद्य स्मार्त प्रधानं कुतः अतद्धर्माभि लापात् तस्यप्रधानस्य धर्मास्तद्धर्मान तद्धर्मा अतद्धर्मा: अदृष्टो दृष्टे त्यादि नोक्ताद्द्रष्टृत्वा दयस्तेषां मभिलापो ऽभिधानं तस्मात् शारीर स्तर्हिस्या दित्यत आह ॥ १९ ॥

## शारीरश्चोभयेपिहिभेदेनैवमधीयते ॥ २० ॥

शरीरेभवः शारीरोजीवः चकारोन कारानु हत्यर्थः शारीरोहिन कुतः हियस्मात् उभयेपिकारा याभाध्यं॰ दिनाच परमात्मनो भेदेनयो विज्ञाने तिष्ठन्नात्म नितिष्ठन्नित्येवं शारीर मधीयते पठंति पूर्वाधि करणे दृष्टृत्वादि श्रवणात् नप्रधानं यथात्मनि इति भेद श्रवणात् नजीवोप्यं तर्यामीत्युक्तं तद्वदत्रा भानाद्दिति प्रत्युदा हरणेना चिम्य समाधत्ते ॥ २० ॥

## अदृश्यत्वादिगुणकोधर्मोक्तेः ॥ २१ ॥

यत्तदृश्य मित्यादि मोक्तः नश्योऽदृश्यः तस्य भावस्तत्वं तदादिर्येषाम श्राद्यत्वा दोनांते श्रदृश्यत्वादयः तेगुणा यस्यसोयम दृश्यत्वादि गुणको भूतयोनिः परमेश्वरः कुतः धर्मोक्तेर्धर्मा सर्वज्ञ इत्यादि नोक्ताः तेषा मुक्तेरभि धानात् जीवप्रधान पदार्थयो रपिकेषां चिद्धर्माणां संभवात् कुतो नस्वीकार इत्यत श्राह ॥ २१ ॥

## विशेषणभेदव्यपदेशाभ्यांचनेतरौ ॥२२॥

विशेषणं दिव्योह्यमूर्त्तः पुरुषइति जीवाद्व्यति रिक्तत्वेन भूतयोनि र्व्यपदेशः श्रचात्परतः परप्रधानाख्य पदार्था त्यंचमो निंदिष्ठात्पर इतिप्रथमां तत्वे न भूतयोनिः परमेश्वरस्यभेदेन व्यपदेशः विशेषणंच भेदव्यप देशाच विशेषण भेदव्यप देशौताभ्यां नेतरौजीव प्रधानाख्य पदार्थो परशब्देन भूतयो नेरेवा वगमः कुत इत्यत श्राह ॥ २२ ॥

## रूपोपन्यासाच्च ॥ २३ ॥

रूपस्य भूतयोनिः स्वरूपस्यानन्तर मुपन्यासा दभिधानात् पुरुषएवेदं विश्वंकर्मे त्यादिना चकारोन्यस्य तदसंभवार्थः पूर्वार्थः पूर्वाधि करणे सर्वज्ञत्वंन प्रधानस्य सार्वात्मं नच पुरुषस्यन ग्रहणं किंत्वीश्वरस्यै वेतत्युक्तं

तदिदं सार्वात्म्यंजाठरेवा सर्वात्मनि वा जीवेपि वाभूताग्नौ वानैकांति क- मित्वा चिध्य समाधत्ते ॥ २३ ॥

## वैश्वानरःसाधारणशब्दविशेषात् ॥ २४ ॥

आत्मान मेवैवं वैश्वानर मित्यादि नोक्तो वैश्वानरः विश्वश्चा सौनरश्च विश्वानरः विश्वेवानरा अस्येति वैश्वानरः परमेश्वरः कुतः साधारण शब्दा- विशेषात् साधारण शब्दयोर्विशेषः साधारण शब्दविशेषः वैश्वानर शब्दोग्न्या दित्यात्मनां साधारण आत्मन शजीव परमात्मनो यद्यपि तथाप्यस्ति विशेषः तस्य हवाए तस्ये त्यादिनोक्तो द्यमूर्धत्वादि स्तस्मात् द्युमूर्धत्वादि कमपि परमेश्वरस्यैव कुत इत्यत आह ॥ २४ ॥

## स्मर्यमाणमनुमानंस्यादिति ॥ २५ ॥

यस्याग्निरास्य मित्यदिनास्मर्यमाणं रूपमस्य परमेश्वरस्या नुमीयते नेनै- त्यनु मानं लिंगंस्यात् भवेत् इति यस्मात् तस्मात् वैश्वानरः परमात्मै वे- त्यर्थः ॥ २५ ॥

## शब्दादिभ्योंतःप्रतिष्ठानान्नेति चेन्नतथा दृष्ट्य,पदेशाद संभवात्पुरुष मपिचैनमधी पते ॥ २६ ॥

शब्दादिभ्यः परेभ्यः परमेश्वराग्निशब्दो आदिशब्दा हृदयंगार्हे पत्याद्यग्नि चेताकल्प नादिशब्दो च तदादयं श्चतेभ्यः नकेल मेवमंतः प्रतिष्ठानादपि पुरु- षांतः प्रतिष्ठितं चेदत्यादिना पुरुषस्यांतर वस्थानाच्चन परमेश्वरो वैश्वानर इतिचेत् एवं यदितन्न कुतः जाठरा परित्यागेन दृष्ट्यु प देशात्प रमेश्वरं जाठरो कारणीय मिति कथनात् अथवा जाठर वैश्वानरोपाधिः परमेश्वरस्य द्रष्टव्यत्वोप देशाद्दृष्ट्यु पदेशः कुत इत्यत आह अस्मिन् द्युमूर्धत्वा देरसंभवात्

असत्त्वात् नकेवल मेतस्य पुरुष त्वस्यापि अधीयते चेनमग्निं पुरुषंच। जस-नेयिन: अयमेवापि चेत्यस्या भ्यु च्चयस्यार्थ: तथाहि पठंतिय एषोग्नि वैश्वानरो यत्पु रुष विधमपि चैनमधीयते इतिसूत्र विषयं पठन्ति तेषामेषोर्थ: केवले जाठर परिग्रहे पुरुषेंत: प्रतिष्ठितत्वं केवलंस्यात् नतुपुरुष विधत्वं पुरुषा विधमपिचेन मधीयते वाजसनेयिन: पुरुषविधं पुरुषेंत: प्रतिष्ठितं चेदेतिमा भूज्जाठर: अस्तु देवताभूतं चेत्यत आह ॥ २६ ॥

## अतएवदेवताभूतंच ॥ २७ ॥

अतएव मुक्त हेतुभ्यो द्युमूर्धत्वा दिभ्य: नदेवता आदि त्यादि: नचभूतं भौमोग्नि: ॥ २७ ॥

## साक्षादप्यविरोधंजैमिनि ॥ २८ ॥

उक्तेभ्यो हेतुभ्यो जाठर प्रतीको जाठरो पार्थिवो वैश्वानर उपास्य इत्यु-क्तं जैमिनिस्त्वाचार्य: साक्षादपि नापि प्रतीको पाधि वैश्वानरस्य श्वरस्यो पासन मविरुद्धंमन्यते अग्निनपक्षे कथं प्रादेशमात्र श्रुति रित्यत आह ॥२८॥

## अभिव्यक्तेरित्याश्मरथ्य: ॥ २९ ॥

यस्त्वे नमेवं प्रादेशमात्र मिति श्रु तिरंत मात्रस्या पीश्वरस्या विरुद्धे त्याश्मरथ्य आचार्यो मन्यतेकुत: अभिव्यक्ते: अतिमात्रोपीश्वरो भक्तानां प्रादेशमात्र एव भिव्यज्यते प्रकटो भवति यत:प्रदेशेषुवा.हृदयादिषु उपलब्धि स्थानेषु विशेषेणाभि व्यज्यते इतिशब्द: प्रकार वचन: ॥ २९ ॥

## अनुस्मृतेर्वादरि ॥ ३० ॥

वादरि-राचार्य: प्रदेशमात्रे हृदये प्रतिष्ठिते मनसे साक्षर्वेत्र प्रतियर्थ प्रस्वन्यायेन प्रादेशमात्र श्रुतेर विरोध मन्यते प्रादेश मात्रत्वेन अयम प्रादेश मात्रोप्यनु स्मरणीय: प्रादेश मात्रश्रुति रर्थाव बुद्धये ॥ ३० ॥

## संपत्तेरितिजैमिनिस्तथाहिदर्शयति ॥३१॥

सम्पत्ति निमित्ता वास्यामा देशमाच श्रुतिरिति जैमिनि राचार्यो मन्यते कुत: तथाहि समान प्रकरणे वाज सनेयि ब्राह्मणी मूर्धादिश्चनु क्रांतेषु जठरादीन वयवान् संपादयन् प्रादेशमाच श्रुतिं परमेश्वरस्य दर्शयति प्रादेश माचमि हवैदेवा: सुविदिता इत्यादिना नन्वचा विद्यमाने परमेश्वरे कथं सम्पत्तिर पीत्यत आह ॥ ३१ ॥

## आमनंतिचैनमस्मिन् ॥ ३२ ॥

आमनंति चैतं परमेश्वर मस्मिन् चुबुकांतरा लेजावाल: यएषीनंत इ-त्युप क्रम वरणायां नास्यां चमध्ये प्रतिष्ठित इत्यादिना चकार: सर्वगतस्या चाल्पंता सत्वस्य शंकाया चनुदय माह ॥ ३२ ॥

## इति सूचप्रदीपियां प्रथमाध्यायस्य द्विती य: पाद: ॥ तृतीयेपादेस्पष्ट ॥

---

ब्रह्म लिङ्गानि वाक्यानि निर्विंशेष प्रचुराणि विचार्यन्ते ॥

## द्युभ्वाद्यायतनंस्वशब्दात् ॥ १ ॥

द्यौश्चभूश्च, भुवौश्च, भुवावादि र्यस्यतदिदं द्युभ्वादि जगत् तस्यायतन माश्रय: यस्मिन्द्यौ पृथिवी चांतरिक्ष मित्यस्मिन् मन्त्रे प्रतिपाद्य ब्रह्मकुत: स्वशब्दात् स्वस्यात्मनो वाचका: शब्द: स्वशब्द: तमेवैकं आनेथ आत्मान मित्य-चात्मशब्द: तस्मात् ननुप्रधान मेवकुतो नस्या दित्यत आह ॥ १ ॥

## मुक्तोपसृप्यव्यपदेशात् ॥ २ ॥

मुक्ता अविद्यात त्कार्यं शून्यास्तै रुपसृप्यं तद्ब्रह्म यतस्तस्य तथाहि

तथाविद्या नित्यादिना स्मिन् प्रकरणे व्यपदेशो विशेषेणाप देशोभिभानं तस्मात् नन्वस्तु सुक्तौ पत्तप्य ब्रह्म जगत्कारणं प्रधानंवस्या दित्यत चाह ॥ २ ॥

## नानुमानमतच्छब्दात् ॥ ३ ॥

अनुमीयते इत्यनुमानं प्रधानं नात्रकृतः अतच्छब्दात् तस्यशब्दः तस्मा-प्रधान प्रतिपादक शब्दाभावा दित्यर्थः चेतः शब्द दर्शनात् अस्तुतर्हि चेत इत्यत चाह ॥ ३ ॥

## प्राणभृच्च ॥ ४ ॥

चकारो नंतर हेतोरनु कर्षणार्थः प्राणान् विभर्तीति प्राणभृज्जीवः सोपिनकुतः यः सर्वज्ञ इत्याद्य तच्छब्दात् जीव ब्रह्मणोरभेदात् जीवःस्या दित्यत चाह ॥ ४ ॥

## भेदव्यपदेशाच्च ॥ ५ ॥

भेदस्यत मेवैकं जानथ चात्मान मिति ज्ञेयज्ञाढ भावेन व्यपदेशात् जीव ब्रह्मणो र्व्यपदेशः कुतो ब्रह्मैवास्या श्रय इत्यत चाह ॥ ५ ॥

## प्रकरणात् ॥ ६ ॥

ब्रह्मण इति वाक्यशेषः कस्मिन् इत्युप क्रम्य कविज्ञानेन सर्व विज्ञाना-दिकं श्रूयमाणं ब्रह्मण्येवी पपन्न मित्यर्थः ननु प्रकरणादिना जगत्कारण मेव प्रतीयते नेश्वर इत्यत चाह ॥ ६ ॥

## स्थित्यदनाभ्यांच ॥ ७ ॥

स्थिति रवस्थिति रनशन मिति यावत् अनश्नन्नन्योभि चाकशीतीति श्रुतिः अदनं भक्षणं पिप्पलंस्वा द्वत्तीतिश्रुतेः स्थितिश्च ताभ्या मीश्वरो जीवादन्यः सिद्धः नचेश्वरा दन्यत्र जगत्कारणमिति चकारार्थः कदाचिन्नेयं

पूर्वाधि करणे आत्म शब्दात् द्युभ्वाद्या यतनं ब्रह्मेत्युक्तं तत्रात्म शब्दः प्राणे- नैकान्त इत्याचिप्य समाधत्ते ॥ ७ ॥

## भूमासंप्रसादादध्यू पदेशात् ॥ ८ ॥

यद्वोर्भावो भूमाभूमेत्यादौ परमात्मैव स्वीकरणीयः कुतः संप्रसादा दध्युप देशात् सम्यक् प्रसीदत्यस्या मवस्थाया मिति सुषुप्तिः संप्रसादः तया- तस्या मवस्थायाम वस्थितः प्राणोलक्ष्यते संप्रसादा त्प्राणात्वधि उपरिएष- स्वित्यादिना उपदेशा दभिधानात नन्न प्राणो ह्ययिते त्यादिना प्राणोपिभूमा श्रुत इत्यत आह ॥ ८ ॥

## धर्मोपपत्तेश्च ॥ ९ ॥

धर्माणां यत्रनान्यत्पश्यति नान्यत् शृणोती त्यादीनां तस्मिन् परमात्म न्युपपत्तेः चकारस्तेषांप्राणे नुपपत्तिं चाह पूर्वाधि करणे प्राणसार्वात्म्यं गौण- मित्युक्तं तत्रच ब्रह्मणोपि प्रणवस्य सार्वात्म्यं दर्शना दित्या चिप्य समाधत्ते ॥ ९ ॥

## अक्षरमम्बरान्तधृतेः ॥ १० ॥

अश्रु न इत्यक्षरं नक्षरतीति वा एतद्वै तदक्षर मित्याद्युक्तं अक्षरं ब्रह्मैव कुतः अंबरांतधृतेः अंबर माकाश मव्याकृतं तदंते यस्य तदिदमं बरांतं तस्य- धृति धारणंतस्याः धृतिरपि चेतनस्य नस्या दित्यत आह ॥ १० ॥

## साचप्रशासनात् ॥ ११ ॥

साधृतिः परमेश्वरस्यैव कर्मकुतः प्रशासनात् प्रकर्षेण शासनं एतस्या अक्षर स्य प्रशासने त्यादिना श्रुतं तस्मात् अस्तु प्रशासन मप्यौप चारिक मित्यत आह ॥ ११ ॥

## अन्यभावव्यावृत्तेश्च ॥ १२ ॥

अन्यस्या चेतनस्य भावोन्य भावः अचेतनत्वं तस्माद्या वृत्तिः पृथक् करणं

अचरस्य प्रशासितु रिदंदृष्टम् इत्यादिना अकार उपचारं निवारणार्थः पूर्वाधि करणेऽचर शब्दवाच्यं ब्रह्म प्रशासनादि त्युक्तं इदानीं तदपरमेव ब्रह्मध्यायी- ते तिब्रह्मलोक फल दर्शनादिति बुद्धि सन्निधा नादा क्षिप्य समाधत्ते ॥ १२ ॥

## ईक्षतिकर्मव्यपदेशात्सः॥१३॥

परं पुरुष मभिध्या यीतेतिपर, पुरुषः परमात्मा कुतः ईक्षति मीक्षते रत्यं ते ईक्षति कर्मणो व्यपदेशः तस्यकर्म तद्वाच्यं तस्य व्यपदेशः तस्मात् सएव चेद्रपर पुरुष मभिध्ये तव्यः प्रत्यभि ज्ञायते पूर्वाधि करणे ईक्षति ध्यायति कर्मणोः पुरुषत्वे न प्रत्यभि ज्ञानादि कैसति ध्यायति कर्म परं ब्रह्मेत्युक्तं तद- युक्तं दहरवाक्ये पक्रमोक्त जीवस्यवाक्य शेषेसंशतम इत्यं तम पुरुष शब्दा भि- धानात् तद्दत्पुरुष शब्दस्यापि ब्रह्म विषयत्वा संभवात् आक्षिप्य समाधत्ते ॥ १३ ॥

## दहरउत्तरेभ्यः॥१४॥

दहरो स्मिन्निवाक्ये दहरः सूक्ष्मः कुत परमात्मा उत्तरेभ्यो हेतुभ्यो या वान् अयमा काश इत्यादि नोक्ते भ्यः ननु ब्रह्मपुर शब्द श्रवणात् कुतो नजीव इत्यत आह ॥ १४ ॥

## गतिशब्दाभ्यांतथाहिदृष्टंलिंङ्गञ्च ॥ १५॥

गतिर्गमनं शब्दो ब्रह्मलोक शब्दः अहर हर्गच्छं त्य तं ब्रह्मलोकमिति- श्रुतेः गतिश्च शब्दश्च गति शब्दौताभ्यां गति शब्दाभ्यां दहरः सः तथाहि दृष्टंहि यथाच तथाश्रुत्यंतरेपि सतासौम्येत्यादिके इत्यहर र्ब्रह्मलोक गमनं दृष्ट मवगतं नच ब्रह्मलोक इति वैयधि करण्यं यतए तदेवा हरह र्गमनं लिंगच लिंगमपि सामानाधि करण्ये नन्वाकाशो पमया गगनं गगना कार मिति न्यायेना काशएव जीवोवा कुतो नस्यात् इत्यत आह ॥ १५ ॥

## धृते श्चमहिम्नोस्यास्मिन्नूपलब्धेः॥ १६ ॥

धारणं धृतिः तस्याः सवेतुर्विधृति रितिश्रुतेः दहरः परमात्मैव अस्यधारणस्य महिम्नः प्रभावस्यास्मिन् परमेश्वरे सूर्या चन्द्र मसौ विधृतौ तिष्ठत इत्यादिनो पलब्धेश्च उपलंभात् ननु रूचा भूताकाश रावकिं दहरो नस्यादित्यत आह ॥ १६ ॥

## प्रसिद्धे श्च ॥ १७ ॥

प्रसिद्धि वैदिको आकाशो वैनामि त्यादिना तस्याः चकारोन्यस्या नुपपत्तार्थः ॥ १७ ॥

## इतर परामर्शात् सइतिचेन्नासंभ— वात् ॥ १८ ॥

इतरस्य जीवस्य परामर्शो लिंगं अथ यएष सम्प्रसाद इत्यादि तस्मात्स जोवो दहर इति चेत् एवंयदि तन्न कुतः असंभवात् यावत् यावान्वाय माकाश इत्यादलिंगस्येति शेषः पूर्वाधि करणे पहतपाप्म त्वादयो ब्रह्मधर्मा उक्ताः जीवेपि संभवे युरित्या चिप्य समाधत्ते दहरस्य गर्भभूत मेतत् ॥ १८ ॥

## उत्तराच्चे दाविर्भुतस्वरूपस्तू ॥ १९ ॥

उत्तरात् यएषोचिणी पुरुषो दृश्यते इति प्राजापत्या द्वाक्याज्जीवो अचेद्यदि तन्नकुतः आविर्भूत स्वरूपोयतः आविर्भूतं स्वरूप मस्येत्या विर्भूत स्वरूपः अचि लचितो निरुपाधिक स्वरूपः तु शब्दोन कारार्थः अथ यएषस प्रसाद इत्यादि जीव परामर्श एवं सतिव्यर्थः स्यादित्यत आह ॥ १९ ॥

## अन्यार्थश्चपरामर्शः॥ २० ॥

परामर्शोहि जीवादन्यस्य परमात्मनो रूपस्य प्रदर्शनार्थः अयंआत्मा पहतपा प्मेत्यादि रूपा वगति प्रयोजनः अथवा न्योर्थोयस्य सतथा चकारो जीव ग्रहणे पुरुषार्थ माह ॥ २० ॥

## अल्पश्रुतेरितिचेत्तदुक्तं ॥ २१ ॥

अल्पाभिधायिनी श्रुतिरल्पश्रुतिर्दहर इति तस्मान्न परमात्मेति चेदेवं यदितत्रे ति सूत्रांत्तरात् कुतस्तदुक्तं तस्यदीयं चोद्यंउक्त परिहारं नोपाध्यत्वादिना पूर्वाधिकरणे एतत्वे व इत्येतच्छब्दस्य प्रकृतार्थत्वाद् हरस्य जीवता निरस्ता तदयुक्तं तत्रेत्यादौ सर्वनाम्न: प्रकृतार्थत्वा निय मादित्यां चिप्य समाधत्ते ॥ २१ ॥

## अनुकृतेस्तस्यच ॥ २२ ॥

तमेवभांत मित्युक्त: प्राज्ञएव कुत: अनुकृतेरनु करणात् अनु कृतिरनुभाति श्रुते: तस्यचतस्य भासेत्यदि वाक्यादपिनाचा प्रसिद्ध मिदं रूप मित्याह ॥ २२ ॥

## अपिचस्मर्यते ॥ २३ ॥

स्मर्यते गीतासुन तद्भासयत इत्यादिना पूर्वाधि करणेन तत्रे ति सति विषयेच साधारणी सप्तमीन तद्भासयते इति विषयत्व निषेधकस्मत्वा विषयत्वं व्यवस्थितं तद्वत् परिमाण मपिज्ञेय मैश्वरं वेतिसंशये गुष्टमात्रं पुरुष मिति निर्णीतार्थं स्मृत्याजैव मेवेति प्रत्युदा हरणेना चिप्य समाधत्ते ॥ २३ ॥

## शब्दादेवप्रमित: ॥ २४ ॥

अंगुष्टमात्र: परमात्मा प्रमित: कुत: शब्दादेव ईशानादि पद कदंबादेवकार्थं पुन: सर्वगतस्य परमात्मन: परिमाणीय देश इत्यत्र ब्रूम: ॥ २४ ॥

## हृद्यपेक्षयातुमनुष्याधिकारत्वात् ॥ २५ ॥

हृदि हृदये वस्थानस्या पेक्षयातु एव मिति मात्रस्याप्यंगुष्टमात्रश्रुति: हृदयस्यां गुष्ठमात्रत्वं कुतइत्यत आह मनुष्याधि कारत्वात् शास्त्रस्येति शेष: मनुष्याणा मधिकारी मनुष्या धिकारस्तस्य भावस्तत्त्वम्तस्मात्मनुष्याणांच प्रायेणस्यां गुष्ठपरिमितं हृदयं ततस्तदपेक्षयां गुष्टमात्र: परमेश्वर इति पूर्वाधि

प्र परिग्रहण क्रमांक 2560
दयानन्द महिला महाविद्यालय



करणि गुहमात्र श्रुतिर्मनुष्य हृदया पेक्षया मनुष्याधि कारत्वा च्छास्त्रस्येति चक्तं तर्हि वेदांता.श्वपिमनु ष्याधिकारा एवेति दृष्टान्ते नाक्षिप्य समाधत्ते ॥ २५ ॥

## तदुपर्यपिबादरायणः संभवात् ॥ २६ ॥

तेषां मनुष्याणा सुपरिदेवा दयस्ते षा मपिब्रह्म विद्याया मधिकारं बादरायण श्वाचार्यो मन्यते कुतः संभवात् सम्भाव्यते च्छितेषाम प्यर्थित्वादिकं विग्रहादि मत्त्वा दित्यर्थः ॥ २६ ॥

## विरोधःकर्मणीतिचेन्नानेकरूपप्रतिपत्ते-र्दर्शनात् ॥ २७ ॥

यदि विग्रहवती देवताकस्य यजमानस्थया गेर्देवताया विग्रहादि मत्वं-इति चेदेवं यदितन्न कुतः श्वनेक रूप प्रतिपत्तेःनैकरूप प्रतिपत्ति रनेक प्रप्तिः तस्याः युगपदेको ऽनेक भोजने शक्तः एकोप्यनेकेषां नमस्कार क्रियायां शक्त-इतिनाना विधाया व्यवस्थायाः संभवात् कुत एवं लोके दर्शनात् श्वनेकेषां रूपप्रतिपत्ते र्वांतस्थाः ऐश्वर्य विशेषा द्देवतानां युग पदनेक शरीर स्वीकारात् तदेव कथ मित्यत श्वाह दर्शनात् तथाहि कतिदेवा इत्युप क्रम्यप्राण इत्यन्ते न श्रौतेनात्मनश्च सहस्राणी त्यादिना स्मार्तेनच वाक्येन देवादीना मनेक शरीर प्रतिपत्ति र्दृष्टा ॥ २७ ॥

## शब्दइतिचेन्नातः प्रभवात्प्रत्यक्षानु मा-नाभ्यां ॥ २८ ॥

माभूत् कर्मणि विरोधः विग्रहादि मत्त्वेन देवादीनां शब्दार्था नामनि-त्यत्वा च्छब्दार्थयो र्नित्यसंबंधा भावात् शब्देवेदेऽर्थ वियोगात् प्रमाणं नस्यात् चेदेवं यदितन्न कुतः श्वतः प्रभवात् श्वतो वैदिका च्छब्दाद्देवादि कस्यजगतः प्रभवउत्पत्ति स्तस्मात् सएव कथ मित्यत श्वाह प्रत्यक्षानु मानाभ्यां प्रत्यक्षं

श्रुति प्रामाण्य प्रत्यक्षा पेक्षत्वात् अनुमानंस्मृतिः तद्विपर्यासात् एतइति वैप्रजापति रित्यादिका श्रु तिः अनादि निधने त्यादिकास्मृत्तिः अयनकुदः करोतीत्यश्वादादीनां प्रथमतः शब्दः प्रतीयते पश्चात्क्रियते तदिदं प्रत्यक्षं प्रजापते रपि पूर्वदेवादि वाचकाः शब्दामनसि प्रादुर्भूताः पश्चात्तान् ससर्जेत्यनुमोयते इत्यनुमानं प्रत्यक्षं चानुमानं च प्रत्यक्षानुमाने ताभ्यामेव सविरोधः तथा वेदस्यजनि मत्वे ना नित्यत्वमतः तस्मादित्यत आह ॥ २८ ॥

## अतएवचनित्यत्वं ॥ २९ ॥

अतएव नियता कृतिदेवादे र्जगतो वेदशब्द प्रभवत्वान्नित्यत्वमपि प्रत्येतव्य माभूदेवं शब्दविरोधः तथापि तदापुन र्जगत्पूर्वं कृतस्य लीनं पुनरन्यज् जायते तदास्मादेव विरोध इत्यत आह ॥ २९ ॥

## समाननामरूपत्वाच्चवृत्तावप्यविरोधोदर्शनात् ॥ ३० ॥

अन्यत्वे पि जायमानानां पूर्वेभ्यः पूर्वेषांचा वृत्तावपि प्रलयेप्यविरोधः कुतः समान नामरूपत्वा तपूर्वेषां नोत्तरेषा मितिशेषः सद्दशंगौतमादि नामरूपंच सदृशाच्चत्वा दियेषांति समाननाम रूपास्ते षां भावस्तत्वं तस्मात् चकारात्कार्यस्य सत्त्वादपि समाननाम रूपत्वमेव कुत इत्यत आह ॥ ३० ॥

## दर्शनास्मृतेश्च ॥ ३१ ॥

सूर्या चन्द्रमसा वित्यादिस्मृति रपिव्कलोर्णा नामधे यानीत्ये व मादिका ॥ ३१ ॥

## मध्वादिष्वसंभवादनधिकारंजैमिनिः ॥३२॥

असौवा आदित्यो देवमधु आदिशब्दे नायमेव गौतमोयं भारद्वाज इत्या-

चा: तासु मध्वादिषु विद्यासु दित्यादीना मादित्यादि रूपस्य पूर्वमेव सिद्धत्वात् फलाभावादसंभव: तस्मात्कारणाद्ब्रह्म विद्याया मप्यनधि कारंजै मिनिराचार्यो मन्यते ॥ ३२ ॥

## ज्योतिषिभावाञ्च ॥ ३३ ॥

नकेवलं फला भावादन धिकार: ज्योतिष्यादित्य मण्डलादौ चादित्यादि शब्दानां भावासञ्चत्वादप्य चेतनत्वा दित्यर्थ: ॥ ३३ ॥

## भावन्तुवादरायणोऽस्तिहि ॥ ३४ ॥

तुशब्दो जैमिनि पक्षव्यावृत्यर्थ: वादरायण आचार्यो देवता दीनामधि कारभावं सद्भावमाहहि यस्मादस्ति देवताधिकारस्य सूचकं वाक्यजातं तथ विग्रहादि मत्वे ऽर्थित्वादौच ब्रह्मविद्याया: साकल्ये पिहंतत मात्मान मित्यु प क्रम्यदन्द्रोहवै देवताना मित्वा दितयोयो देवाना मित्यादिच पूर्वाधि करणे अर्थ वर्णिक देवानां तयोयो इतिलिंगा दधिकार उक्त: शूद्रशब्देच परामर्शात् लिंगादर्थित्वात् शूद्रस्या प्यधिकार इतिदृष्टांते नाक्षिप्य समाधत्ते ॥ ३४ ॥

## शुगस्यतदनादरश्रवणात्तदाद्रवणात् सूच्यतेहि॥ ३५ ॥

शुक्शोक: अस्यज्ञानश्रुते: पौत्रायणस्य तत्तेषां हंसानामात्मन्यना दरोवज्ञानं चादरो बहुमानीना दरस्तस्यकं वरमेतत्कं तमित्यादि श्रवणात् सुतत्वात् तदारैक्व प्रत्याद्रवणात् चागमनात् हियस्मात् रैक्वेणह हारित्वा शूद्रशब्देनात्मन: परोक्ष विषय ज्ञानमस्तीति सूचयति अतीन जातिशूद्रो सौमश्रुति: रूढ़िरेव क्षतीनस्तो क्रियते इत्यत चाह ॥ ३५ ॥

## क्षत्रियत्वावगते श्चोत्तरीच चैत्ररथे न लिंगात् ॥ २६ ॥

क्षत्रियस्यापि गतेरव गतेरुत्तरत्र संवर्ग विद्या वाक्यशेषे षय हशौन कंच- कायेय मभिप्रतारिणंच काक्षसेनिं इत्यादि प्रतारिण क्षेतत्रयस्य श्रवणात् तैन तेनसमानायां संवर्गविद्याया मधिका वर्गातिरिक्तेणा शुद्रस्याधि कार इत्यत आह ॥ ३६ ॥

## संस्कार परामर्शा त्तदभावा भिला- पाच्च ॥ ३७ ॥

संस्काराउप नयनादयः तेषां संस्काराणाम भावस्तेषां तंद्दो पनीय इत्या- दिना ब्रह्मविद्याधिकारि परामर्शो वगमः तस्मात्र शूद्रोधिकारी नचतेपितस्य संस्थितिमं तव्यमित्याह तदभावा भिलापाच तस्यशूद्र श्चतुर्थोवर्णः एकजाति रित्यादि स्मरणेना भिलपनम भिलापः तस्मात् चकारोनधि कारार्थः नन्व- संस्कृत विषयः शूद्रशब्दोन जातिविषय इत्यत आह ॥ ३७ ॥

## तदभावनिर्धारणेचप्रवृत्ते ॥ ३८ ॥

तस्यजाति शूद्रत्वस्या भावस्तद भावास्तस्य निर्धारणं नैतद ब्राह्मणोपि वक्तुमर्हती त्यनेन निश्चयः सत्यवचनेन तस्मिन्प्राते जावाल्लि गौतम सुपनेतु मनुशासितुश्च समिधंसौम्ये त्यादिना प्रवर्त्तनं प्रवृत्तिः तस्माचकारो संस्कृतानां शूद्रत्व चतुर्थो वर्णइत्यादि विरुद्ध मित्याह ननुगौतमस्य व्रतस्य प्रे रण मित्यत आह ॥ ३८ ॥

## श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ॥ ३९ ॥

श्रवणं चाध्ययनं चार्थश्च अर्थं शब्देन वेदार्थ ज्ञानानुष्ठानयोः प्रतिषेधः श्रव-

चाध्य यनार्थास्तेषां प्रतिषेधः श्रुयते श्रवणा प्रतिषेधः अथहास्यमेद मित्या-दिनास्पष्ट स्मृतावुपलभ्यते अर्थादध्ययनादेः अतो नात्रतं गौतमस्य किंतुन शूद्रस्याधिकारः चकारा दाचारादपि शब्दादेवेत्यस्मिन्न धिकरणे ब्रह्मवाक्ये जीवानुवादी ब्रह्मैक्यबो धायेत्युक्तं इहतुप्राणस्य स्वरूपेण कल्पितस्य नब्रह्म क्य संभव इत्यतस्तदनु पपत्तौ प्राणोपासनमेव विधेयमिति प्रत्युदा हरणेन मंडूक प्लुत्या चिप्य समाधत्ते ॥ ३८ ॥

## कंपनात् ॥ ४० ॥

प्राणएजति मद्दद्भयं वज्रमुद्यत मिति वज्रशब्दं ब्रह्मैव कुतः कम्पनात् चलनात् सर्वस्य जगतः प्राणइतिशेषः पूर्वाधि करणे सर्वशब्दस्य वेदनकस्या चित्स्मृतेः संकोचः अथवा प्रागि वेहापि सयाव दित्यादि श्रुत्या संकोचाग यावत्तदा चिप्येत्यादिना प्रसिद्धा दित्यएव ज्योति रिति दृष्टांते नाचिप्य समाधत्ते ॥ ४० ॥

## ज्योतिर्दर्शनात् ॥ ४१ ॥

परंज्योतिः परमेव ब्रह्मकुतः दर्शनातय आत्मा पहतपाप्मेत्यादिना अस्मिन प्रकरणे स्यै वंदर्शनात् पूर्वाधि करणे ब्रह्मप्रकरणा दानर्थक्यत प्रतिष्ठ ज्योतिः श्रुतितः ब्रह्मे त्युक्तं इहतुन ब्रह्मप्रकर्ण नाप्याकाश अतेरानार्थक्यं ब्रह्मप्रतिपत्यर्थ त्वादाकाशस्येति प्रत्युदा हरणेना चिप्य समाधत्ते ॥ ४१ ॥

## आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ ४२ ॥

आकाशो वैनामेत्यत्रा काशशब्दः परमात्माकुतः अर्थान्तर माकाश स्तस्य-भावस्तत्वं आदिशब्देन नामरूप निर्वहणादिकं तस्यव्यप देशादाकाशं ब्रह्मे त्युक्तं तत्रमेद व्यपदेशो नैकांतः ॥ ४२ ॥

## सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४३ ॥

असत्यपि भेदेप्राज्ञे नात्माना संपरिष्वक्त इत्यादिनाएतस्माच्छ रीरात्पु-रुषाप्राज्ञस्य परमात्मीनो भेदृउत्क्रमणमृउत्क्रांतिर्श्रु तिः तस्मामयं शारिर आत्माप्राज्ञे नात्मनान्वा रूढ़उत्सृ जनया तीत्यादिना निर्दिष्टाच्छरी रात्प्राज्ञस्य परमात्मनो भेदः सुषुप्तिश्च उत्क्रातिश्च सुषुप्त्युत्क्रांतीतयोर्भेदस्ते न ननुजीव परमात्मनोः प्रतीती कुतो नुजीवोन गृह्यते इत्यत आह ॥ ४३ ॥

## पत्यादिशब्देभ्यः ॥ ४४ ॥

पतिः सर्वस्याधिपतिः आदिशब्देन सर्वस्य वशीत्यादि पत्याद यथते शब्दाश्च पत्यादि शब्दास्तेभ्यः ॥ ४४ ॥

## इतिसूत्रदीपिकायांप्रथमस्यतृतीयः ॥

पूर्वपादत्रये ब्रह्मणि समन्वय इत्युक्तं तथाहि केषु चिछाखेषु प्रधानादि वाचक शब्ददर्शनात् प्रधानादावपि कथनसमन्वयः स्यादित्या शिष्य ब्रह्मण्ये वसमन्वय इति अवधार्यते ऽनेन पादेन ॥

## आनुमानिकमप्येकेषामितिचेन्नशारीर-रूपकविन्यस्तगृहीतेर्दर्शयतिच ॥ १ ॥

अनुमान प्रतिपाद्य मानुमानिकं प्रधान मपिकेषां चित्कठानाम् शाखायां महतः परम व्यक्तमिति शब्द वदिति यदितन्न कुतः शारीररूपकविन्यस्त गृहीतेः शरीरं ह्यत्रच रूपकेण विन्यस्त मित्युक्तं तस्याः शब्देन गृहीतेः ग्रहणात् दर्शयति च तथाह्मनं तरातीतो ग्रंथआत्म शरीरादीनां रथिरथादि

रूपक कल्पितं दर्शयति चकारा त्प्रकरणादिकंच स्थूल शारीरं कथ मव्यक्त शब्दार्हमित्यत आह ॥ १ ॥

## सूक्ष्मन्तु तदर्हत्वात् ॥ २ ॥

सूक्ष्मं सूक्ष्मशरीर मव्याकृताख्यंतु शब्द एवकारार्थः कुतस्त दर्हत्वात् तस्याव्यक्तशब्दा भिधानस्या र्हयोग्यं तस्यभावस्तत्वं तस्मात्एवं चेत्तएव प्रधानवादः शब्दां तरेण पतित इत्यत आह ॥ २ ॥

## तदधीनत्वादर्थवत् ॥३ ॥

तस्य परमेश्वरस्या धीनमायत्तं तस्यभावस्तत्वं तस्मात् सूक्ष्म मीश्वराधीनं नैवप्रधान मित्यर्थः ईश्वरएवकारण मस्तु एवं सूक्ष्म शब्दार्हस्या व्याकृतस्य व्यर्थकल्पनं स्यादित्यत आह अर्थवत् अर्थः प्रयोजनं सोस्यास्ती त्यर्थवत् नेश्वर-स्यापि तद्विना कारणत्व मस्तीत्यर्थःतेनभोग्य त्वादस्तुतदधीनत्वं तस्यापीत्यत आह ॥ ३ ॥

## ज्ञेयत्वावचनाच्च ॥ ४ ॥

ज्ञेयस्वभावो ज्ञेयत्वं यथा सांख्यैरिष्टं प्रधानं नैवमस्य वचनं ज्ञेयत्वस्या वचनं ज्ञेयत्वस्य वचनं तदधीनोप चारोपि भेमत्यभिप्राय मानत्वा दित्यर्थः चकारो सत्वं सरूपस्याह ॥ ४ ॥

## वदतीतिचेन्नप्राज्ञोहिप्रकरणात् ॥ ५ ॥

ज्ञेयत्वा वचनम प्रसिद्धं कुतः नीचाय्य मित्यनेन ज्ञेयत्वं वदतिश्रुति इति चेदेवं यदितत्रहि यस्मात् प्राज्ञः प्रकरणत्तस्येति शेषः प्रकरणं महावाक्यं

पुरुषाद्य किंचि दित्यादिना यथा ग्निजीवौ प्राप्तस्यापि प्रकरणे तद्वत् प्रधान मपिस्या दित्यत आह ॥ ५ ॥

## त्रयाणामेवचैवमुपन्यसः प्रश्नश्च ॥ ६ ॥

त्रयाणाम ग्निजीव परमात्मना मेवच प्रधानस्य कुतएव॰ मुपन्यास उत्तरं यच्चेलोकादि मित्यादि जीवस्यतत इत्यादि परमात्मनो नजायते इत्यादि प्रश्नोपि यन्वे:सत्वमयि मित्यादि जीवस्य येयंप्रेत इत्यादि परमात्मनो न्यत्र धर्मादित्यादि: एवमनेन क्रमेणत्रयाणामेवन प्रधानस्य चाद्यश्चकार: प्रधानस्य स्वरूपासत्वं समुच्चिनोति ननुप्रधानं किंचदशब्द मित्यत आह ॥ ६ ॥

## महद्वच ॥७॥

महांतमित्यार्थौ यथासांख्याभिमतं महत्तत्वं नशब्दाति महच्छब्देन तद्वत्प्रधान मपिनाव्यक्त शब्देन शद्वति चकारस्त्वस्याप्य सत्व सूचनार्थ: पूर्वाधि करणे दुर्यतौ दुप्रत्यभि ज्ञानात् नाव्यक्त शब्दवाच्यति त्यु क्तमिदंतु त्रिगुणत्वादिना प्रधानस्य प्रत्यभिज्ञातत्व परोमंत्र इति प्रत्यु दा हरणेना चिप्य समाधत्ते ॥ ७ ॥

## चमसवदविशेषात् ॥८॥

अजामित्यादि मंत्रोक्तस्यातं वेराणकस्य चिदर्थस्य प्रतिपादक: अविशेषात् आदिशब्दानां नक्वचिदर्थ विशेषो निरूपयितुं शक्योविना प्रकरणादिकं सोयमवि शेषस्तस्मा त्किंचदित्यत आहचमसवत् यथार्वाग्बि लश्चमस इत्यस्मिन् मंत्रे स्वातं त्रेण चमसपदं नकस्याप्यार्थस्य वाचकं तद्वदजादिपदानितर्हि कीयमजादि: प्रतिपत्तव्ये त्यत आह ॥ ८ ॥

## ज्योतिरुपक्रमात्तु तथाह्यधीयतएके ॥९॥

ज्योति रुप क्रमेचक्षुर्ग्राह्य कार्ये प्रथमे यस्याः सातेजो ऽवन्नात्मिका प्रकृतिः तुशब्दोव धारणे सैवाज्ञान पुनरन्या काचन कुतः हियस्मात् यथा जामन्त्वे लोहित शुक्ल कृष्ण रूपा तथा तेजोवन्नात्मिकां प्रकृत्य यदग्ने रोहितं रूपं तेजसस्त द्रूपंयच्छुक्लंतदपो यत्कृष्णं तदन्नस्येत्य धीयते पठंति एकेछं दोगाः रूढियोग योरभावे जाशब्दः कथंतेजोवन्नेषु प्रतिपत्तव्य इत्यत आह ॥ ९ ॥

## कल्पनोपदेशाच्चमध्वादिवदविरोधः ॥१०॥

तेजोवन्नात्मिका लोहित शुक्ल कृष्णात्मिका प्रकृति र्यांछागीव बहुवर्कं रीवर्करेण जनसेव्यमाना ऽपरेण त्यजमाना कल्प्यत इति कल्पना तस्या उपदेशः कल्पनोप देशः तस्मात्ताप्यच विरोधः न विरोधः ऽविरोधः कल्पन. यांदृष्टांतः मध्वादिवत्यथादित्यस्य मधुत्वं ऽादिशब्दा द्वागादेर धेन्वादेर्धेन्वादि मत्वं तद्वदनजायाः प्रकृतेरजात्वं पूर्वोधि करणे जाशब्दो रूढियोगा भावात्कल्पन य तेजोवन्नादि परइत्युक्तमिहापि पंच जनशब्दो रूढो मनुष्येषु व्यर्थः लक्षणया प्राणादि वाक्ये नान्वितः ऽतोवयव द्वत्या प्रधाना दिषु स्यादिति दृष्टांतेना क्षिप्य समाधत्ते ॥ १० ॥

## नसंख्योपसंग्रहादपि नानाभावादतिरे-काच्च ॥११॥

संख्यायाः यस्मिम् पंचपंच जनाइति पंचविंशति रुप संग्रहादपि स्वीकारा दपि नप्रधानादिनां श्रौतत्वं कुतःनानाभावात्तेषां पंचपंत्वे नियामका भावा न्नानात्वादितेषा मित्यर्थः नकेवलं नानात्वा दतिरेकाच्च ऽतिरेकः पंचविंशति संख्याया ऽात्मा काशयोस्ततः पृथक् श्रवणात् तस्मादपि केपुनस्ते पंचपंच जना इत्यत आह ॥ ११ ॥

## प्राणादयोवाक्यशेषात् ॥ १२ ॥

प्राणआदिर्येषांते प्राणादय: प्राणचक्षु: श्रोत्रं मनांसि कुत: वाक्यशेषात् यस्मिन् पंचपंचजना इति वाक्यस्यशेष: प्राणस्यप्राण मित्यदि तस्मात्सर्व प्राणादय: पंचपंच जनाभवेयु: येऽत्र प्राणादिषुनामनं तीत्यत आह ॥ १२ ॥

## ज्योतिषैकेषामसत्यन्ने ॥१३॥

असत्यपि काण्वा नामन्ने तद्देवा ज्योतिषां ज्योति रित्यनेन ज्योतिषातेषां पंचसंख्या पूर्यते पूर्वाधि करण अचज्योतिषो विकल्पेनो पासानायां निर्वशेषाद विरोधशङ्का: इहतु सिद्ध कारणे विकल्पायोगात् विरोधे सत्य प्रमाण मिति प्रत्यु दा हरणेना चिप्य समाधत्ते ॥ १३ ॥

## कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्ते: ॥ १४ ॥

कारणस्य भाव: कारणत्वं तेनाकाशादिषु विषयेषु यथैकस्यां शाखायां व्यपदिष्ट: सदेवेत्यादिना तथान्यस्या मपिसत्यं ज्ञानम नंतमित्यादिनोक्तेरभिधानात् चकार: कार्यस्यापि तथोक्ति समुच्चयार्थं असदाइद मित्यादिना ऽस्तिविगाम इत्यत आह ॥ १४ ॥

## समाकर्षात् ॥ १५ ॥

प्रकृतस्यैव सत्यज्ञानादि लक्षणस्या कर्षेण प्रतिपादन माकर्ष: सम्यक्काम रूपादि राप्तित्येना कर्षस्तस्मात् पूर्वाधि करणे सदेवेत्या दिना एव वाक्येन सचकशब्दानु सारेण सच्छब्दोनीत: नैवमत्र किंचिन्नियामकं असद्वाचित्वेन कर्मशब्दस्येति प्रत्यु दा हरणेना चिप्य समाधत्ते ॥ १५ ॥

## जगद्वाचित्वात् ॥ १६ ॥

पुरुषाणां कर्तापरमेश्वरः यस्यवैतत्कर्म कर्मशब्दस्य जगद्वा चित्वात् जगद्वक्तीति जगद्वाचितस्य भावस्तस्मात् ॥ १६ ॥

## जीवमुख्य प्राणलिंगान्नेति चेत्तद्व्याख्यातम् ॥ १७ ॥

जीवस्य तद्दयार्श्वेछ्यादि प्राणस्य चाथास्मिन् प्राणेएकधा भवति इत्यादि लिंगं तस्मात्परमात्मै वेति चेदिदं यदितचोक्तं नउपासात्रै विध्यादिति सूत्राव-यवेन वाक्यभेदेन दोषेण व्याख्यातंनिराकृतं ननुप्राण लिंगानां तदन्यभोक्तृत्व प्रतिपादने नापि कथं चिदुप योगः स्यात्रजीव परामर्शस्य विनातत्प्रश्नाग्-मित्यत आह ॥ १७ ॥

## अन्यार्थन्तुजैमिनिःप्रश्नव्याख्यानाभ्यामपि-चैवमेके ॥ १८ ॥

अन्योर्थः प्रयोजनं ब्रह्म निर्धारणं यस्य परामर्शस्य सोयम न्यार्थः तमन्या-र्थेन् तुशब्द एवकारार्थः ब्रह्म निर्धारणार्थमेव जोव परामर्शः तद्यथा श्रेष्टो-त्यादिर्नजोवस्य लिंगमिति जैमिनिराचा र्यो मन्यते कुतः प्रश्न व्याख्याना-भ्याम् क्वैषएतद्दा लोके इत्यादि प्रश्नः व्याख्यानं प्रतिवचनं अथास्मिन प्राणे एकधा भवतोत्यादि प्रश्नश्च व्याख्यानंच प्रश्नव्याख्यानेताभ्या मपिचैव मेकेवा जसनेयिनः एव मनेन प्रकारेण प्रश्नोयएष विज्ञानमयः पुरुषः क्वैषतदाभूत इतिप्रति वचनेपि यएषोंत र्हृदये आकाश इति परमात्म विज्ञानार्थं जीवं परामृशति पूर्वाधि करणे ब्रह्मोप क्रमात् ब्रह्म परत्वं यथा त दिदिहापि जीवोप क्रमवत् जोव परत्व मिति दृष्टांतेना क्षिप्य समाधत्ते ॥ १८ ॥

## वाक्यान्वयात् ॥ १९ ॥

आत्मावारे द्रष्टव्य इत्यादि नोक्तः परमात्मैव श्रुतः वाक्यस्या मृतत्वस्य तु नाशास्ति वित्तेनेत्यादेः अस्मिन्नेव परमात्मनि अन्वयः पर्यवसानम् तात्पर्येण तस्मात् आत्मनस्तु कामाय सर्वं प्रियं भवतीति प्रिय समुचितस्य विज्ञानात्मनः प्रतीतिः कागति रित्यत आह ॥ १९ ॥

## प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः ॥ २० ॥

आत्मनो वारेदर्शने नेत्यादिप्रतिज्ञातस्या सिद्धिः तस्यालिंगं विज्ञानात्मनो द्रष्टव्यत्वादि संकीर्तनं नतुवस्व भेदाभिप्राय मित्या श्मरथ्य आचार्यो मन्यते कार्यकारण भाविन जीव परमात्मनो रीषद्भेदस्य विद्यमानत्वात् ॥ २० ॥

## उत्क्रमिष्यतएवंभावादित्यौडुलोमिः ॥२१॥

भेदेना वस्थितस्य नामरूपाभ्यां तथाविद्वा नित्यादि श्रुत्योत्क्रमिष्यतः तस्यनाम रूपादि मुक्तस्यैव भेदस्या भावाद्विज्ञानात्मनो द्रष्टव्यत्वा मिधान मित्यौ डुलोमिराचार्यो मन्यते जीवब्रह्मणो भेदाभेदस्य विद्यमानत्वात् ॥ २१ ॥

## अवस्थितेरितिकाशकृत्स्नः ॥ २२ ॥

अनेन जीवेनेति श्रुत्या परमात्मन एव जीव रूपेणा वस्थान मवस्थितः तस्या विज्ञानात्मनो द्रष्टव्यत्वा भिधान मितिकाश कृत्स्न आचार्यो मन्यते जीव ब्रह्मणो र्वस्तुतो भेदाभावात् एतेभ्यो भूतेभ्यः समुत्थायेत्यादिना कुतः जीवस्या भिधान मित्यत आह ॥ २२ ॥

## प्रतिज्ञादिसूचम् ॥ २३ ॥

पूर्वाधिकरणे प्रत्यभिज्ञां मुख्याम् आश्रित्यजीवपरत्वम्वाक्यस्यनि रस्तमि-त्यनिमित्तो पादानभेदात्मा गौणीत्या शंक्यसमाधत्ते ॥ २३ ॥

## प्रकृतिश्च प्रतिज्ञादृष्टान्ता नुपरोधात् ॥ २४ ॥

प्रकृतिरुपादानं ब्रह्मचकारेण निमित्तकारण मपिकुत:येना श्रुतं श्रुतंभवतीत्यादि प्रतिज्ञायथा सोम्यै त्यादिदृष्टान्तः प्रतिज्ञा चदृष्टान्तश्च प्रतिज्ञा दृष्टान्तौ तयोरुपरोध: पीड़नंसंकोच स्तद्विप रीतोनुपरोध: तस्मात् प्रकृतिनिमित्तम् चेदेकंचचेतनं प्रधानमेव कुतोनस्या दित्यतआह ॥ २४ ॥

## अभिध्यातोपदेशाच्च ॥ २५ ॥

सोकामयती त्यादिनाकारणस्य चैतन्यमभि ध्यातस्य उपदेश स्तस्मात् पुरुषाणाम्प्रधानाद्भिन्नत्वा अतिज्ञाद्यु परोधोपि चकारेणसमुच्चीयते ननुश्रौतार्थापत्ति लभ्योभयकारणत्वस्य ब्रह्मणिप्रलय श्रवणार्थापत्या प्रतिबाध इत्यत आह ॥ २५ ॥

## साक्षाच्चोभयाम्नानात् ॥ २६ ॥

नप्रलय श्रवणलिंगमस्ति कथमात्सर्वाणिहवा इमानि भूतानीत्यादौसाक्षादुभयोत्पत्ति प्रलयस्याम्नानादेदादेदेन उभयकारणत्वे कर्मणोरैक्यं कुचतदुपलब्ध मित्यत आह ॥ २६ ॥

## आत्मकृते: परिणामात् ॥ २७ ॥

आत्मन: कर्मत्वे न कर्तृत्वे न च करणंकृति: तदात्मानमिति श्रौतकर्मत्व स्वयम कुरुतेति श्रौतकर्तृ त्वन्तस्या: सिद्धस्यकर्यकार्यत्व मित्यतआह परिणामात् क्षीरस्येव दधिरूपेण अथवापरिणामादिति सूत्रान्तरं आत्मनइति श्रुत्या निमित्त त्वमेवं कुतउपादान त्वमपीत्यत आह परिणामात् सच्चामच्चेति श्रुत्याधन्यस्या न्याकारप्रतीति: रज्ज्वाश्रय सर्पाकार स्तस्मात् नन्वसत्वन्यरूपभवनं नचोपादानत्व मित्यत आह ॥ २७ ॥

## योनिश्चहिगीयते ॥ २८ ॥

चियस्माद्योनिश्चोपादान मचिन्त्यभूतयो निभित्वादिनाभीयते पञ्चापि पूव

धिकरणे मृत्तिकादि दृष्टान्ता प्रकृति श्चेत्युक्तं दृष्टापि प्रधानादि भेदादि निदर्शना नानाविवादा इत्याचिख्याति दैशेन समाधत्ते ॥ २८ ॥

## एतेनसर्वेव्याख्याता: व्याख्याता: ॥२९॥

एतेन प्रधान निराकारणेन सर्वेष्वपिवादा व्याख्याता निराकृता:व्याख्यात पदाभ्यासोध्याय परिसमाप्तिं द्योतयति ॥ २९ ॥

## इतिश्रीम त्परमहंसपरिव्राजका चार्यानन्दात्मक पादशिष्यस्य शङ्करान न्दभगवत: कृतौ सूत्रदीपिकायां प्रथमोध्या: ॥ १ ॥

पूर्वाध्याये सर्वोपनिषदां जगत्कारणे ब्रह्मणि समन्वय उक्तस्तस्मिन् विरोधा शंकायामध्याय: तथापि श्रुतिवत् स्मृतेराप्तोक्तत्वात्तद्विरोधा शङ्कास्मृति काराणामपि कपिलस्य प्राधान्यात् प्रथमं तत्स्मृत्या विरोधमा शङ्कयपरिहरति॥

## स्मृत्यनवकाश दोषप्र सङ्गइतिचेन्नान्यस्मृतिदोषानवकाश दोषप्रसङ्गात् ।।१।।

स्मृतेर्मूल प्रकृति रित्याद्या: येनाऽवकाशो ऽनवकाश: कार्मन्तुत्वाद्यभावे प्रधानप्रतिपादकत्व मपिचेत्तस्या स्तदार्थाभाव: सचा सौदोषश्च स्मृत्यनवकाश दोषस्तस्यप्रसंग: प्राप्तिस्तस्मादिति चेदेवं यदितन्नकुत: अन्यासांतस्माद व्यक्तमुत्पन्न मित्यादोनां स्मृतीना मनवकाशोर्थाभाव: सचासौ दोषश्चान्य स्मृत्यनवकाश दोषस्तस्य प्रसंगस्तस्मात् इन्द्रियाणां सर्वप्रसिद्धत्वा त्तत्रपठितानाम व्यक्ता दीनांमन्वादि स्मृतिविरोधेपि ग्रहणमित्यत आह ॥ १ ॥

## इतरेषांचानुपलब्धे: ॥२॥

प्रधानादितराणि महदादीनि तेषामनुपलंभन मनुपलब्धिस्तस्या लोका-

द्वेवितिशेष: चकारो व्याप्यस्योपलब्धोव व्यापकस्योप लब्धभाव समुच्चयार्थ: पूर्वाधिकरणे ऽपौरुषेय वदतदनुसारिस्मृतिविरोधा त्कपिलस्मृतेरप्रामाण्या-दविरोध: समन्वयस्ये त्युक्तंनन्वेवंयोग स्मृतिर्विरोधिनी साचप्रधानादीन् प्रतिपादयति तथा समन्वयस्य विरोधइति प्रत्युदाहरणेना शंकातिदेशेन समाधत्ते ॥ २ ॥

## एतेनयोग:प्रयुक्त:॥ ३ ॥

एतेन स्मृत्यनवकाश दोषप्रसंगेन योगोयोग शास्त्रंप्रत्युक्त: निराकृत: पूर्वाधिकरणे वेदविरुद्धार्थस्मृतेर्वेदवै लक्षण्या दतन्मूलत्ववत् ब्रह्मवैलक्षण्या ज्जगदप्यतन्मूलमिति दृष्टांतेना क्षिपति ॥ ३ ॥

## नविलक्षणत्त्वादस्य तथात्वञ्चशब्दात् ॥४॥

न ब्रह्मचेतनंजगत: कारणंकुतोजगतो विलक्षणत्वात् :तथात्वञ्चजड़त्व मप्यस्यजगत: अविज्ञानं चेत्यस्माच्छब्दा द्वाक्यात्सिद्धमित्यतोन जगतश्चेतन्यं कारणमित्यर्थ: नकल्पयामि चैतन्यं किंतुता आपोब्रुवन्नित्यादिनो पलभ्यत-इत्यत आह ॥ ४ ॥

## अभिमानि व्यपदेशस्तु विशेषानुगति-भ्याम् ॥ ५ ॥

तुशब्द: शङ्कानिवृत्त्यर्थ: अभिमानिनीनां देवतानां व्यपदेशोभि मानि-व्यपदेश: नावादीनां कुत: भोक्तृभोग्य रूपोविशेष: अथवा एताश्चैवदेवता शब्दोविशेष: अग्निर्वाग्भूत्वे त्यादिनानुगमन मनुगति: विशेषश्चानुगतिश्च विशेषानुगतीताभ्यां दृष्टांतमाह ॥ ५ ॥

## दृश्यतेतु ॥ ६ ॥

तुशब्द: पूर्वपक्षव्यावृत्त्यर्थं दृश्यतेलोके चेतनात् केशादिरचेतनात् गोम-यादेर्वृश्चिकादिर्वेदेपि यथासतइत्यादि दृष्टांताच्चेतनस्या चेतनकारणत्वं ॥ ६ ॥

## असदिति चेन्नप्रतिषेधमात्रत्वात् ॥ ७ ॥

निर्गुणे ब्रह्मणिप्रागुत्पत्ते र्जगतोऽभावाद सत्कार्यमिति चेदेवंय दितन्नकुतः प्रतिषेधमात्रत्वात् कारणात्मना कार्यस्य विद्यमानत्वात् प्रतिषेध्याभावेन प्रतिषेधमात्रत्वादसत् कार्यमितिशब्दस्य ॥ ७ ॥

## अपीतौतद्वत्प्रसङ्गादसमञ्जसं ॥ ८ ॥

स्थूलादि गुणकस्य कार्यस्य ब्रह्मणोऽभेदेऽपीतौप्रलये ब्रह्मणो पितद्वत्त्वप्रसङ्गः स्थूलादिमत्त्वप्रसंगः तस्मात् अथवातत्प्रसङ्गाद भेद प्रसङ्गात् भोक्तृभोग्याद्य भावप्रसंगेन अथवा तदभिन्नानां मुक्ता नामपि तद्वत्प्रसङ्गात् पुनरुत्पत्त्यादि प्रसङ्गात् अथवा भेदसद्भावे तद्वत्प्रसङ्गा त्कारणवत् प्रलयाभावप्रसङ्गा दसमंज-समसमीचीनमौपनिषदंदर्शनं ॥ ८ ॥

## नतुदृष्टांतभावात् ॥ ९ ॥

तुशब्द एवकारार्थः त्वदुक्तमेवकुतः दृष्टांतस्य भावेस्थूलस्यघटादेःपृथिव्या दिषु प्रविशतः द्वितीयेविभागस्य तेनसुषुप्तावुत्थितस्य तृतीयेतद्देहा देस्तदनु-त्पादेनच सांख्यादेश्चतुर्थे घटाद्यवस्थानस्या भावेन भावात्मकत्वात् अथवात्वत्पक्षे दृष्टांतस्या भावादेव ॥ ९ ॥

## स्वपक्षदोषाच्च ॥ १० ॥

स्वस्यप्रतिवादिनःपक्षः तस्मिन्विलक्षणत्वादेर्दोषात् चकारोन्यक्षदोषाभाव समुच्चयार्थः तर्कतस्तावत् स्वपक्षं परिहरिष्याम इत्यत आह ॥ १० ॥

## तर्काप्रतिष्ठानादप्यन्यथा नुमेयमिति चेदेव-मप्यविमोक्षप्रसङ्गः ॥ ११ ॥

तर्कस्य युक्तेरेकेनोक्तायाः परेणदूषणाद प्रतिष्ठानमन वस्थितिस्तस्मात् अन्यथा प्रतिष्ठितत्वे कस्य चित्तर्कस्य स्वरूप मनुमाना दवगंतव्यमिति चेद्यदि

प्रतिष्ठितत्वेप्य वैदिक प्रधान प्रतिपादक तर्कस्या प्रतिष्ठितत्वा दविमोक्ष प्रसंग: प्रतिष्ठि तत्वे स्य परित्याग प्राप्तेः अथवा कपिलस्य सर्वज्ञत्वात्तदीय तर्कस्यान्यथा प्रतिष्ठितत्वमपि चेदेव मपि सर्वज्ञानां बहुत्वात् सर्वज्ञ भावि- तत्वेप्य प्रतिष्ठितत्व मेवातो विनावेदं तर्कतस्तत्व ज्ञानाभावा त्संसारादवि- मोक्ष भावस्तस्य प्रसङ्ग: पूर्वाधि करणे ऽत्यन्तवैलक्षण्ये कार्य कारणा भावानुप पत्तिवत् समाधिक परिमाणत्व कारणस्य तदनुपपत्तिरिति दृष्टांतेना क्षिप्य समाधत्ते ॥ ११ ॥

## एतेनशिष्टापरिग्रहाअपिव्याख्याता:१२।

एतेन प्रधाननिरा करणेन शिष्टैर्न परि गृह्यन्त इतिशिष्टापरिग्रहाण- ण्वादि कारणवादा अपिव्याख्याता: निराकृता: पूर्वाधि करणे अनंत्कारणे तर्कोऽप्रतिष्ठित इत्युक्तं तर्हिजगज्जे देन तर्क: प्रतिष्ठित इति प्रत्युदा हरणेना क्षिप्य समाधत्ते ॥ १२ ॥

## भोक्त्रापत्तेराविभागश्चेत्स्याल्लोकवत् १३।

चेत् यदि ब्रह्म सर्वेणाभिन्नं भोग्यस्य भोक्तृत्व स्वरूपापत्ति: जीवा भीन्नेन ब्रह्मणा भोग्यस्या भेदात् भोक्त्रापत्तिस्तस्या: शंकायानासौ दोष:स्यात् अभेदेपि ब्रह्मणो भोक्तृभोग्ययोर्भेद: लोकवत् समुद्रा दभिन्नतरंगबुद्बुदयोरिव पूर्वाधि करणे भेदाभेद समाश्रयणेन विरोध समाधानं कृतमेकदेशिनातेनैव विरोध मात्रमाशंक्य परि हरति ॥ १३ ॥

## तदनन्यत्वमारंभणशब्दादिभ्य: ॥ १४ ॥

तस्मात्कारणा दनन्यत्व मभिन्नत्वं कार्यस्य कुत: आरंभ णशब्दादिभ्य: आरंभण शब्दो वाचारं भणमिति आदिशब्दे नैत दात्म्य मित्यादय: सचतदादयश्चतेभ्य: तयोरविना भावान्न भेद इत्यत आह ॥ १४ ॥

## भावेचोपलब्धे:।१५।

कारणस्य भावेच सत्वे एवनासत्वे कार्यस्यो पलंभन मुपलब्धि स्तस्या:

चतोऽविना भावादन्यत्वत्व मित्यर्थः उत्पत्तेः प्रागूर्द्ध च कार्यस्या सत्त्वात् नकारिणा नानन्यत्व मित्यत चाह ॥ १५ ॥

## सत्त्वाच्चाऽवरस्य ॥ १६ ॥

चवरस्य कार्यस्य सत्त्वाच विद्यमानत्वा देव प्रागूर्ध्वं च वर्तमानत्वात् चतोनत्व दुक्तं ॥ १६ ॥

## असद्व्यपदेशान्नेतिचेन्नधर्मान्तरेणवाक्य शेषात् ॥ १७ ॥

चसत्त्वस्य व्यपदेशो ऽसद्व्यपदेशः चसदेवेत्यादि वाक्यात् चसत्कार्य मितिचेदेवं यदितन्न कुतः धर्मान्तरेण व्यक्तरूपेणास्तित्वं व्यपदिश्यते कुतः वाक्यशेषात् वाक्यस्यशेषो वाक्यशेषः तत्सदासीदित्यादिवाक्यात् उपक्रमानु सारोवाक्यशेषः स्यादित्यतचाह ॥ १७ ॥

## युक्तेःशब्दान्तराच्च ॥ १८ ॥

दधिघटरुचकाद्यर्थिना प्रतिनियतक्षीरमृत्तिकासुवर्णादिष्वेव प्रवृत्ति दर्शनादिरूपभाव्योक्तयुक्तेः सदेव सौम्येद मित्यादिशब्दान्तरा चोत्पत्तेः प्राक्कार्यस्यसत्त्वं कारणा नन्यत्वञ्च गम्यते ॥ १८ ॥

## पटवच्च ॥ १९ ॥

यथैकस्यपटस्यसङ्कोच प्रसारणा द्यवस्थाख्य ऽभेदएवमत्रापिकार्यकारण-भावः चकारोगोमहिषयोरिवभेदेकार्यकारणत्वभावसमुच्चयार्थः पूर्वोधि करणे कार्यकारणयो रनन्यत्ववत् जीवपरयो रपितत् चस्त्वेकस्य कार्यकारणत्वं तथापि कारणावस्थायां कार्यकृतार्थ क्रिया किमितिनस्या दित्यत चाह ॥ १९ ॥

## यथाच प्राणादि ॥ २० ॥

प्राणोपान इत्यादि सयथा एक एवतत्सम्प्राप्यतत्तत् प्रापनार्थं क्रियाका

त्वं समुपैनोति पूर्वाधिकरणे कार्यकारणयो रनन्यत्ववत् जीवपरयो रपित त्सिद्धं इदानींति नैव विरोध माह ॥ २० ॥

## इतरव्यप देशाद्धिताकरणादि दोष प्रसक्तिः ॥ २१ ॥

इतरस्य शारीरस्य ब्रह्मणो नन्यत्वं तत्सृष्ट्वातदेवानु प्राविशत इत्याभ्यां ब्रह्मशारीरभ्यां व्यपदेशस्तस्मात् हितस्याकरणंहिता करमादि शब्देन विपरीत करणादिः हिताकरणादि दोषस्य प्रसक्तिः प्रसंगः ब्रह्मणः कारणत्वे तत्सूत्रस्य पूर्वावयवो हेतुः ॥ २१ ॥

## अधिकंतुभेदनिर्देशात् ॥ २२ ॥

आत्मावारे द्रष्टव्य इत्यादिना कर्मकर्तृत्वादिभेंदस्य निर्देशस्तस्मादे कस्मि-न्नपिभेदो नुपपन्न इत्यत आह ॥ २२ ॥

## अश्मादिवच्चतदनुपपत्तिः ॥ २३ ॥

यथैकस्याःभूमेर्निर्गता अश्मानोमहा र्घाश्चय आदिशब्देन ओषध्यादयश्च परस्पर भिद्यमानानतस्याः भिद्यंते तद्वज्जीवा भिन्नाश्चापि नब्रह्मणो भिद्यंते अतस्तस्यहिता करणादि दोषस्या नुपपत्तिर प्रसङ्गः चकारो भेदाभेदभावे कार्यसत्वतत्र तुल्यादि सद्भाव सूचनार्थः पूर्वाधिकरणे औपाधिक नानात्वे न समाधानं कृतं ईश्वरेतु तदपिनास्तीति प्रत्यु दा हरणमाश्रित्य समाधत्ते ॥ २३ ॥

## उपसंहारदर्शनान्नेतिचेत्क्षीरवद्धि ॥ २४ ॥

उपादान कारणस्य मृदादेरन्यस्य निमित्तस्य दण्डादेर समवायिनश्च संयोगादेरुपसंहारेण मुपसंहारः सन्निपातः तस्यदर्शनात् ब्रह्मणिसर्वस्यास्य मानत्वान्नो पादानं ब्रह्मेतिचेत् एवं यदितन्नहि यस्मात् क्षीरवत् यथाक्षीरं

वाह्यसाधना ख्यनपेक्षं परिणमते तद्वत् ब्रह्मापि चस्यचेतनस्यैवं नतुचेत नस्ये-
त्यत चाह ॥ २४ ॥

## देवादिवदपिलोके ॥ २५ ॥

चादिशब्देन रूपादयः यथाचेतना चपिदेवादयो लोकेवाह्यसाधनानपेक्षा स्तद्वत् ब्रह्मापि पूर्वाधि करणोक्तं परिणा मित्वमा चिपति ॥ २५ ॥

## कृत्स्न प्रसक्ति र्निरवयवत्व शब्द कोपोवा २६

ब्रह्मचेतनं चेत्परिणमते सर्वात्मना एकदेशेनवा चाद्येकृत्स्नस्यब्रह्मणः परिणाम प्रसङ्गः ततोऽनित्यत्वंद्वितीये निरवयवत्वस्या भिधायकःशब्दोनिरवयवत्व शब्दस्तस्य कोपोविरोधः निरवयवत्वं नस्या दित्यर्थः ॥ २६ ॥

## श्रुतेस्तुशब्दमूलत्वात् ॥ २७ ॥

तुशब्दः पूर्वपक्षव्या वृत्यर्थः नकृत्स्न प्रसक्तिर्दोषः कुतः इंताहमिमा इत्यादिना कार्यात् ब्रह्मणोव्यति रेकश्रुतेः ननिरवयवत्व शब्द कोपः यतोवाइमानि निष्क्रिय मित्यादिना कारणत्वस्य निरवयत्वस्य शब्दितत्वात् शब्दमूलत्वाच ब्रह्मवादस्य शब्दोमूलं प्रमाणंयस्यसोयं शब्दमूलः तस्यभावस्तत्त्वं तस्मात् ननुशब्दोपिकथं विरुद्धंब्रूत इत्यत चाह ॥ २७ ॥

## आत्मनिचैवंविचित्राश्चहि ॥ २८ ॥

चात्मनिस्वप्न हृशि एवंस्वरूपानुप मर्देन चियस्मात् विचित्राः सृष्टयोन तत्ररथा इत्यादि श्रुत्यास्वानु भवेनचदृष्टाः चाद्यश्चकारो मायावादनिदर्शन समुच्चयार्थः द्वितीयो नुपपत्तेर लंकारार्थः ॥ २८ ॥

## स्वपक्षदोषाच्च ॥ २९ ॥

स्वस्यप्रतिवादिनः पक्षः स्वपक्षः तस्यदोषः कृ त्स्नप्रसक्तिस्तस्मात् चकारो

श्रुत्यादिन स्तदभाव समुच्चयार्थः पूर्वाधि करणे स्वप्न दृष्टांतेन मायावित्वा दीश्वरस्यकारणत्वमुक्तं इदानींत्व शरीरस्य नमायित्वा च्चिप्य समाधत्ते ॥ २८ ॥

## सर्वोपेताचतद्दर्शनात् ॥ ३० ॥

अशरीरापि देवता शक्तिमायाया आश्रयः कुतः सर्वोपेताचसायतः सर्वाभिः शक्तिभिरुपेता सर्वोपेतापि अशरीरैव तदपि कुत इत्यत आह तद्दर्शनात् सत्यसर्वोपि तत्त्वस्य सर्वकर्मेत्यादिना दर्शनात् ॥ ३० ॥

## विकरणत्वान्नेतिचेत्तदुक्तम् ॥ ३१ ॥

करण रहितत्वं विकरणत्वं तस्मात् परस्यादेवताया हस्तपादादिशून्यत्वेन नसर्वकर्म त्वादिक मिति चेदेवं यदिचोदयसि तर्ह्योदं शब्दमूलत्वा दित्युक्त निराकृतं पूर्वाधि करणे प्रामाधि कत्वे ना शरीरस्यापि मायावित्वं जगत्कारणत्वं चापादितं इदानीं जगत्कारणत्व मीश्वरस्या नुपपन्नं प्रयोजना भावात् इत्याक्षिपति ॥ ३१ ॥

## नप्रयोजनत्वात् ॥ ३२ ॥

नचेतनः स्रष्टाकुतः चेतन समीक्षायाः प्रयोजनवत्त्वात् आप्त कामत्वाच्चे श्वरस्य न प्रयोजनं किंचित्सृष्टौ ॥ ३२ ॥

## लोकवत्तुलीलाकैवल्यं ॥ ३३ ॥

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः लोकवत् यथालोके राजादीना माप्तकामानां विनाप्रयोजनं लीलायाः केवलया भावोलीला कैवल्यं लीलयैव केवलं तत्प्रवर्तनं तद्वत् पूर्वाधि करणे लीलया जगत्कारण मुक्तमिदानीं कुर्वतो वैषम्या दित्याक्षिप्य समाधत्ते ॥ ३३ ॥

## वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति ॥ ३४ ॥

विषमस्वभावो वैषम्यं केषांचित्सुखं केषांचिदुःखं केषांचिदुभे अपिनिर्घृणस्य भावोनैर्घृण्यं जनसंहर्तृत्वादि वैषम्यञ्च नैर्घृण्यं च वैषम्यनर्घृण्ये नेश्वरस्य कुतः धर्मसापेक्षतः सुखम धर्मसा पेक्षतः दुःखमुभयसा पेक्षतः सुखदुःखादिच करोति यतः सापेक्षस्वभावः सापेक्षत्वंहि यस्मात् यथा भवति तथा दर्शयति श्रुतिः एषह्येवे त्यादिना स्मृतिरपिये यथेत्यादिनाच ॥ ३४ ॥

## नकर्माविभागादितिचेन्नानादित्वात् ॥३५॥

प्रथमतो जगतउत्पत्तौ नेश्वरस्य कर्मसा पेक्षता कुतः यतउत्पत्तेः पेक्न कर्म सुकृतं दुष्कृतम् तदेवकुतः सदेवे त्यादिना उत्पत्तेः प्रागविभागा दितिचेत् एवं यदितन्न प्राथम्या नुपपत्तेः अनादित्वा त्संसारस्य नविद्यते चादिर्यस्यसोय मनादिस्तस्य भावस्तत्त्वं तस्मात् तदेवकाय मित्यत चाह ॥ ३५ ॥

## उपपद्यतेचाऽप्युपलभ्यतेऽच ॥ ३६ ॥

संसारस्या नादित्व मुपपद्यते अन्यथा कृतनाशाकृताभ्यागम प्रसङ्गात् उपलभ्यतेपिसूर्या चन्द्रमसा वित्यादौ स्मृतौचनांतो नचादि रित्यादौ चाद्यचकारो विपर्यय प्रमाणा भावार्थः द्वितीयचकारः प्रसिद्ध विरोधार्थः पूर्वाधि करणे विषयस्रष्टृत्वस्या नैकांत ताउक्तातो नैवनिर्गुणस्या नुपादानत्व मिति प्रत्युदा हरणेनाक्षिप्य समाधत्ते ॥ ३६ ॥

## सर्वधर्मोपपत्तेश्च ॥ ३७ ॥

सर्वेधर्माः सर्वधर्माः तेषामुप पत्तिस्तस्याः निर्गुणस्यापि जगत्कारणत्वं प्रमाधिष्टानत्वेन रज्वादे रिवसर्व धर्मोप पत्तेरेव ॥ ३७ ॥

## इति श्रीमत्परमहंस परिव्राजकाचार्यानंदात्मज पूज्यपाद शिष्य श्री शंकरानंद भगवत्कृतौ सूत्रदीपिकायां द्वितीयाऽध्यायस्य प्रथमः पादः ॥

पूर्वस्मिन्पादे वेदांतानुग्राहकाः सांख्यादितर्का निरस्ता इदानीं तेषांमध्ये वेदांत निरपेक्षावैतैः समन्वयस्य विरोधमाशंक्यतेषां दुष्टत्व प्रदर्शनेना विरोध माह द्वितीयेन पादेन तत्रापिसांख्य स्मृतिवस्तर्कं प्राधान्यमंगीकृत्यतन्निरस्यति ॥

### रचनानुपपत्तेश्चनानुमानं ॥ १ ॥

अनुमीयत इत्यनुमानं प्रधानं जगत्कारणंनकुतः तस्याचेतनत्वे न जगतीगिरिनदी समुद्रादे रचनायाः सन्निवेश करणस्या नुपपत्तेः चकारोन्वयव्यानुपपत्तिं समुच्चिनोति ॥ १ ॥

### प्रवृत्तेश्च ॥ २ ॥

आस्तांतावदियंरचना तन्निद्धार्थीया प्रवृत्तिःसाम्यावस्थातःप्रच्युतिस्तस्याः अचेतन स्यप्रधानस्यचेतना नधिष्ठितस्यानुपपत्तेः ॥ २ ॥

### पयोऽम्बुवच्चेत्तत्रापि ॥ ३ ॥

पयोयथा अचेतनं वत्सविवृद्ध्यर्थं अंबुयानिम्न देशगमनाय प्रवर्तते तद्वत् प्रधानमपि प्रवर्तिष्यत इति चेदेवं यदितत्र तत्रापि पयसि वत्सस्यां बुनिम्नेद्य भेदकस्य ईश्वरस्यच समाश्रयणंयतःअस्तुप्रधाने सत्वांशः प्रवर्तक इत्याह ॥ ३ ॥

### व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ ४ ॥

सत्व प्रधान व्यतिरेकिणा नवस्थिते रनवस्थानात् वाह्यस्यान पेक्षत्वात्

स्वातन्त्र्येण महदादीना मुत्पादः स्यादिति शेषः चकारोऽपसिद्धांत माह तृणादेः क्षीराद्याकार परिणाम वन्नस्वातन्त्र्य मित्यत आह ॥ ४ ॥

## अन्यत्राऽभावाच्चनतृणादिवत् ॥ ५ ॥

नायंतृण पल्लवादि दृष्टांतोप्य चेतनं जगत्कारणं साक्षात्कारणं साधयति यतोऽचेतनस्य तृणपल्लवादेः स्वतंत्रस्य नक्षीर परिणामोपि कुतः अन्यत्रबलो-वर्दादिभक्षिते परित्यक्ते वाक्षीर परिणामस्या भावात् चकारः प्रधानस्य स्वरूपा सत्त्व समुच्चयार्थः ॥ ५ ॥

## अभ्यूपगमेऽप्यर्थाभावात् ॥ ६ ॥

पूर्वं प्रधानस्य प्रवृत्तिर्नोपपद्यत इतिस्थितं इदानीं तत्प्रवृत्ते रभ्युपगमेपि अर्थस्य प्रयोजनस्य निमित्तान्तरा भाववत् पुरुषे भोगादेरसम्भावेना भावात् ॥ ६ ॥

## पुरुषाश्मवदितिचेत्तथापि ॥ ७ ॥

पुरुषा वन्ध्यपं गूतचांध मधिष्ठाय प्रवर्तते इतिपक्षः प्रवर्तको यस्कांतो वायथास्वयम् प्रवृत्तस्तद्वद प्रवृत्तोपि पुरुषःप्रवर्तयिष्यतीति चेत्तथापि सान्निध्या-दयश्च दोषाः प्रसज्येरन् पंगोगुणः प्रवर्तको स्थित्यत आह ॥ ७ ॥

## अङ्गित्वानुपपत्तेश्च ॥ ८ ॥

सत्त्वादीनां साम्येंगित्वस्या नुपपत्ते श्चकारो जडत्वप्रयुक्तं सामान्य दूषणं समुच्चिनोति साम्यावस्थायामपि वैषम्ययोग्या गुणास्ते नैकवाक्यता यथार्द-गित्व मपिस्या दित्य आह ॥ ८ ॥

## अन्यथानुमितौचज्ञशक्तिवियोगात ॥ ९ ॥

अन्यथा नुमितौ कार्यवशेना क्लित्याद्यनु मितौ तस्यचचेतन्या वस्थानत्वे तदक्षिप्त संभवति कुतः प्रयत्ने वियोगो ऽभावस्तस्मात् पुरुषस्येव चेतनत्वा

दित्यर्थः नचानुमानमपि सिद्ध्यतीति चकारार्थः सत्वगुणत्वात् ज्ञानस्य तच्छ क्तिरप्य विरुद्धत्वत भाव ॥ ८ ॥

## विप्रतिषेधाच्चासमंजसम् ॥ १० ॥

अर्ंश्च शक्तिचएवं ग्रन्थेष्वपिक्वचित्सप्तेन्द्रियाणि क्वचिदेकादशेत्यादिविप्रतिषेधः तस्मादिदं सांख्यदर्शन मसमंजसं पूर्वाधि करणे प्रधानगुण नन्वयात् जगन्नतत् प्राकृतिक मित्युक्तं इहापिचे तन्यानन्वयात् नचेतन प्राकृतिक मित्या क्षिप्य समाधत्ते ॥ १० ॥

## महद्दीर्घवद्वाह्रस्वपरिमण्डलाभ्याम् ॥ ११ ॥

यथा परमाणोः परिमंडला द्द्वणुकस्य चद्यणुकं चणीः ह्रस्वाच चणुका न्महद्दीर्घच त्र्यणुकादि तदचेतन मपि ब्रह्माचेतनस्या रंभकमस्तु पूर्वाधि करणे प्रधानस्य स्वातंत्र्याच्च जगतां कारणत्वम् इहत्वणूना मीश्वरस्या धिष्टांतुःसत्वा त्कारणत्व मितिप्रदा हरणे नाक्षिप्य समाधत्ते ॥ ११ ॥

## उभयथापिनकर्मातस्तदभावः ॥ १२ ॥

उभयथाप्याऽऽद्यस्य कर्मणो निमित्तस्या भाविभावेपि हष्टस्या हष्टस्यवा हष्टस्यापि प्रयत्नस्या भिघाता देवाहष्टस्याप्याक्ष समवायिनो वा हष्टवदात्म संबंधस्यापि सदातिनत्वेन प्रलयाद्य भावदोषात् नाद्यंकर्मोत्पुपत आद्यस्य- कर्मणो भावात् तज्जनकस्यापि तस्यसंयोगस्या भावः असत्वं तदभावाच्च संयो- गसचिवाः परमाणवो नद्यणुकादि क्रमेण जगदारंभंते इत्यर्थ ॥ १२ ॥

## समवायाभ्युपगमाच्चसाम्यादनवस्थितेः ॥ १३ ॥

पूर्वं संयोगस्य निमित्ताभावउक्तः इदानीं सम्बन्धाभावः समवा यस्या भ्युपगमौगी कारस्तस्मात् संयोगस्य यथासमवायः एवंसम वायेपि समानत्वा त्संबंधभेदस्य भेदस्यचातः समवायेपि समवाय प्रत्यनवस्थाम मनवस्थितिस्तस्याः

चकारः संयोगस्य समवायानंगीकारे सिद्धांत विरोधादि समुच्चिनोति अस्तुतर्हि परमाण्वव एवास्य कर्मणो निमित्त मित्यत आह ॥ १३ ॥

## नित्यमेव च भावात् ॥ १४ ॥

अणूनां प्रवृत्तिस्वभावत्वे सर्गस्य निवृत्तिस्वभावत्वे प्रलयस्यो भयस्य भावत्वे कार्यस्यपूर्वापरकाल वैकल्यस्यानुभ यस्वभावत्वे निमित्तस्य नित्य सर्वदा भावात् प्रलयाद्य भावदोषः चकारः पूर्व सूत्रवत् अस्त्वागंतुकं निमित्त मित्या-नामणूना मित्यतआह ॥ १४ ॥

## रूपादिमत्त्वाच्चविपर्ययोदर्शनात् ॥ १५ ॥

नित्यस्य विपर्ययो ऽनित्यत्व अणूनांकुतः रूपादि मत्वात् रूपादिमतां घटादीना मनित्यत्व दर्शनात् चकारः कर्मव्यति रिक्तस्य निमित्तस्य दुर्लभत्व समुच्चिनोति घटादीनां परिमाणतारतम्यादस्त्व नित्यत्वमणूनां समान परि-णामत्वा दात्मादिवत् नित्यत्वमित्यत आह ॥ १५ ॥

## उभयथाचदोषात् ॥ १६ ॥

समान परिमाणत्वे वा यवीयानामपि रूपरस गन्धस्पर्श सद्भावोदोषः असमान परिमाणत्वे हेतोरसिद्धिर्दोषः चकारस्त्वने कांतिकत्व समुच्चये नगुणाश्रतोयत्वादिदं मतमंगी करणीय मित्यत आह ॥ १६ ॥

## अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ १७ ॥

मपरिग्रहो ऽपरिग्रहः सांख्यादि वादस्य सत्कार्यांशे परिग्रहः सोप्यस्यन तस्मादत्यंत मनपेक्षाशिष्टैः परिग्रहो ऽणुमात्र मपिनकृत इत्यर्थः चकारस्त्व प्रयुक्तत्व समुच्चयार्थ. पूर्वाधि करणे ऽर्धवैनाशिका निरस्ता अस्तुतेषां निरासः उभय भ्रष्टत्वात् नवाह्यार्थ वादिनो वैनाशिका स्थविरा विष्य समाधत्ते ॥ १७ ॥

## समुदाय उभय हेतुकेपितदप्राप्तिः ॥ १८ ॥

चतुर्विधः अणुहेतुकश्चभूत भौतिक संहतिरूपः समुदायः रूपवेदना विज्ञान संस्कार हेतुकश्चपञ्च स्कन्धीरूपः तस्मिन्नुभय हेतुकेपि समुदायिनां समुदायेभि प्रियमाणे तदप्राप्तिस्तस्य समुदायस्या प्राप्तिरसिद्धिर चेतनत्वा त्समुदायस्य चावस्तुत्वात् अस्यस्थिरस्य चेतनस्य संहर्तु रसत्त्वात् ॥ १८ ॥

## इतरेतर प्रत्ययत्त्वादिति चेन्नोत्पत्ति मात्र-निमित्त्वात् ॥ १९ ॥

अविद्या संस्कार विज्ञानादीनां स्थिरस्य चेतनस्या सत्त्वेपि इतरेतर प्रत्यय इतरेतर कारणत्वं तस्मादि चेत् नउत्पत्तिमात्र निमितत्वात् उत्पत्तेः केवलं निमित्तम् विद्यादितरेतर नतुसंघातोत्पत्ता वितिमात्र शब्दार्थः ॥ १८ ॥

## उत्तरोत्पादे च पूर्वनिरोधात् ॥ २० ॥

उत्पत्तिमात्र निमित्तत्वमुक्तं तदप्य संभवि उत्तरस्य कार्यस्योत्पादे उत्पत्-त्यवसरे पूर्वस्य निरोधाद सत्त्वात् चकार उत्पत्त्यसद्भाव समुच्चयार्थः असत्य कारणेकार्यस्यो त्पादोस्थित आह ॥ २० ॥

## असति प्रतिज्ञोपरोधो यौगपद्य मन्यथावा ॥ २१ ॥

असति कारणे कार्यस्योत्पादे प्रतिज्ञायाश्च तुर्विधान् हेतून्प्राप्तीत्यच तदुत्पद्यते इत्यस्या उपरोधोबाधः अन्यथा कार्यस्य क्षणिकारणस्य सत्त्वेकार्य कारणयोर्यौग पद्यन्तथापि क्षणिकाः सर्वसंस्कारादिति प्रतिज्ञोपरोधः माभूद्वै नाशिकानां सन्पदार्थ असंस्तुत्या दित्यत आह ॥ २१ ॥

## प्रतिसंख्याप्रतिसंख्या निरोधाप्राप्तिरविच्छेदात् ॥ २२ ॥

बुद्धिपूर्वको निरोधः प्रतिसंख्या निरोधः तद्विपरीतो प्रतिसंख्यानिरोधः निरोधौ सन्धदार्थः सुगतानाम भिप्रेतः तथा निरोधस्य संतानस्य नित्यत्वात् संतानिनांच विनाशस्य कर्त्तुमशक्यत्वात् अभाविनाश्ये वासत्त्वं प्रतिसङ्ख्या निरोधस्य प्रतिसंख्या निरोधस्यतयोः प्राप्तिर्निरोधा भावात्तएव कथमित्यत आह अविच्छेदात्संतान संतानिनोः नकेवलं निरोधाभाव अविद्यादीनां प्रतिसंख्या निरोधौ निमित्तम विनास्तीत्याह ॥ २२ ॥

## उभयथाचदोषात् ॥ २३ ॥

उभयथा यदिज्ञानेन निर्हेतुक विनाशा भ्युपगम दोषश्चेत् विनैरवज्ञानेन ज्ञानतत्साधनोपदेशवैयर्थ्य दोषस्तस्मात् चकारस्त्वप्रति संख्यानिरोधे संकर समुच्चयार्थः आवरणा भावस्था काशस्य यथा मतांगीकार स्तद्विरोधयोर-प्यङ्गीकारः किंनस्या दित्यत आह ॥ २३ ॥

## आकाशेचाविशेषात् ॥ २४ ॥

आकाशेप्य सत्त्वमनुप पन्नं निरोधयो रिवयथा गंधादयोगुणाःपृथिव्यादयो भावास्तथा शब्दोगुणो प्याकाशोभावः अविशेषाच्चकारएवानिकावरणभावा नुपपत्त्यादि समुच्चिनोति विज्ञानस्य क्षणिकत्वात् तद्दृष्टांतेना सर्वज्ञस्य क्षणिकत्वात् तत्प्रणालिकया ऽसत्त्वंसिद्ध्यतीत्यत आह ॥ २४ ॥

## अनुस्मृतेश्च ॥ २५ ॥

अनुभव मनुजायमाना स्मृतिस्तस्याः कर्तुः स्यानु भवस्मृत्योरेकाधि-करणत्वात् दृष्टान्ते नान्येषामपि चकारो ज्ञानस्यापि क्षणिकस्वभाव समुच्चयार्थः कार्यमेवा संतंपदार्थं साधयिष्यतिमा नुपमृद्यप्रादुर्भावादिति न्याया दित्यत आह ॥ २५ ॥

## नासतोऽदृष्टत्वात्॥ २६ ॥

असतो ऽविद्यमानान्मृदा देर्घटादिकं नजायतेकुत: मृदादेरसत्वेघटादेर दृष्टत्वात् पिण्डादेरुप मर्दादेव घटादि कार्यस्यो त्यादस्त्वत आह ॥ २६ ॥

## उदासीनानामपिचैवंसिद्धिः ॥२७ ॥

एवम् भावाद्भावोत्पत्तौ कुसूलनिहित कुल्माषाना मुदासीनकृषीवलानां कृषिमकुर्वता मपिसिद्धि: कृतकृत्यता गाब्धादिकं सम्पन्न'स्या दित्यर्थ: चकार: पिण्डादीनाम् कारणत्व समुच्चयार्थ: पूर्वाधिकरणे समुदाया नुपपत्त्यादिना बाह्यार्थ वादीनिराकृत: इदानीं विज्ञानवादीताभिरेवोपपत्तिभि: प्रत्यवतिष्ट-मानोनिराक्रियते ॥ २७ ॥

## नाभावउपलब्धेः ॥ २८ ॥

बाह्यानामर्थानां नाभाव: असत्वं कुत: तेषांकुम्भादीनां तत्तत्प्रत्यये रुपलंभन मुपलब्धि: तस्या: ज्ञाना काराणा मेवतेषांस्वप्नवदुपलंभ: स्यादित्यत आह ॥ २८ ॥

## वैधर्म्याच्चनस्वप्नादिवत् ॥ २९ ॥

विरुद्ध धर्मयोर्भावो वैधर्म्यं बाध्यत्वा बाध्यत्वे न तस्मान्नायं स्वप्नादिव-द्बाह्योर्थोज्ञानाकार: आदि शब्देन माया रचनादिकं चकार: श्रुतेर प्रमाण्यं समुच्चिनोति आवाध्यत्वं विचित्रार्थो पलंभा दिचित्रंचार्थो वासना विलास इत्यत आह ॥ २९ ॥

## नभावोनुपलब्धेः ॥ ३० ॥

वासनानां विचित्राणां नभावोनसत्त्वं कुत: अनुपलब्धे: बाह्याना-मर्थानाम भाव: माभूदाह्यार्थं आलयविज्ञान वशादेव वासनानां विचित्रा णां सत्व मित्यत आह ॥ ३० ॥

## क्षणिकत्वात् ॥ ३१ ॥

आलय विज्ञानस्य स्थापितो ऽपसिद्धांत: क्षणिकत्वे आश्रया भाव इत्यर्थ: चकारो बाह्यार्थस्या सत्त्वे आलय विज्ञानस्याप्य सामर्थ्य माहकेनाप्यं शीनविज्ञान वादीत्पत्तीत दृष्टान्तेन सौगतं मतमंगो करणीय मित्यत आह ॥३१॥

## सर्वथानुपपत्तेश्च ॥ ३२ ॥

सर्वथा सर्वक्षणिक मित्याद्यनु तिष्ठतां परस्यापिनि त्यादिशब्दत: अनुपपत्ते: चकारो वेदविरोधसमुच्चयार्थ: वाह्यार्थ पदस्थाने दंष्ट्रेयदुज्ञान प्रक्षेपेण शून्यवादिनिरा करणमपिनाभाव इत्यादि सूत्रेकरणीयम पूर्वाधिकरणे उपलब्धयादिभि विंज्ञानवाद शून्यवादौ निराकृतौनैवंविवक्षनानां समयय-नैकत्वा ययथादिति प्रत्युदा हरणेन तद्विरोधमाशंक्य परिहरति ॥ ३२ ॥

## नैकस्मिन्नसम्भवात् ॥ ३३ ॥

जीवा जीवयो रास्त्रवसं वरनिर्ज्ज र वंधमोक्षाणां पञ्चास्तिकायानां जीवपुद्ग लधर्म कारणत्व समयकल्पिता नामनेक भेद भिन्नानां संक्षेपतो द्वाविवपदार्थौ तद्वावस्थार्थ: स्यादस्तिस्यान्नास्ति चेदवक्तव्य: स्यादस्तिचा वक्तव्यश्चे ति इमंसप्तभङ्गीनय मुत्पाद्यावतार यतिए कत्वादौ चाष्टसुच व्यवस्थ-पकत्वं मन्यंते तदिदंनोप पद्यते कस्मात् एकस्मिन्धर्मिणि सत्त्वादीनां युगपद्दा संभयात् ॥ ३३ ॥

## एवंचात्माकार्त्स्न्यम् ॥ ३४ ॥

ययास सभङ्गी नयादिकमनुपपन्नमेवमात्मनो ऽकार्त्स्न्य म सर्वगत परिमा-णमपिदेहपरिमाणत्वे देहवत्त्वादित्यर्थ: नियत परिमाणस्यापि जीवस्यावय वागमनिर्गमाभ्यां देह परिमाणत्व मित्यत आह ॥ ३४ ॥

## नचपार्यायादप्यविरोधविकारादिभ्य: ॥ ३५ ॥

नचपर्या यादागमनि र्गमनं तस्मादपि नैवामित्वत्वा भावविरोध: कुत:

विकारादिभ्यः सूक्ष्माऽस्थूलादि आदिशब्देना वयवानामाक्रन्ध्येवोत्पति प्रलयस्थानानि रूपणात्वानि रूपणत्वादयो दोषास्तेभ्यः अवयवापरिणामा गमनिर्गमनयोरपि जीवस्य प्रवाहरूपेण नित्यत्वान्नायं दोष इत्यत आह नचपर्यायादप्यविधो विकारा दिभ्यः पार्यात्परिमाणा गमनिर्गम रूपात् अपचकारः सौगतमतीक्तदोष समुच्चयार्थः शेषंसमानं ननूक्तः सर्वोदोषो नजीवस्था नित्यत्व मावहति किंतुतत्परिमाणस्था नित्यत्वादिक मित्यत आह ॥ ३५ ॥

## अंत्यावस्थितेश्चोभयत्वादविशेषः ॥ ३६ ॥

अंत्यस्यमोक्षा वस्थस्यपरिमाणस्य नित्यत्वाद वस्थानमवस्थिति तस्यानुभयास्यादि मध्यावस्थस्य परिमाणस्य तद्वन्नित्यत्वं तस्मात् अविशेषः एकशरीर परिमाणमेव तस्मान्नचेतदिष्टं तस्माज्जीवस्याप्यनित्यत्वम् अथवान्त्यस्यजीवपरिमाणस्या वस्थितत्वात् पूर्वयोरप्यवस्थयो रवस्थित परिमाण एवजीवःस्यात्तत्राविशेषेण सर्वदेवाणु र्महन्वाजीवःस्यात्चकारो जीवरूपत्वादि प्रसङ्ग समुच्चयार्थः पूर्वाधि करणे यथासत्वासत्वयोरेकत्र विरोधउक्तः एवमधिष्ठातृत्वो पादानत्वयो रेकत्रविरोध इति दृष्टान्तं नाश्रित्य केवल निमित्तत्व दूषणेन समाधत्ते ॥ ३६ ॥

## पत्युरसामंजस्यात् ॥ ३७ ॥

पत्यु रीश्वरस्य नप्रधान पुरुषाद्यधिष्ठातृत्वं कुतअसामंजस्यात् समंजसस्य भावः सामंजस्यं नसामंजस्यंमसामंजस्यं वैषम्यनैर्घृण्य कर्मेश्वरान्योन्या श्रयपरम्परा संगत्वाभावादि तस्मात् राजादिव दस्त्वधिष्ठातृत्व मित्यत आह ॥ ३७ ॥

## सम्बन्धानुपपत्तेश्च ॥ ३८ ॥

नाचस्वस्वामि भावलक्षणः सम्बन्धस्तत्रैव विप्रतिपत्तेः नचसंयोगो निरवयवत्वादीनां नचसमवायः तस्यकार्यकारण द्रव्यसम्बन्धत्वा देवमन्यस्यापि सम्बन्धस्या नुपपत्तिः चकारः सम्बन्धस्यागं तुकत्वा नागन्तुकत्वा द्यनुपपत्ति समुच्चयार्थः ॥ ३८ ॥

## अधिष्ठानानुपपत्तेश्च ॥ ३९ ॥

अधिष्ठातुः क्रियाधिष्ठानं तच्चनाधिष्ठेयमं तरेणनवा स्वरूपेण संदिग्धस्य रूपादिहीनस्य प्रधानादे रधिष्ठेयत्वा भावादधिष्ठानस्या नुपपत्तिस्तस्याः अक्ता रोधिष्ठात्र धिष्ठानयो रपिस्वरूपा नुपपत्तिं समुच्चिनोति ॥ ३९ ॥

## करणवच्चेन्नभोगादिभ्यः ॥ ४० ॥

माभूत्कुम्भ कुलालादिव दधिष्ठेया धिष्ठातृत्वं करणवज्जीवेंद्रि यवद्भविष्य तीति चेन्नकुतः भोगादिभ्यः भोगः सुखदुःखान्यतर साक्षात्कार आदिशब्देन जन्ममरणादयः तेभ्योहेतुभ्यः अथवाधिष्ठानस्य शरीरस्या नुपपत्ते रिति पूर्व सूत्रार्थः द्वितीय सूत्रार्थस्तु करणमिन्द्रियं तदस्यास्तीति करणवत् शरीरंकल्प्य मिति चेत्शेषंपूर्ववत् ननुनैतानि सर्वगतं सर्वज्ञे ईश्वरचोद्या नीत्यत आह ॥ ४० ॥

## अंतवत्त्वमसर्वज्ञतावा ॥ ४१ ॥

ईश्वरस्ये तिशेषः यदीश्वरः प्रधानादीना मात्मनश्चे यत्तां परिछिनत्ति अंतवान्स्यसर्वज्ञश्च नचेदम् पूर्वाधिकरणेकैवल्य निमित्तत्वं निराकृतं अस्तुतर्ह्युपादानत्वमपि निरंकुशं जीवस्य प्रपञ्चस्ये ति प्रत्युदा हरणे नाचिन्त्य समाधत्ते ॥ ४१ ॥

## उत्पत्त्यसम्भवात् ॥ ४२ ॥

वासुदेवात्परस्मात्प्रकृतेः संकर्षणस्य जीवस्योत्पत्ते र्जन्मनः जातस्य मरण-विशेषः तत्तच्चजीवस्य कृतनाशा कृताभ्यागम प्रसङ्गादिः अतो ऽसंभवात् नसंसम्भवो ऽसम्भवस्तस्मात् नभागवतमतं सम्यक्यथास ङ्कर्षणाज्जीवात् प्रद्युम्नस्य मनसोयथावा प्रद्युम्नान्मनसो निरुद्धस्याहं कृतेर्जन्मएवं वासुदेवादपि संकर्षणस्योत्पत्तिरस्त्वित्यत आह ॥ ४२ ॥

## नकर्त्तुःकरणम् ॥ ४३ ॥

कर्त्तुः संकर्षणात्करणं प्रद्युम्नोनजायते संकर्षणस्यैव कर्त्तृत्वस्यापि प्रतिपत्ते रित्यर्थः चकारः प्रद्युम्नादय निरुद्धोत्पत्त्य भावस्य चनार्थः मनुसर्वज्ञत्वादि गुणानां सङ्कर्षणादीना मुत्पत्ता वपिनोत्पत्ति प्रसङ्गोदोष इत्यत आह ॥ ४३ ॥

## विज्ञानादिभावेवातदप्रतिषेधः ॥ ४४ ॥

वाशब्दश्चेषदर्थः यदिसर्वेसर्वज्ञाः सर्वगताः अनन्तगुणाश्च वासुदे वादय-स्तदावासुदेवा द्युत्पत्तसम्भवी दोषस्तदवस्थः अतस्तस्याप्रतिषेधः तेषुसंकर्ष-णादिषु वासुदेव वद्विज्ञानादि गुणानांभावे अस्य शास्त्र विरोधं वेदविरोधं विनानान्य विरोधं मन्यामह इत्यत आह ॥ ४४ ॥

## विप्रतिषेधाच्च ॥ ४५ ॥

अस्मिन्नेव शास्त्रे ज्ञानादीनां गुणत्वं त एवंभगवन्तो वासुदेवा इत्यादिवि प्रतिषिद्धंविरुद्धंचतुर्षुवदेषु परंश्रेयो लब्धा शांडिल्य इदंशास्त्र मधीतवा नित्या-दिवेद निन्दादर्शना द्वेदविरुद्धश्च सोयम् प्रतिषेधः तस्मात् चकारोन्य दूषणा-नामपि समुच्चयार्थः ॥ ४५ ॥

## इति श्रीमत्परमहंसपरिव्राभकाचार्यानन्दात्मज पूज्यपाद शिष्यस्य श्री शंकरानन्द भगवतः कृतौसूत्रदीपिकायां द्वितीयाऽध्यायस्य द्वितीयः पादः ॥ २ ॥

द्वितीयेपादे स्वतंत्रतर्काणां परस्पर विरोधान्नतैर्विरोधः समन्वयस्येत्युक्तं तृतीयेनतु पादेन भूतश्रुतीनां भोक्तृ श्रुतीनांच परस्परविरोधः परिह्रियते तथापि भोक्तृत्वस्योपाधि कत्वादुपाधिषु चाकाशस्य पूर्वोत्पत्तिश्रवणात् प्रथमं तद्विषयाणां विरोध परिहारार्थं माचिष्यते ॥

## नाविपदश्रुतेः ॥ १ ॥

वियदाकाशं नजन्मवत् छान्दोग्येतस्य जन्मनोऽश्रुतेः ॥ १ ॥

## अस्तितु ॥ २ ॥

तुशब्दो वियतो शुत्पत्ति वारणार्थः कुतः अस्तितैत्तिरीयके आत्मनआकाश श्रुतिर्यतः ॥ २ ॥

## गौण्यसंभवात् ॥ ३ ॥

आकाशोत्पत्ति श्रुतिर्गौणीकुतः तस्यसमवाय समावायि कारणस्या काशपरमाणु तत्संयोगानाम सम्भवात् शब्दगम्येर्थे किमसम्भवि नेत्यत आह ॥ ३ ॥

## शब्दाञ्च ॥ ४ ॥

अन्तरिक्षं चैतदमृत मित्यादौ चकारो वेदेपियुक्ति समुच्चयार्थः एकस्य-संभव पदस्यैकस्मिन् वाक्येकथं गौणत्वं मुख्यत्वं चेत्यत आह ॥ ४ ॥

## स्याच्चैकस्यब्रह्मशब्दवत् ॥ ५ ॥

एकस्यापि संभवपदस्य गौणार्थता काशेषन्त्येषु मुख्यताब्रह्म शब्दस्यतपो ब्रह्मेतिषु गौणार्थता परस्मिन् मुख्यार्थतैवंस्यात् भवेत् सिद्धांत माह ॥ ५ ॥

## प्रतिज्ञाऽहानिरव्यतिरेकाच्छब्देभ्यः ॥ ६ ॥

नवियदुत्पत्ति श्रुतिर्गौणी कुतः कार्यकारणयो रव्यतिरेकाद भेदात् आकाशस्योत्पत्तौ ब्रह्मणस्तयोरभेदःस्यात्तथाप्रतिज्ञाहानिःप्रतिज्ञायायेनाश्रुतं-श्रुतमित्यादेरहानिरपरित्यागः कार्यकारणाभेदेन प्रतिज्ञाया अहानिरेव कुतोविवक्षितेत्यतःआह शब्देभ्यःयेनाश्रुत मित्यारभ्यऐतदात्म्यमिदं सर्वमित्यंतं छान्दोग्य शब्दः एवं सर्वश्रुतिभ्यः तथापि तर्क विरोध इत्यत आह ॥ ६ ॥

## यावद्विकारन्तु विभगोलोकवत् ॥ ७ ॥

यथालोके घठादीनां भेदेन कार्यत्व मन्तरेणास्तिच कालादिभ्यो भेदमा-काशास्य तस्मात् घटादिवत्कार्यः पूर्वाधि करणे यथैक विज्ञानेन सर्वविज्ञान प्रतिज्ञयान गौणीत्युक्तं तद्वत् सेपानस्त मितादियता यद्वायुरित्यादिका वायोर्नित्यत्वादि प्रतिपादिका श्रुतिः मगौणीति दृष्टान्तेना चिप्याति देशेन समाधत्ते ॥ ७ ॥

## एतेनमातरिश्वाव्याख्यातः ॥ ८ ॥

एतेनाकाशोत्पत्ति कथनेन मातरिश्वा वायुरुत्पत्ती व्याख्यातः कथितः पूर्वाधि करणे यथाकारणास्या प्याकाशस्य कार्यत्वमुक्तं तद्वदिहापि कारण-स्यापि ब्रह्मणः कार्यत्वमिति दृष्टान्तं नाचिप्यसमाधत्ते ॥ ८ ॥

## असंभवस्तु सतोनुपपत्तेः ॥ ९ ॥

तुशब्दो ब्रह्मणउत्पत्ति शंकानिरा करणार्थः सतोब्रह्मण उत्पत्ते रसंभवः कुतः नचास्यकश्चित् जनिता इत्यादिश्रुतेः युक्तितश्चतत्कारणस्या नुपपत्तेः पूर्वाधि करणे कारणस्या नभ्यस्तत्वमुक्तं तेनैवन्यायेन वायुस्तेजसः कारणमिति दृष्टांतेनाचिप्य समाधत्ते ॥ ९ ॥

## तेजोतस्तथाह्याह ॥ १० ॥

तेजोग्निरतोस्माद्वायुरुत्पादेय कुतः हियस्मात् तथाह श्रुतिर्वायो रग्निरिति पूर्वाधि करणे तेजसोवायुयोनित्वमुक्तम् अविरोधात् इत्तु तेजसो ऽव्ययोनित्वे विरोधः प्रत्यचइति प्रत्युदा हरणे नाचिप्याति देशेन समाधत्ते ॥ १० ॥

## आपः ॥ ११ ॥

आपोग्ने र्जायंतेहेतुः पूर्वसूत्रोक्तः अग्नेरापः इतिश्रुतेः पूर्वाधिकरणे वायोरिति पञ्चम्या अपादाने मुख्यार्थता स्वीकृता तद्वदत्र श्रुतेरपि मायादिषु मुख्यार्थत्वात् तेषामेव स्वीकार इति दृष्टान्ते नाचिप्य समाधत्ते ॥ ११ ॥

## पृथिव्यधिकाररूपशब्दान्तरेभ्य ॥ १२ ॥

अधिकारोमहा भूताधिकार: रूपंयत्कृष्णं तदन्नस्येति कृष्णं रूपंभन्नः पृथिवीति शब्दान्तरेभ्यः पूर्वाधि करणेधिकारादिभ्यः कार्यशब्दः कारणे नीतः इहतुभूता भिमानीनां देवतानां पारतन्त्र्ये हेतुरिति प्रत्युदाहरणे नाक्षिप्य समाधत्ते ॥ १२ ॥

## तदभिध्यानादेवतुतल्लिंगात्सः ॥ १३ ॥

तुशब्दः पूर्वपक्षव्या हत्यर्थः सपरमात्मा याकाशादि रूपतत्तद्विकारजातं सृजति कुतः तदभिध्यानात् तस्यविकारस्या भिध्यानं पर्यालोचनं तस्मात् अभिध्यानमपि भूतानामिव कुतोनस्या दित्यत आह तल्लिंगात् तस्यपरमात्मनीयः पृथिवी मन्तरायम यतीत्यादिना अन्तस्यलिंगंतस्यात्राभिध्यानं कैवलानामित्यर्थः पूर्वाधिकरणे पारतंत्र्यं देवतानां भूतानां तत्तिद्धर दित्युक्तं गतया प्रलयक्रमे किंचिद्विशामकमिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते ॥ १३ ॥

## विपर्ययेणतुक्रमोतउपपद्यतेच ॥ १४ ॥

तुशब्दः प्रलयउत्पत्ति क्रमनिवारणार्थः किन्तुभतोक्ता दुत्पत्ति क्रमाद्विपर्ययेण पृथिव्यप्सित्यादि क्रमतक्ष: उपपद्यतेयतः कार्यस्य घटादेः कारणेमृदादौ प्रलयस्य दृष्टत्वात् चकारो जगत्प्रतिष्ठा देवर्षइत्यादिस्मृति समुच्चयार्थः पूर्वाधि करणे दृष्टात् सारेणोत्पत्तेर्विपरीतः प्रलयेक्रम इत्युक्तं इदानी मुत्पत्तिक्रममेवाक्षिप्य समाधत्ते ॥ १४ ॥

## अन्तराविज्ञानमनसोक्रमेणतल्लिंगादिति चेन्नाविशेषात् ॥ १५ ॥

विज्ञानं बुद्धिर्मनः इन्द्रियंसंकल्प विकल्पात्मकं विवक्षितं विज्ञानंच मनश्च विज्ञान मनसीकेन क्रमेण जायमाने आत्माकाशयो रंतरा अंतराले जायेतेति

कुतस्तल्लिंगात् तस्यह्यन्तराल आत्मनो लिंगंभूतेभ्य: पूर्वमात्मानमै तस्माज्जायते प्राण इत्यादिना स्वरूप संकीर्त्तनं बुद्धेर्बुद्धिंतु सारथिं विद्धीत्यनेनेतिचेत् नैतत्कुत: अपि शेषात् नह्विपरमेश्वराज्जनिरितिक्रमो नियतुं शक्य: किंतुभौतिकानि नेतिविशेष: नचासावस्तीत्यर्थ: पूर्वाधिकरणे विशेषा श्रवणेन क्रमभंगोनिवारित: इदानीं विशेषा श्रवणेनैवोदा हरणत्वेन स्वंपदार्थस्यो त्पत्तिरित्याचिप्य समाधत्ते ॥ १५ ॥

## चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्त स्तद्भावभावित्वात् ॥ १६ ॥

जातोदेवदत्तो मृतोदेवदत इत्यादिव्यपदेशो जातकर्मादि संस्कारश्च नात्मनइति तुशब्द आहतर्हि किमात्मकोय मित्यत आह भाक्त: भक्तिर्गुणयोग उपचार इतियावत् तदाश्रवर्तत इतिभाक्त: कतर्हिमुख्य इत्यतआह चराचर व्यपाश्रय: स्थावरजंगम शरीराश्रयस्तस्यजन्म ादेर्व्यपदेश: स्यात्भवेत्कुतस्तद्भा- वभावित्वात् तस्य शरीरस्यभावीयस्यास्तिजन्मादिव्यपदेशस्यसंस्कारस्यापिसोयं तद्भा वभावीतस्य भावस्तत्त्वं तस्मात् अत:संस्कारोपि तदाश्रय: पूर्वाधि करणे क्षतनाशादि प्रसंगेन जन्मादि शब्दादेव विषया उक्तानेवं कल्पादौ परमेश्वरा दुत्पत्त्य मानजीवस्यकथन विरोधइति प्रत्यु दा हरणे नाचिप्य समाधत्ते ॥ १६ ॥

## नात्माश्रुतेर्नित्यत्वाच्चताभ्य: ॥ १७ ॥

नैवायामात्मा परस्मादात्मन आकाशादिव ज्जायते कुतस्त इदस्योत्पत्ते- रश्रुते: श्रोत्राद्युत्पत्तिवत् अस्त्वनुमेय मित्यतआह नित्यत्वात् चशब्दाद जन्यत्वादिभ्यश्च नित्यत्वा दिकमेवकुत इत्यत आह ताभ्य:ता: श्रुतयोन जीवो- म्रियते सवाएष महानज आत्मेत्याद्या: पूर्वाधि करणे जीवपरमात्मनो रैक्यादनुत्पत्ति जीवस्योक्ताइदानो मागंतुक ज्ञानत्वेन जीवस्यैक्य मेवानुप- पन्नमित्याक्षिप्याति देशेन समाधत्ते ॥ १७ ॥

## ज्ञोतएव ॥ १८ ॥

ज्ञोनित्यचैतन्य रूपोयमात्मा अतएवोत्पत्त्यसंभवादेव परमात्मवत् पूर्वाधिकरणे स्वयंप्रकाशत्वं जीवस्योक्तं तस्मानोवदणु परिमाणस्य नोपपन्नमिति तदर्थमणुत्वं समर्थयति ॥ १८ ॥

## उत्क्रान्तिगत्यागतीनाम् ॥ १९ ॥

उत्क्रान्ति रस्माच्छरी रादुत्क्रामतीतिश्रुतिः तासांश्रवणादणु परिमाणो जीवः ग्रामस्वाम्य निवृत्ति वदस्योत्क्रान्तिस्तत्र दर्शनेन गत्यागती अपित· चेत्यत आह ॥ १९ ॥

## स्वात्मनश्चोत्तरयोः ॥ २० ॥

उत्तरयो र्गत्यागत्योः स्वात्मनैव परिस्पन्दा धारेणैव निष्पत्तेः चकारेणो त्क्रान्ते रपि मुख्यायास्ते नैवनिष्पत्ते र्न दृष्टांतः ॥ २० ॥

## नाणु रतच्छ्रुते रितिचेन्ने तराधिकारात् ॥ २१ ॥

जीवोणुर्नकुतः अतच्छ्रुतेः तस्याणुत्वस्याप्रतिपादिकाश्रुतिरत च्छ्रुति तस्मादिति चेन्नकुत इतरस्य परात्मनो धिकारात् प्रकरणात्महानिति वदणुत्वस्या श्रवणादणु र्जीव इत्यत आह ॥ २१ ॥

## स्वशब्दोन्मानाभ्यांच ॥ २२ ॥

स्वस्याणुत्वस्य वाचकः एषोणुरितिस्व शब्दश्च उन्मानंच वालाग्र इत्यादिना भिहितं चकारो हृदया वस्थान समुच्चयार्थः अणुर्वे जीवः पदीरगस्य मस्तके- चन्दनस्य स्पर्शोपलंभनस्य युगपद्विरोध इत्यत आह ॥ २२ ॥

## अविरोधश्चन्दनवत् ॥ २३ ॥

अयं न विरोधोऽध: ऽविरोध: किम्व दित्यतआह चन्दनवत् यथा हरि चन्दन विन्दुरेकत्र त्वचा सम्बद्ध: सर्वं शरीर सुखायएव मणुरात्मापि ॥ २३ ॥

## अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ २४ ॥

चन्दन विन्दोर वस्थानं मस्तकादाव वस्थिति: तस्याविशेष: प्रत्यक्ष स्तद्विषयं विशेषस्य भावो वैशेष्य तस्मादिषमं न दृष्टान्तइति चेन्नकुत: जीवस्यदेहैक देशावस्थान स्याभ्युप गमात् तदेव कुत: हृदिह्येति श्रुते: न निरवयवे आत्मनिसावयव चन्दन विन्दुदृष्टान्त: नच चन्दनस्यापि सर्वं शरीर व्यापित्वमेक देशस्थस्य त्यतआह ॥ २४ ॥

## गुणाद्वालोकवत् ॥ २५ ॥

नानुभवापलापो युक्त इति वा शब्द: अणोरपि जीवस्य स्वचैतन्यात् गुणात् सर्वशरीर व्यापिता किंव दित्यतआह लोकवत् यथालोके घटाद्येक देशस्थानां मण्यादीना मणूनां स्वप्रभया घटादि व्यापित्वं तद्वत् ननु गुणस्या- श्रया द्व्यतिरेको दृष्टचर इत्यत आह ॥ २५ ॥

## व्यतिरेकोगन्धवत् ॥ २६ ॥

गुणिनं जीव मपरित्यज्यगुणस्य चैतन्यस्य वृत्तिर्व्यतिरेको नानुपपन्न: किंव दित्यतआह गन्धवत् यथा कैतक्यादि द्रव्यस्याति दूरस्यापि तद्गुणस्यान्यत्र वृत्तिस्तद्वत् अणोर्जीवस्यापि चैतन्य मप्रमाण शून्य मित्यतआह ॥ २६ ॥

## तथाचदर्शयति ॥ २७ ॥

हृदयायतनत्वमणु परिमाणत्वं चात्मनो विधायतस्यैवा लोमभ्य आनखाग्रेभ्य इति चैतन्येन गुणेन समस्त शरीरव्याप्तिन्दर्शयति यथा

स्वाभिरंगी कृतस्तथा चकारोजीवस्य व्यासत्वे भोगसङ्कर समुच्चयार्थः अणोमध्य इत्याद्या श्रुतिर्जीवस्य चैतन्यगुणेनव्याप्तिं शरीरस्य प्रकारान्तरेण या ब्रूते इति नाशक्यं ज्ञातु मित्यतआह ॥ २७ ॥

## पृथगुपदेशात् ॥ २८ ॥

अणोरात्मनः कर्तुर्वेतन्यस्य शरीर व्याप्ती प्रज्ञया शरीरं समारुह्येति पृथगुपदेशात् सिद्धान्तगुरः प्रधानं यस्यसतथा ॥ २८ ॥

## तद्गुणसारत्वात्तद्व्यपदेशः प्राज्ञवत् ॥२९॥

तुशब्दो जीवस्यस्वाभाविकाणुत्वनिरासार्थः कथन्तर्ह्यणुत्वमित्यत आह-तद्गुणसारत्वात् तस्याबुद्धेर्गुणा अणुत्वादयः सारोयस्यजीवस्यसतथातस्यभा- वस्तत्त्वं तस्मात्तत्रेयामणुत्वोत्क्रान्त्यादीनां श्रुत्यातद्व्यपदेशः उपाधिगुणेनोप-हितस्यकिंवदित्यतेश्चाह प्राज्ञवत् यथाप्राज्ञः परमात्मा उपाधेर्हृदयाकाश-दहरादे धर्मेणोपहितो दहरादिना व्यपदिश्यते दहरोस्मि न्नन्तराकाश इति श्रुतिः तद्वत् यद्यात्मा बुद्धिगुणसारस्तस्य कार्यत्वेन विनाशस्या वश्यंभावात् कृतं ब्रह्मज्ञानेन कृतार्थोवा सत्यवादिनः श्रुतुपद्दि तस्यात्मनो प्रतीतेरित्यतआह ॥ २९ ॥

## यावदात्मभावित्वाच्चनदोषस्तद्दर्शनात् ॥३०॥

यावदात्मनो जीव स्वभावः अहंब्रह्मास्मीति बोधा नुत्पत्तिदोषः ॥ ३० ॥

## पुंस्त्वादिवत्त्वस्यसतोभिव्यक्तियोगात् ॥ ३१ ॥

अंतः कारण सम्बन्धस्य सुषुप्ति प्रलययोः सतएवाभिव्यक्तिः प्रकटभावस्तस्ययोगा द्युक्तत्वात् किंवदित्यत आह पुंस्त्वऽदिवदिति यथाबाल्ये सतएव पुंस्त्वस्य यौवनेऽभिव्यक्ति स्तद्वत् मनुबुद्धिरूपान्तः करणे किं प्रमाणं यत्प्रयुक्तः संसारः स्यादित्यतआह ॥ ३१ ॥

## नित्योपलब्ध्यनुपलब्धिप्रसङ्गो ऽन्यतरनियमोवान्यथावा ॥ ३२ ॥

यद्यात्मः करणाभावे स्फीतालोक मध्यवर्तिनः चक्षुरादिसदोपलंभस्यविकृष्टस्यघटादेर्नित्यंसदोपलंभस्यप्रसंगः स्यात्चथैतावतात्मनो प्रसंगःस्यात् नित्यमुपलब्धिर्वा नुपलब्धिर्वा नित्योपलब्ध्यनुपलब्धीतयोः प्रसङ्गेनपुनः कदाचिदुपलम्भः अथवायमप्यसुतर्ह्यन्यतरनियमः अन्यतरस्यात्मनोऽविक्रियस्य दृक्छक्तेरिन्द्रियस्य वा पूर्वोत्तर क्षणे समागरूपस्य नियमनं नियमः प्रतिबन्धः कल्पतेनै तत्द्वयमपि युक्तं वा शब्दः प्रत्यक्षस्या नुपलम्भ प्रोच्यर्थः पूर्वाधिकरणे बुद्धगुपाधि निमित्तं विरुद्धधर्मत्व मित्युक्तम् तद्गपाधेरेव कर्तृत्व मित्याक्षिप्य समाधत्ते ॥ ३२ ॥

## कर्ताशास्त्रार्थवत्त्वात् ॥ ३३ ॥

अयञ्जीवः कर्ताकुतः यजतीत्यादि शास्त्रस्यार्थः प्रयोजनं यस्यास्तिस शास्त्रार्थवान् तस्यभावस्तत्त्वं तस्मात् नचप्रयोजना भावेन तर्कमात्र साधक मित्यतआह ॥ ३३ ॥

## विहारोपदेशात् ॥ ३४ ॥

विहरणंविहारः क्रियातस्याः सईयत इत्यादिनो पदेशात् अथापिनोपनिपत्सु कर्तृत्वे न तर्क इत्यतआह ॥ ३४ ॥

## उपादानात् ॥ ३५ ॥

विज्ञानेन विज्ञान मादाये त्यादिना प्राणाना मुपादानाङ्गी कारात् तर्कात्कर्तृत्व मंस्यएतस्याः क्रियाया उपचारादपि कर्तृत्वंस्या दित्यतआह ॥ ३५ ॥

## व्यपदेशाच्च क्रियायां नचेन्निर्देश विपर्ययः ॥ ३६ ॥

क्रियायां लौकिक्यां च विज्ञानं यज्ञन्तनुते कर्माणि तनुतेपि चेति श्रुतेश्च कर्तृत्वस्य व्यपदेशाच्च यदि विज्ञानशब्देन कर्तानाभिमतः किन्तुकरणंबुद्धिः तदानिर्देशस्य विज्ञान मित्यस्य विज्ञाने नेति विपर्ययः स्यात् कर्तृत्वंनाम स्वातन्त्र्यम् तथा च कथमयं बुद्धिमान् स्वस्या निष्टंकुर्या दित्यतआह ॥ ३६ ॥

## उपलब्धिवदनियमः ॥ ३७ ॥

यथोपलब्धिं स्वतन्त्रोप्य निष्टाङ्करोति तद्वदतएव नायमपि नियमः स्वतन्त्रोना निष्टङ्करोतीति विज्ञानं यज्ञंतनुतइति विज्ञानस्यैव कर्तृत्वं यद्‌ः श्रावयति सांख्याश्च तथैवविज्ञान शब्द वाच्याया कैवलायांबुद्धेः कर्तृत्वमङ्गी कुर्वन्तितस्याः सर्वार्थ कारित्वात् शास्त्रार्थं वस्त्रादिकं सर्वंपुरुष चरितकर्तृत्व मापादयती त्यतआह ॥ ३७ ॥

## शक्तिविपर्ययात् ॥ ३८ ॥

बुद्धेः कर्तृत्वे वर्णित न्यायेन कारणान्तरा पेक्षयावश्यं भावेन करणशक्ते र्बुद्धेः कर्तृत्वशक्ति रितिशक्ति विपर्ययो दोष स्तस्मात्र बुद्धिःकर्त्रीनायं शक्तिविपर्ययी दोषः पुरुषस्या संगोदासी नत्वात् बुद्धेरेव बन्धमोक्षा वित्यतआह ॥ ३८ ॥

## समाध्यभावाच्च ॥ ३९ ॥

समाधे रात्मावारे द्रष्टव्यं इत्यादि नोक्तस्य पुरुषे विद्या स्रात स्यापि कर्तृत्वस्याभावो वैयर्थ्यं न्मोक्षात् वा शब्दादनुभव विरोधादिकं समुच्चिनोति पूर्वाधिकरणे शास्त्रार्थवत्त्वेन कर्तृत्वमुक्तं इदानीं नतन्मिथ्या किन्तु तथ्यरूप मित्याक्षिप्य समाधत्ते ॥ ३९ ॥

## यथाचतक्षोभयथा ॥ ४० ॥

तक्षासूत्रधारः वास्यादि व्यापारे हस्तादि करणाक्षेप कर्ता यद्यपि वास्यादि परित्यागी हस्तादि मानपि तद्व्यापाररक्षा कर्ता यथा एवमात्मापि बुद्धिः करणाक्षेप कर्ता तदभावे स्वरूप चैतन्येना कर्तेत्युभयथाभवति चस्त्वर्थः एतावत्यंशे निदर्शने इत्यवधारणार्थः पूर्वाधिकरणे कर्तृत्वं मिथ्याभूत मित्युक्तं मोक्षे स्तस्य स्वातंत्र्याय तन्मिथ्येत्याक्षिप्य समाधत्ते ॥ ४० ॥

## परात्तुतच्छ्रुतेः ॥ ४१ ॥

तुशब्द ईश्वरानपेक्षां वारयति परात् परस्मात् कर्तृत्वमुक्तं जीवस्य कुतस्तच्छ्रुतेः तस्यसा पेक्षत्वस्य एषह्येव साधुकर्म कर्मका रयतीति तच्छ्रुतेः एवंचेदीश्वरः कारयति विषमो निर्घृणश्चस्या दित्यतआह ॥ ४१ ॥

## कृतप्रयत्नापेक्षस्तुविहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ ४२ ॥

तुशब्दो वैषम्यनैर्घृण्य वारणार्थः तन्निवारणं कुत इत्यतआह कृत प्रयत्नापेक्षः कृतो जन्मांतरे प्रयत्नस्तस्या पेक्षायस्य सोयंकृत प्रयत्नापेक्षः तदेवकुत इत्यतआह विहित प्रतिषिद्धा वैयर्थ्यादिभ्यः विहितं यावज्जीव मग्निहोत्रं जुहोतीत्यादि प्रतिषिद्धश्च नसुरांपि बेदित्यादि तयोरवैयर्थ्यम आदिशब्देन पुरुषकारादीनामपितेभ्यः पूर्वाधिकरणे ईश्वरा त्कर्तृत्वमुक्तम् इदानी मीश्वरी जीवाभेदादि नादुर्भयं इतिसएव नास्तीत्या क्षिप्यतदंशस्य जीवस्य सत्त्वेनांशि नमीश्वरं साधयति ॥-४२ ॥

## अंशोनाना व्यपदेशादन्यथाचापिदाशदा सकितवादित्वमधीयतएके ॥ ४३ ॥

जीवो ब्रह्मणो ंशः कुतः नानाद्रष्टव्य इत्यादि भेदो द्रष्टव्यत्वादिभेदः

तस्यैव देशस्तस्मात् महुचायं नानाव्यपदेशः सुतरां स्वामिभृत्य सारूप्ये युज्यत इत्यतआह अन्यथाचापीति अन्यथापि व्यपदेशो भवति प्रकृतादन्यथा त्वमनान्दात्वं तस्य तत्व मसीत्यादि नाएके आथर्वणिका ब्रह्मदाशा इत्युपक्रम्य ब्रह्मेमेकि तवा इत्यधीयते चकारः पद्यान्तरे तुल्यश्चि समुच्चयार्थः अन्यश्च मन्त्राद्य भावादिद मभ्ययम मतात्पर्यंव दित्यतआह ॥ ४३ ॥

## मन्त्रवर्णात् ॥ ४४ ॥

एतावानस्य महिमेत्यस्मात् अस्यमन्त्रार्थः क्वचित् श्रुतौनप्रतीयते तृतीय मुपेक्षणीय इत्यतआह ॥ ४४ ॥

## अपिचस्मर्यते ॥ ४५ ॥

गीतासुच ममैवांश इत्यादिनास्मर्यतेअपिशब्दो मन्त्रार्थां स्मरण मप्रयोजक मपीत्याह यदिजीव परमात्मनो रंशांशिभावः तर्हिंजीवो दुःखीत्यादिना परमात्मनोपि दुःखित्वा दित्यतआह ॥ ४५ ॥

## प्रकाशादिवन्नैवंपरः ॥ ४६ ॥

यथाजीवो दुःखित्वादिगुणः नैवम्परः परमात्मा किंवत्तद्‌था भाव इत्यत आह प्रकाशादिवत् यथा सौरादि प्रकाशोऽङ्गुल्यादि प्रादेशएव वक्रत्वक्ला- दिमान् आदिशब्देन घटादिप्रदेशआकाशोधूमादिमान् नपुनः प्रकाशदेश आकाशादेशो वातद्वत्न युक्तिमात्रेण श्रुतांशवच मित्यतआह ॥ ४६ ॥

## स्मरन्तिच ॥ ४७ ॥

तत्रय: परमात्माहि सनित्योनिर्गुणः स्मृत इत्युपक्रम्य कर्मात्मात्वं परोयोसा वित्यादिनाच शब्दान्समा मनन्ति तद्वत्द्वासुपर्णे त्यादिनामा भूत् दुःखित्वादि परमात्मन स्त्वशापि जीवस्यापि परमात्मत्वात्र विधिप्रतिषेधौ इत्यतआह ॥ ४७ ॥

## अनुज्ञापरिहारौदेहसम्बन्धात् ज्योतिरादिवत् ॥ ४८ ॥

अनुज्ञा ऋतौभार्या मुपेया दित्यादिका सुरांन पिबेति परिहारादेहस्य सम्बन्धो देहसम्बन्ध अहंमनुष्य इत्याद्य भिमानस्तस्मात् स्वभाविनयो यस्यन-धर्मः सोन्यसम्बन्धा द्भवतीत्यतआह ज्योतिरादिवत् यथा ज्योतिरादि स्वभावतः प्रशस्तं सूर्यादिगतमप्रशस्त मादिशब्देन भूमिं वैदूर्यादि रूपाप्रशस्ता प्रेतशरीरादि रूपाप्रशस्ता प्रेतशरीरादि रूपाऽप्रशस्ता एवंपरमात्मा प्युपाधि विशेषसम्बन्धा द्विधि प्रतिषेध भागपिन भवतीत्यर्थः तथापि स्वामिन एकत्वात् फलस्य दुःखादेः सर्वशरीरे ष्वेकत्वं स्या दित्यतआह ॥ ४८ ॥

## असन्ततेश्चाव्यतिकरः ॥ ४९ ॥

न सन्ततिर सन्ततिः अंतः करणो पाधिकस्य कर्तुर्भोक्तु र नेकत्वात् न सुखदुःखादेः सर्वशरीरेषु व्यतिकरः चकारो घटाकाशादि निदर्शनं समुचि-नोति एवंचद्वैतापत्ति रित्यतआह ॥ ४८ ॥

## आभासएवच ॥ ५० ॥

जल सूर्यकादि वदाभासएवायं जीवोनवस्वन्तरं परमात्मनः चकारस्तस्या सत्वमपि वारयति एवंकल्पनातो बहवश्चात्मानः सर्वगताः सन्तितेष्वपि सुखदुः-खादि नियमो दृष्टवशा दित्यतआह ॥ ५० ॥

## अदृष्टानियमात् ॥ ५१ ॥

बहूनामात्मनांमनः संयोगेसाधारणेसति अस्यैवादृष्टमित्यस्या दृष्टस्य न नियमस्तस्मात् बह्वात्म स्वीकारो न साधुस्तत्र प्राणिकादीनां नियामकत्व मित्यतआह ॥ ५१ ॥

## अभिसन्ध्यादिष्वपिचैवं ॥ ५२ ॥

अभिसंधिर भिप्रायो ध्यानमादि शब्देन इच्छादय स्तेष्वप्येव मनियमो यथादृष्टस्य चकारोस्या: कल्पनाया: श्रुतिविरोधं समुच्चिनोति ॥ ५२ ॥

## प्रादेशादितिचेन्नान्तर्भावात् ॥ ५३ ॥

सर्वगता नामपि सर्वेषामात्मनान्तत् तद्देहस्य प्रादेशात् परिच्छेदात् ध्यानादीना मुत्पादइति चेन्नकुत: सर्वेषामप्य कस्मिन्देहेन्तर्भावात् ॥ ५३ ॥

## इति श्रीमत्परमहंस परिव्राजकाचार्या नन्दात्मज पूज्य पादशिष्य श्रीशङ्करानन्द भगवत:कृतौ सूत्रदीपिकायां द्वितीया-ध्यायस्य तृतीय:पाद: ॥ ३ ॥

तृतीयेपादे भूतश्रुतीनां भोक्तृ श्रुतीनांच परस्पर विरोधापा करणेन तत्कृतंविरोधं समन्वये वारयति चतुर्थेन पादेन तथापि भोगोपकरणानां भौतिकानां प्रधान्यात् प्रथमं प्राणोत्पत्तिमाह ॥ ३ ॥

## तथाप्राणा: ॥ १ ॥

पूर्वं पादाधि करणे यथा काश उत्पन्न: परस्मादित्युक्त तथा प्राणा अपि उत्पद्यंते अथवा यथा लोकादय: परस्मादुत्पन्ना: श्रूयंते तथा प्रणा ऋषयो वावतदग्रे सदासोदित्यनया श्रुत्या प्राणा नामनुत्पत्ति स्तदुत्पत्ति गौणीस्या-दित्यत आह ॥ १ ॥

## गौण्यसंभवात् ॥ २ ॥

गौण्यां असंभवो गौण्य संभवस्तस्मात् प्रतिज्ञाद्दष्टान्यादय: प्रागुक्ताएव हेतव: तथापि जनेरुपचार निवारणं किमुक्त मित्यत आह ॥ २ ॥

## तत् प्राक्श्रुतेश्च ॥ ३ ॥

तेभ्य आकाशादिभ्यः प्राक् पूर्वं जायतइतीदं यथा तेषुनोप चरितं तथा प्राणेष्वपीत्यर्थः तथापि छांदोग्येन तेषा मुत्पत्तिः श्रूयते इत्यत आह ॥ ३ ॥

## तत्पूर्वकत्वाद्वाचः ॥ ४ ॥

नाम प्रकृतिकं यत्तेजः तत्पूर्वकत्वात् कारणात् वाचोवागाख्ये न्द्रिय प्राणस्यातोऽर्थात्तत्रापि श्रवणमित्यर्थः पूर्वाधि करणे श्रुति प्रामाण्यात् प्राणो-त्पत्तिर्वर्णितातद्दत्सप्तवैशीर्षण्याः प्राणाइत्यस्याः प्रामाण्याक्षप्तैव प्राणाइत्या क्षिपतिअथवान्यायानु सारात् प्राणा नामुत्पत्तिरुक्ता अत्रापिप्राणमुत्क्रामंतं सर्वाइतिलाघव न्यायात् सप्तप्राणा इत्याक्षिपति ॥ ४ ॥

## सप्तगते र्विशेषितत्वाच्च ॥ ५ ॥

सप्तसंख्या नामवगतिः सप्तप्राणाः प्रभवंतीत्यस्मात् सामान्य वचन मिदं विशेषा दधिका भविष्यंतीत्यत आह विशेषि तत्वादपि तेषां सप्तवै शीर्षण्या इत्यने न ॥ ५ ॥

## हस्तादयस्तुस्थितेऽतोनैवम् ॥ ६ ॥

तुशब्दः सप्तभ्यो व्यतिरेक माह सएवकुत इत्यत आह हस्तादयः हस्त आदिर्येषांते त्वगादयो हस्तादयः हस्तोवैग्रह इत्यादि नोक्ताः स्थितः सप्तभ्यो व्यतिरेकः अतोस्मादतिरेकात् नैवं सप्तैवे तिकिंत्वे कादश कुतः दशेमेपुरु-षेप्राणा इत्यादिश्रुतेः अथवा सर्वैव प्राणा अवगम्यंते तमुत्क्रामंत मित्यादि वचनात् ननु सर्व शब्द श्रवणे कथं सप्तैवेत्यत आह ॥ ६ ॥

## विशेषिताच्च ॥ ७ ॥

मनो विज्ञानयो रेककोट्या चक्षुरादीनां विशेषितत्वा दयं शब्दः सप्त विषयः चकारो ऽनियतान्नियतिः ये इतिन्याय सूचनार्थः द्वितीय चेन सूक्तोपि

विशेषः पूर्वस्मादशाख्यानात् पूर्वाधि करणे एकादशें द्रियाणि उत्क्रामन्तीत्युक्तं तदयुक्तं व्यापित्वादिं द्रियाणा मित्याक्षिप्य समाधत्ते ॥ ७ ॥

## अणवश्च ॥ ८ ॥

प्राणा इत्यनुवर्तते अणवोप्य सर्वगत परिमाणाः प्राणा इत्यर्थं पूर्वाधि करणे उत्क्रांत्यादिश्रवात् प्राणानामणुत्व मंगी कृतं तद्वदिदानी मुत्पत्तेः प्राक् प्राणचेष्टाश्रवणात् मुख्यप्राणस्यनोत्पत्तिरिति दृष्टांते नाक्षिप्य पादाद्याधि करण प्रायति देशेनोत्पति माह ॥ ८ ॥

## श्रेष्ठश्च ॥ ९ ॥

श्रेष्ठः मुख्यो प्राणः सोपि जायतेकुतएतस्माज्जायतेप्राण इति श्रुतेः पूर्वाधि करणे मुख्ये प्राणस्य पृथगुत्पत्तिर्वायोरिंद्रिये भ्यश्चोक्ता साऽयुक्ता मुख्य प्राणस्य वायु स्वरूप त्वादिंद्रिय त्वाद्वे त्याक्षिप्य समाधत्ते ॥ ९ ॥

## नवायुक्रिये पृथगुपदेशात् ॥ १० ॥

मुख्यप्राणेनवायुः प्रसिद्धः नच करणानां वृत्तिः क्रियाच वायुश्च वायुक्रिये कुतस्ताभ्यां पृथगुपदेशः सवायुना ज्योतिषेतिवायोरिंद्रियेभ्यः पृथ क्एवायं मुख्यः प्राण इत्यादिना तस्मात् एवंचे जीवः ॥ १० ॥

## चक्षुरादिवत्तु तत्सह शिष्ट्यादिभ्यः ॥ ११ ॥

तुशब्दः प्राणस्यस्वातं त्र्यवारणार्थः चक्षुरादिवत् चक्षुरादीनां यथा नस्वातं त्र्यं तद्वत्प्राणस्य कुतःतत्सह शिष्ट्यादिभ्यः तैरिंद्रियैः सहशिष्टिः शासन मुपदेशः प्राण संवादादौ आदि शब्देन संहत त्वाचेतनत्वा दयस्तेभ्य स्तादे तत् यथान्येषां प्राणानां रूपादयो विषया स्तथा स्यापिकश्च नस्यादित्यत आह ॥ ११ ॥

## अकरणत्वाच्चनदोषस्तथाहिदर्शयति॥ १२॥

प्राणस्य विषयांतरा सत्त्वं न दोषः कुतः अकरणत्वात् करणस्ये वार्यदोषः नत्व करणस्य चकारी देह धारणं प्रयोजनं समुच्चिनीति कथमे तदित्यतयाह तथाहि दर्शयति श्रियस्माद्यथास्माभि कत्नस्तथाहमे वैतम् पंचधात्मानं प्रविभज्ये त्यादि श्रुतिगणी देह धारणंदर्शयति चकारी यदस्ति तस्य विषय कल्पन भवति नियमाभाव दर्शनार्थः देह धारणं कार्ये जीवस्य प्राणस्यवेति संदेहा दन्यस्य प्राणकार्यस्या दर्शनात् निरर्थकः प्राणइत्यत आह ॥ १२ ॥

## पंचवृत्तिर्मनोवद्व्यपदिश्यते ॥ १३ ॥

पंचवृत्तयो यस्यस तथा किंवत् पंच वृत्ति रित्यत आह मनोवत् यथा मनः प्रमाण विपर्यय विकल्प निद्रास्मृतिभिः पंचवृत्ति तद्वत् तर्हियोगाना मिवतर्क मूल मिद मित्यत आह व्यपदिश्यते श्रुत्या प्राणो पानोव्या नसुदानः समान इति पूर्वाधि करणे वायुक्रियाभ्यां तत्त्वांतरं प्राण इत्युक्तं अस्तुतत्त्वांतरं तथापि तस्य जीवमनूत्क्रामस्या संभवोव्यापित्वादित्या चिप्यसमाधत्ते ॥ १२ ॥

## अणुश्च ॥ १४ ॥

मुख्य प्राणोप्य सर्वगत परिणामीपि पूर्वं प्राणवत् पूर्वाधिकरणे ष्विंद्रियाणा मुत्पत्त्यादिकं तेषां चाग्न्याद्यधिष्ठितत्वं श्रुतं मनुपपन्नं समनंतराधिकरणे प्राणमस त्ववदिति दृष्टांतेनाचिप्य समाधत्ते ॥ १४ ॥

## ज्योतिराद्यधिष्ठानंतुतदामननात् ॥ १५ ॥

तुशब्दः प्राणस्याधिष्टा नत्वं वारयति ज्योतिरादि येस्यादित्या देस्तदिदं ज्योतिरादि ज्योतिरादे रधिष्टानं ज्योतिराधिष्ठानं वागादि तस्य ज्योतिराद्यधिष्टानस्य वागादेरग्नि र्वाग्भूत्वेत्या दिनाऽमननात् एवंचेद्वाना मैवसुखादि भोगःस्या दित्यतआह ॥ १५ ॥

## प्राणवताशब्दात् ॥ १६ ॥

प्राणवता जोवेन वागादीनां संबंधोभोक्तृ तत्साधनत्व लक्षण: कुत: शब्दात् वैदिकात् अथयनैतदा काशमनु विषक्तं चक्षुरित्यादि: यथा शरीरेण संबंध: तथाधिष्ठा नाधिष्टातृत्व लक्षणस्ताभिर पीत्यत आह ॥ १६ ॥

## तस्यच नित्यत्वात् ॥ १७ ॥

तस्य शरीरस्य नित्यत्वात् अस्मिन् शरीर एवभोक्तृत्वात् नदेदं तात्मना-ग्नींद्रादि शरीर भोगस्य सत्वात्तासाम् चकारो नेकदु:ख संभिन्नस्यास्य भोगस्य देवता भिन्नभोग्यत्वं समुचिनोति पूर्वाधि करणे ज्योतिराद्यधिष्ठिता नींद्रियाणि इत्यु क्त मिदानीं प्राणव्या पारव्यतिरिक्ता नींद्रियाण्येवत संतो-त्याचिख्याह अथवा प्राणेंद्रि यस्याचलाधिष्ठाना भाववदन्यत्राप्य भाव:स्यादि-त्याचिख्यप्राणस्या निंद्रियत्व माह ॥ १७ ॥

## तइंद्रियाणितद्व्यपदेशादन्यचश्रेष्ठात् ॥१८॥

ते प्रकृता: प्राणा: श्रेष्ठादन्यत्र मुख्यप्राणं विहायेंद्रियाणि नतु मुख्यस्य प्राणस्य रूपाणि कुतस्तस्मात् प्राणात्तुभेदे नेंद्रियाणां व्यपदेशात् एतस्माज्जायते प्राणोमन: सर्वेन्द्रियाणि चेत्यनेन वस्तुतेषां प्राणात् भेद: नतु प्राणस्तेभ्योभिन्न इत्यत आह ॥ १८ ॥

## भेदश्रुते: ॥ १९ ॥

अथ हेममासन्यं प्राणमूचुरित्यादिना प्राणस्तेभ्यो भेदश्रुते: भेदश्रुति रियंवाक् चक्षुषोरिव भविष्यतीत्यत आह ॥ १९ ॥

## वैलक्षण्याच्च ॥ २० ॥

सुषुप्तं सर्वेन्द्रियाणां प्रविलय: नप्राणस्य प्राणास्मयएवै तस्मिन् जाग्रतीति श्रुते: प्रत्यक्ष तथेंद्रियेभ्य. प्राणस्य वैलक्षण्यात् चकारोवाक् चक्षुषोरपि

कर्मेन्द्रिय ज्ञानेन्द्रिय कृतभेद समुच्चयार्थः पूर्वाधि करणे प्राण इंद्रियाणीति पृथङ्‌निर्देशात् तस्य च तेषां च तत्त्वांतर त्वमुक्तंतद् जीवेनेति श्रवणात् नामरूपयोरुत्पादनंजीवे न क्रियते इति दृष्टांते नाक्षिप्य समाधत्ते ॥ २० ॥

## संज्ञा मूर्ति क्लृप्ति स्तुचित्रत् कुर्वत उपदेशात् ॥ २१ ॥

तुशब्दो जीव कर्तृत्वं वारयति संज्ञा आदित्यादि रूपा मूर्तिः सितासित रूपासंज्ञा मूर्त्योः क्लृप्तिः कल्पनंनाम रूपव्याक्रिये त्रिवृत् कुर्वतः परमेश्वरस्य कुतः व्याकरवाणीत्युत्तम पुरुषोप देशात् अस्तुवह्निस्त्रिवृत् करणं यथा कथंचित् अंतस्त्रिवृत्करणं दुर्लभ मित्यत आह ॥ २१ ॥

## मांसादिभौमंयथाशब्दमितरयोश्च ॥ २२

पुरीषादीति वक्तव्येतस्यशरीरावहिःछस्यप्रदर्शनं यतस्तत् आह मांसादीति मांसमादि र्यस्यमनः पुरीषस्य तदिदं मासादिभौ मंभूमेर्विकारः यथाशब्दं शब्द मनतिक्रम्यास्य कार्यस्या भिधानात् तस्यः स्वविशेषातु रित्यादिना इतरयोरपांस्तेजसोरपि मूत्रलोहित प्राणास्थि मज्जावाचः कार्याणिअत आंतराणित्रिवृत् करणवच्चार्थः त्रिवृतकृतः कथंभूमिरिय मित्यादि व्यपदेश इत्यत आह ॥ २२ ॥

## वैशेष्यात्ततद्वादः तद्वादः ॥ २३ ॥

तुशब्दो भूम्यादिव्यपदेशा भावनिवारणार्थः तद्वादस्तस्य भूम्या देर्वादो व्यपदेशो नानुपपन्नः कुतः वेशेष्यात् विशेषस्य भावोवैशेष्यं भूम्याद्याधिक्यं तस्मात्तद्वादइत्यभ्यासोध्यायपरि समाप्तिसूचो तयतिवियत्यादे प्राणपादेच प्रथमं वियदाद्युत्पत्तिवादिन्यः श्रुत योनसंतीति विरोधा भावात् पूर्वपक्षाभाव इति पूर्वपक्षाक्षेपः अन्यच तच्छ्रुतीनां सत्वात् श्रुत्योर्विरोधात् प्रत्यधिकरण मुभयोर प्रामाण्यमिति पूर्वपक्षः सिद्धांतैकदेशिना तदप्रामाण्य निराकरणंयत

द्वितियस्तु: पूर्वपक्ष: सिद्धांतैकदेशिना निराकरणेन प्रकारां तरेण प्रामाण्य निराकरणमिति सिद्धांत: ॥ २४ ॥

## इति श्री मत्परमहंस परिव्राजकाचार्यानंदात्म पूज्यपाद शिष्यस्य श्रीशंकरानंद भगवत: कृतौ सूत्रदीपिकायां द्वितीयाध्यायस्य चतुर्थ: पाद: ॥

पूर्वस्मिन्नध्याये ऽविरोधो ब्रह्मणि समन्वितानां वेदान्तानामुक्त: इदानीं तत्प्राप्तिसाधनं ब्रह्मज्ञानं सोपायमिह चिंत्यते तत्रादि प्रथमपादे पंचाग्नि विद्यामाश्रित्य संसरणं चिंत्यते वैराग्यार्थम् ॥

## तदंतर प्रतिपत्तौ रंहतिसं परिष्वक्त: प्रश्ननिरूपाणाभ्याम् ॥ १ ॥

पूर्वशरीरा च्छरीरन्तरदन्तरं तस्य प्रतिपत्तौ प्राप्तौ भूतसूक्ष्मै: परिष्वक्तो रंहति कुत: प्रश्ननिरूपणाभ्यां प्रश्न: यथावेत्थ पंचम्या माहुतावाप इति पश्चात् उदाहृते प्रश्ननिरूपणे ऽप्वेष्टितत्वं गमयत: नतुतदन्यै र्भूतसूक्ष्मै: परिवेष्टितत्वं गमयत इतत्यआह ॥ १ ॥

## आत्मकत्वात्तुभूयस्त्वात् ॥ २ ॥

तुशब्दश्चोदित शंकानिवृत्त्यर्थ: नायंदोष: त्र्यात्मकत्वात् तेजोवन्नात्मकत्वादपां तदात्मकत्वे कुतोपांव्यपदेश इत्यत आह भूयस्त्वात्तासामपांसायं प्रातराहुतिमा रभ्ययावत्प्रभें भूयस्त्वात् नन्वाहुतिद्वारादृष्टेन संपरिष्वक्तो गच्छतीति गम्यति नतु भूतसूक्ष्मै रित्यतआह ॥ २ ॥

## प्राणगतेश्च ॥ ३ ॥

प्राणानांगतिः प्राणगतिः तमुत्क्रान्तमित्यादिनोक्ता तस्याः प्राणानां भूतसूक्ष्माश्रयाणामसर्वगति रित्यर्थः चकारः सएतास्तेजो मात्रा इत्यादि श्रुतिं प्रमाणत्वे न समुच्चिनोति ॥ ३ ॥

## अग्न्यादि गति श्रुते रिति चेन्न भाक्तत्वात् ॥ ४ ॥

अग्निं वागप्येतीत्यग्नि गतिः आदिशब्देनवातं प्राणा इत्यादिः तस्मान्-प्राणानामाश्रयत्वे न भूतसूक्ष्म मितिचेत् प्राणानां जीवेन सहगमनात् तत्रभाक्तत्वात् प्राणाना मग्न्यादि गति श्रुतिर्भाक्ता उपचरिता लोमभीर्लोमानीतिवत् तस्याभावो भाक्तत्वं यस्मात् ॥ ४ ॥

## प्रथमेऽश्रवणादिति चेन्नताएवह्युपपत्तेः॥५॥

प्रथमेग्नौ श्रद्धांजुहतीत्यस्मिन्नपाम श्रवणात्तासां सर्वथानुगति रिति चेत्तश्रद्धाएव आपएवहियस्मा दुपपत्तेः अपां कारणानां कार्यस्य शुद्धाख्य सद्भावः आपइति श्रुतेरपि ॥ ५ ॥

## अश्रुतत्वादितिचेन्नेष्टादिकारिणांप्रतीतेः

प्रश्न निरूपणाभ्यां जीवानाम श्रुतत्वाद प्याधिश्रितानां प्रश्न मयुक्तमिति चेन्नकुत इष्टादि कारिणां प्रथयइमे इत्यादिना दक्षिणमार्गेण चन्द्रंयियासतां प्रतीतेः तद्दिवान्नमिन्द्र तद्दर्शा भक्षयं तीतिश्रुतिः चन्द्रप्राप्तिर्नपुरुषार्थ इत्यत आह ॥ ६ ॥

## भाक्तंवानात्मवित्वात्तथाहिदर्शयति ॥ ७ ॥

तेषांदेवाना मन्नत्वंभाक्त मुपचरितंकुत अनात्मवित्वात् तेषां यथात्माभि-

स्तेषामभत्वं भोग्यत्वेनोक्तं तथा श्रुतिर्दर्शयति अथ योन्यामित्यादिना पूर्वाधिकरणे ऽवरोहेपि परिवेष्टितस्य पंचम्यामाहुतावाप इत्युपलंभा दारोहेपि कर्म समवायिनी भिरद्भिः परिवेष्टितो गच्छतीत्युक्तं इदानी मवरोहे कर्माभावादपा मप्यभाव इत्याचिप्य समाधत्ते ॥ ७ ॥

## कृतात्ययेनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवंच ॥ ८ ॥

कृतस्य पुण्यस्यात्यये विनाशे ऽनुशयवान् कर्मानुशयवान् तथा गच्छति दृष्टंजात मात्रस्य सुखाद्यवाप्तिः अथवा तद्यइह रमणीय चरणा इत्याद्या श्रुतिः स्मृतिरपि तच्छेषेणविशिष्ट मित्याद्याताभ्यां यथेतं यथागतं अनेवंच तद्विपर्ययेणापि आकाशादि रूपेण प्रकारांतरेणापि ॥ ८ ॥

## चरणा दितिचेत् नोपलक्षणार्थेति कार्ष्णाजिनिः ॥ ९ ॥

तद्यइह रमणीय चरणा इत्यंत्र चरणादागमनं नानुशयादिति चेन्न यतो ऽनुशयो पलक्षणार्था चरण श्रुतिरिति कार्ष्णा जिनि राचार्यो मन्यते ॥ ९ ॥

## आनर्थक्यमितिचेन्नतदपेक्षत्वात् ॥ १० ॥

तस्य चरण शब्दस्य श्रौतशीलार्थं परित्यागेनला क्षणिकानुश यस्वीकारे शीलस्यानर्थ क्यं प्रयोजन शून्यतैव स्यादितिचेत् नतद पेक्षत्वात् तस्य शीलस्यापेक्षा यस्य कर्मणः आचारहीन मित्यादि स्मृतेः तदपेक्षं तस्यभावस्तत्त्वं तस्मात् ॥ १० ॥

## सुकृतदुष्कृतएवेति तुवादरिः ॥ ११ ॥

वादरिराचार्य चरण शब्देन सुकृत दुष्कृतेएवाभि धीयेते इति मन्यतेतु

शब्दो लक्षण व्यावृत्त्यर्थः पूर्वाधिकरणे यावच्छ्रुतेरारब्धफलत्त विषयत्वेन संकोचः कृतस्ततोन्येन कर्मणावर्तंत इत्युक्तं मत्रतु चंद्रमसमेव तेगच्छंतीति सर्वश्रुतिस्तदत्र संकोच इति प्रत्युदाहरणे नाक्षिपति ॥ ११ ॥

## अनिष्टादि कारिणामपिचश्रुतम् ॥ १२ ॥

इष्टापूर्त्तादि व्यतिरिक्तं कुर्वंतीत्य निष्टादि कारिणोये तेषामप्य विशेषेण येकेचेत्युपक्रम्य चंद्र मसमेवते सर्वे गच्छंतीति श्रुतम् यतः अतश्चंद्र गमनं चकारोन्यौक्तिकत्व प्रदर्शनार्थः ॥ १२ ॥

## संयमनेत्वनु भूयेतरेषा मारोहा वरोहौ तद्गति दर्शनात् ॥ १३ ॥

तुशब्दो निष्टादि कारिणां चंद्रगतिं व्यावर्तयति संयमनेर्याम्ये पुरइतरेषामनिष्टादिकारिणांदुःखानु भवार्थं आरोहो दुःखमनु भूयावरोहः तावेवारोहावरोहौकुतः तद्गतिदर्शनात् तथाम्यंपुरं प्रतियागतिस्तस्याः पुनः पुनर्वश मापद्यते मेवैवस्वतं संगमनं जनानामित्याभ्यां दर्शनं सुपुरुषवचनविश्वासिनां नैतावता प्रत्यय इत्यत आह ॥ १३ ॥

## स्मरंतिच ॥ १४ ॥

स्मरंतिच व्यासादयः संयमनेगमनं तेषां चकारः प्रसिद्धि समुच्चयार्थः तथापिलोक पाल पुरे कथं दुःखित्वमित्यत आह ॥ १४ ॥

## अपिसप्त ॥ १५ ॥

नरकामहारौरव प्रभृतयः स्मर्यन्ते पौराणिकैः नतु नयमायत्तास्ते तेष्वपि चित्रगुप्तादीनां स्मरणादित्यत आह ॥ १५ ॥

## तत्रापि च तद्व्यापारा दविरोधः ॥ १६ ॥

तत्रापि तेष्वपि महारौरवादिषु तद्व्यापारात् तस्य यमस्य व्यापारः समाज्ञा तस्माद्यमायत्तत्वस्य चित्रगुप्तादीना मप्यविरोधः चकारः शंकायां मतिमंदत्वसूचनार्थः नतु मार्ग द्वयस्य प्रकृतत्वादन्यतरेण तैरपि गंतव्य मित्यत आह ॥ १६ ॥

## विद्याकर्मणोरितितु प्रकृतत्वात् ॥ १७ ॥

एतयोः पथोरिति विद्या कर्मणो र्ग्रहणमिति यस्मात्तयोः तद्य इत्थं विदुरिति विद्या इष्टा पूर्तेदत्त मिति कर्म प्रकृतत्वात् तेषां चतयोर भावादतो नान्यतरेण गमनंतु शब्दोजायस्वम्रिय स्वेत्यनेन तृतीयंस्थानं दर्शयति तथाप्याहुति पंचक पूरणार्थं चंद्र मसि तेषामपि गमन मित्यत आह ॥ १७ ॥

## नतृतीये तथोपलब्धेः ॥ १८ ॥

नायमाहुति नियमः तृतीयेस्थाने कुतः यूकादौ तथोपलब्धेः आहुति नियमस्या दर्शनात् तद्दृष्टान्तेन जीवांतरेपि सनियमोनुमीयते इत्यत आह ॥ १८ ॥

## स्मर्यतेपिचलोके १९

नायं मनुष्येष्वपि नियमः द्रोणद्रौ पद्यादीनां योनि मंतरेणापि शरीरस्योत्पत्ति दर्शनात् चकारात्पुराणेष्वपि तथापि क्वचिद् दृष्टभूयो दृष्टांतेन बाध्यते इत्यत आह ॥ १९ ॥

## दर्शनाच्च ॥ २० ॥

स्वेदजोद्भिज्जयोराहुति पंचकमन्तरेणाप्युत्पत्ति दर्शनात् चकारो नियमभंग समुच्चयार्थः ननुस्वेद जमेवनास्ति अंड जंजरायुजमुद्भिज्जमिति त्रयाणा मेव श्रवणादित्यत आह ॥ २० ॥

## तृतीयशब्दावरोधः संशोकजस्य ॥ २१ ॥

तृतीय शब्दउक्ति ज्ञमित्ये तस्मिन्न वरोधः स्वीकारः संशोकजस्य स्वे द- जस्य पूर्वाधिकरणे स्थानशब्दो मार्ग परत्वे न नीतः तृतीय मिति त्रित्वसंख्या योगात् तर्हि द्दष्टापिवायु र्भूत्वेत्यु त्तरथवा श्रुतादात्म्य श्रवणात् आकाश मित्यत्रापि अनुशायि नस्ते न सह तादात्म्य स्यादिति दृष्टांतेनाचिम्य समाधत्ते ॥ २१ ॥

## सभाव्यापत्तिरुपपत्तेः ॥ २२ ॥

तैराकाशादिभिः समनोभावः साभाव्य पूर्वाधिकरणे आकाशादि समान रूपतामनुशायिनः प्राप्नुवंतीत्युक्तं तर्हि आकाशादेः प्राकृत प्रलयांत मवस्थानादनु शायिनोपि तावदवस्थान मित्याचिम्य समाधत्ते ॥ २२ ॥

## नातिचिरेण विशेषात् ॥ २३ ॥

आकादि समान रूपताया जीवस्यनाति दीर्घेण कालेननिर्गमन मिति कुतः व्रीह्यादि भावात् अतो वैखलु दुर्निष् प्रपतर मित्यादि विशेषणात् पूर्वाधिकरणे तोवेखलु दुर्नि प्रपतर मिति तिलमाषादिष्वेव कथन विलंबो नाकाशादिष्विति उक्तं तर्हि जायंत इति विशेषा तिल काशादिष्वनु शायिनां जन्मस्या दिति दृष्टांते नाचिम्य समाधत्ते ॥ २३ ॥

## अन्याधिष्ठिते पूर्ववदभिलापात् ॥ २४ ॥

इह व्रीहियवा इत्यादावन्ये न तिलमाषाति जीवे नाधिष्ठितं अन्याधि- ष्ठितं तस्मिन्तच्छरीरा धिष्ठितएवानु शयो पूर्ववद्यथावा य्वादौ संश्लेषमात्रं तद्व्रीह्यादावपि कुतः तत्रापि सुकृत दुष्कृ ता दिव्यापार मंतरेण तद्भावापत्ते रभिलापा दुक्तत्वात् ॥ २४ ॥

## अशुद्ध मिति चेन्नशब्दात् ॥ २५ ॥

स्वर्गादव रोहिण: पशुहिंसा लक्षणमशुद्धं पापमस्तीति चेन्न पश्वादिहिंसाया वैदिकशब्दा दागताया अवगतत्वात् अस्तुव्रीह्या दिभावो विनापाप मित्यत आह ॥ २५ ॥

## रेत:सिग्योगोथ ॥ २६ ॥

अथव्रीह्यादि भावानंतरं रेत: सिचापियो गोरेत: सिग्योग: व्रीह्याक्षेत्यादिना बहुलत्वाक्‍डनाद्यवसरएव प्रवासितोक्तत्वाच्चतेन योग इति भाव: नन्वस्तु प्रवासो बहुत्वंवा अथापिकथनस्थित्वातेनयोगं यास्यतीत्यत आह ॥ २६ ॥

## योने: शरीरं ॥ २७ ॥

योनेरधि अनुशायिनां शरीरांतरं तद्यइह रमणीयचरणा इत्यादि श्रावयति शास्त्रंतेनेद मवगम्यते तृतीयस्थानिनामिव व्रीह्यादिभावो नानुशायिनां ॥ २७ ॥

## इति सूत्र प्रदीपिकायां तृतीयाध्यायस्य प्रथम:पाद: ॥

एवंप्रथमेनपादेनकर्मफलस्यपातापातरूपत्वं नवैराग्यं निरूपितम् इदानींविरक्तस्य तत्त्वंपदार्थविवेकायद्वितीय: पाद आरभ्यते जागरणाद्यवस्थायाउक्तत्वात् दुर्विवेकत्वाच तत्त्वमर्थस्य स्वप्रकाशत्वस्य स्वप्नावस्थाया मेव चोररीकृत्य पूर्वपक्ष माह ॥

## संध्ये सृष्टिराह हि ॥ १ ॥

जागरण सुषुप्तो: संधौभवं संध्यंस्वप्नस्थानं तस्मिन् रथादीनांसृष्टि: सत्येव कुत:हियस्मात् न तत्ररथा इत्युप क्रम्यपथ: सृजत् इत्यंते वाहनसुसृजत इत्याचित्र कर्ता कोयं लकार: अतएव सत्यमित्यत आह ॥ १ ॥

## निर्मातारं चैकेपुत्राद्यश्च ॥ २ ॥

एकेशाखिनोस्मिन्नेव संध्याने कामानां निर्मातार मात्मानमा मनंति-कामं कामं पुरुषो निर्मिमाण इति नन्वत एव मनोरथ मात्रत्वात् तेषाम-सत्त्व मित्यत आह पुत्रादयश्च कामा इति शेष: काम्यन्त इति कामा: यस्मात्पुत्र पौत्रादीनुपक्रम्यांतिकामा नामित्याह चाशब्दकार: प्राज्ञस्य कर्तुर-भावेपिकाष्ठ मात्र सत्त्वं समुचिनोति द्वितीयचकारो मनोरथानामपि सत्त्वं समुचिनोति द्वितीयचकारो मनोरथानामपि सत्त्व माह इदानीं सिद्धांत माह ॥ २ ॥

## मायामात्रं तु कार्त्स्न्येनानभिव्यक्त स्वरूप त्वात् ॥ ३ ॥

तुशब्दो रथादीनां सत्त्वं व्यावर्तयति कुत: तन्मायामत्रं मा येवस्वप्न दृष्टंयत: तदपि कार्त्स्न्येना नभिव्यक्त स्वरूपत्वात् देशत: शतयोजनादिना कालतो रात्रि दिनादिना हृदय पुण्डरीके संवत्सरादि रूपेण मुहूर्तमात्रं शयान: सर्वांश्च सभतेयत: चतो बाधराहित्ये ना नभिव्यक्त स्वरूपत्वात् अबाधितत्वे ना प्रतीयमा नत्वादित्यर्थ: मायामात्रत्वा त्तर्हि न कश्चित् स्वप्ने-परमार्थ: गंधोपीत्यत आह ॥ ३ ॥

## सूचकश्चहिश्रुतेराचक्षतेचतद्विद: ॥ ४ ॥

असत्योपि स्वप्न: सत्यस्यापि सूचकोभवतिहियस्मात् श्रुते: यदाकर्म सुकाम्येषु स्त्रियमित्यादे: पुरुषं कृष्णं कृष्णदन्तमित्यादेश्च स्वप्नात् सत्यार्थस्य श्रुते नायं सुत्यु क्तौर्थोस्यार्थ: कुत आचक्षतेच तद्विद: तंस्वप्नाध्यायं विदंतीत्यर्थ: आरोहणं गोवृषेत्यादिनाचाचक्षते कथयंति चाशब्दकार:प्रतिबिंबादीनां निद-र्शनत्व समुच्चयार्थ. द्वितीयचकार: आच्छादित कुमारी भुजस्फुरण समुच्चयार्थ: तथापि परमात्मना क्रियमाणत्वात् स्वप्नसृष्टे राकाशादिवत्सत्यता नचजीव परमात्मनो रैक्यं अन्यथा जीवस्य नित्यशुद्ध बुद्धत्वादिकं स्यादित्यत आह ॥ ४ ॥

## पराभिध्यानात्तु तिरोहितं ततोह्यस्य-बंध विपर्ययौ ॥ ५ ॥

ननित्य शुद्धत्वादिकं नास्ति किंतु तिरोहितं तर्हि प्रादुर्भाविनो पाय इत्यत आह पराभिध्यानात् परस्य परमात्मनोभि ध्यानान्नि दिध्यासनात् उत्पन्न साक्षात्कारस्य प्रदुर्भवति तुशब्द उपायांतरं वारयति कुतएतदित्याह ततोह्यस्य बंध विपर्ययौ हियस्मात् ततः परमात्मनः सकाशात् अस्य जीवस्य तदज्ञानाद्बंधः संसारःविपर्ययोमोक्षः तज्ज्ञानात् ज्ञात्वादेव मित्या दिश्रुतेः ननुजीवस्य त्परमात्मनो ऽभिन्नां शस्ततोनित्य शुद्धत्वादीनां नाति रोभावो पीत्यत आह ॥ ५ ॥

## देहयोगाद्वासोपि ॥ ६ ॥

वा शब्दो तिरोभाव निराकारणार्थः जीवेश्वरान्यत्व निहत्यर्थः सोपिति-रोभावोपि देहयोगादहं मनुष्य इत्याद्यभिमानात् पूर्वाधिकरणे प्रपंच मिथ्यात्वं वर्णयतात्वं पदार्थस्य स्वयंप्रकाशत्वं दर्शितं तत्पदार्थे नैक्याय तत्रे त्कास्यां चिदवस्थाया सुपलंभ्यं स्यात् तदा संभावितम् नतूपलभ्य मित्याशियाह ॥ ६ ॥

## तदभावोनाडीषुतच्छ्रुतेरात्मनिच ॥ ७ ॥

तस्य स्वप्नस्या भावस्तदभावः सुषुप्तिः सानाडीषु देहांतःस्थिता सुशिरा सुराभ्य लक्ष्यपुरी तद्देष्टिते ह्रदयेतदंतस्थात्मनि ब्रह्मणि अस्य जीवस्य चका-रात्पुरीतस्रब्धं एतत् त्रय मपि कुतइत्यत आह तच्छ्रुतेः तत्रस्पृष्टंनाडीसुसतो भवतिपुरीततिशेतेस्वमपीतो भवतीति नाडीपुरी तत् ब्रह्माख्यं श्रुते विंकल्पे-त्वन्यतर बाधः स्यात् ॥ ७ ॥

## अतः प्रबोधोस्मात् ॥ ८ ॥

;यस्मात्सुषुप्ति रस्मिन्नात्मनि भवत्यतोस्माद्धेतो रस्मादात्मनः प्रबोधोस्य

जीवस्यात आत्मान: प्राधान्यं पूर्वस्मिन्नधिकरणे ब्रह्मणि साभावापत्तिरुक्ता-जीवस्य इहतुतत्संपन्नस्य सुप्तावस्र तस्य प्रबोध: किंत्वन्यस्ये त्यनुपपत्त्या तामाक्षिप्याह ॥ ८ ॥

## सएवतुकर्मानुस्मृतिशब्दविधिभ्य: ॥ ९ ॥

यस्तु परमात्मनिशया नस्तस्मात् सएवनिर्गच्छति तुशब्दोन्यं वारयति कुत: कर्मानुस्मृति शब्द विधिभ्य: कर्मोत्थि तस्य शेषे ऽध्ययनादि: अनुस्मृति: पूर्वदिवस भोजनादि: शब्द प्रतिन्याय्यं प्रतियोनि मित्यादि विधिर्य्योतिष्टो मेनेत्यादि: तेभ्य: तस्यैवानुत्थाने कर्मादिकं नसिद्ध्ये दित्यर्थ: पूर्वाधिकरणे सैवमूर्छेति दृष्टांते नाक्षिप्याह ॥ ९ ॥

## सुग्धेर्धसंपत्ति: परिशेषात् ॥ १० ॥

सुग्धे मूर्छा प्राप्ते जीवेन सुषुप्तिवत् सर्वात्मना संपत्ति: कुत: परिशेषात् न जागरणस्वप्नौ हत्तिज्ञान रहितत्वान्नापि सुषुप्ति: गात्रकंपादीना सुपलंभा न्नापिमृति: पुनरुत्थानात् अत: प्रसक्तानां जागरणादीनां प्रतिषेधा दन्यत्रा प्रसक्तौ शिष्य माणायाऽर्ध संपत्ति: संप्रत्यय: सोयंपरिशेष: तस्मात्पूर्वाधि करणे ब्रह्मण्यर्ध संपत्तिरुक्ता जीवस्य सैवानुपपन्ना ब्रह्मण: सविशेष निर्विशेषत्वे ना नेकरूपत्वे ना निश्चित रूपत्वात् इत्याक्षिप्याह ॥ १० ॥

## नस्थानतोपिपरस्योभयलिङ्गंसर्वत्रहि ११ ॥

परस्य परमात्मन: स्वभावत उभयलिंग सुभयरूपं अस्थूलमनण्वित्यादि मनोमय: प्राणशरीर इत्यादिनस्थानतोपि पृथिव्यादि स्थानयोगादे रप्युभय-लिंगनकुत: हियस्मात् सर्वत्रसर्वेषु वेदान्तेषु अशब्दमस्पर्शम रूपमित्यादि नैकमेव ब्रूयते ॥ ११ ॥

## नभेदादितिचेन्नप्रत्येकमतद्वचनात् १२ ॥

नब्रह्मशब्दादि गुणकमेकलिङ्गं कुतश्चतुष्पात् षोडशकल मित्यादिना

परस्यब्रह्मणो भेदादिति चेत्कुतः यथायमस्यां पृथिव्यामित्यादिना प्रत्येकं प्रत्युपाधि मतद्वचनात् नन्वेकस्यां शाखायामिदं वचनंनात्मन्समा दरणीय मित्यत आह ॥ १२ ॥

## अपिचैवमेके ॥ १३ ॥

एवंभेददर्शन निन्दादिपूर्वकं मृत्योःसमृत्यु मित्युपक्रम्यनेह नानास्ति किंचनेत्य भेदमेकेशाखिन आमनन्ति अपिचशब्देना भेदएव युक्तोपिनतुनायं तर्कगम्योर्थः श्रुतेश्चोभयत्रविद्यमानत्वा दित्यत आह ॥ १३ ॥

## अरूपवदेवहितत्प्रधानत्वात् ॥ १४ ॥

हियस्मात् अरूपवदेवब्रह्मनतु सगुणमवमन्तव्यं कुतस्तत्प्रधानत्वात् तस्यारूपवतः प्रतिपाद्यत्वात् अस्थूल मनण्वित्यादि भिर्वाक्यैः एतच्चसमन्वय सूत्रेक्षितं एवंतर्हिसगुण प्रतिपादकानां वाक्यानांवै यर्थ्य मित्यत आह ॥ १४ ॥

## प्रकाशवच्चावैयर्थ्यात् ॥ १५ ॥

यथाप्रकाशः सूर्यादिः तत्तदङ्गुल्यादि ऋजुवक्रता मनुस्वयमपि ऋजुर्वक्रो वाएवमुपाधि भेदेनात्मनः सगुणात्व मतस्तद्वाक्यानामवैयर्थ्यं तस्मात्चकारी घटाकाशा दिनिदर्शन समुच्चयार्थः नन्वसत्यपि रूपांतर रहितेब्रह्मः प्रज्ञान घनइति श्रुतिराह तन्मनसः स्वैर्यार्थंरूपस्य प्रधान्य मित्यत आह ॥ १५ ॥

## आहचतन्मात्रम् ॥ १६ ॥

तन्मात्रं चैतन्यमात्रं रूपांतर रहितं ब्रह्मः प्रज्ञानघन इति श्रुतिराह चकारो नोरूपे मनसः स्थैर्यंवारयति नन्वियं श्रुति रेकरूपत्वंविधत्ते नपुना-रूपांतरं प्रतिषेधतीत्यतआह ॥ १६ ॥

## दर्शयतिचाथोअपिस्मर्यते ॥ १७ ॥

अथो यस्माद्रूपांतर प्रतिषेधं दर्शयति नेतीत्यादिनानायं प्रतिषेधो

लौकिक:यत:अर्थेपिनसत्तम् इत्यादिनाम भैवमित्यादिना यनतु प्रतीयमानो भेद: कथमतात्विक इत्यत आह ॥ १७ ॥

## अतएवचोपमासूर्यकादिवत् ॥ १८ ॥

यतएक रूपताखोक्तानानारूपत्वं निराकृतं अत्मादेवकारणात् प्रतीयमानस्य भेदस्योपमान भवति यथा जले सूर्यक: सूर्यप्रतिबिंब: आदि शब्देन चंद्र प्रतिबिंबादि तथाच श्रुतिषु यथा स्वयं ज्योतिरात्मे त्यादिषु एकएवेत्यादिषुचत दुपमीयते उपाधि भेदा दनेकत्व माचिपति ॥ १८ ॥

## अंबुवदग्रहणात्तु नतथात्वम् ॥ १९ ॥

यथांवु सूर्यमूर्ते र्व्यवहितं गृह्णाति एवमंवुव त्परमात्मनो भिन्न खोपाधि: परमात्मनोवा ऽमूर्तस्या ग्रहणात् न तथात्वं न सूर्यकादि समानतास्य भेद .. समाधत्ते ॥ १९ ॥

## वृद्धिह्रासभाक्त्वामंतर्भावात् उभयसामंजस्यादेवम् ॥ २० ॥

दृष्टान्तदार्ष्टान्ति कयोर्नसाम्यं लोकेपिकिमुतवेदेएकस्य कथं तिर्यगादि विचित्र रूपाणीत्यस्य समाधानार्थं सूर्यकादि दृष्टांतो विवचितैर्थं मुत्योक्त: विवचितंतु यथा जलद्वारा वृद्धिभाक्त्वम् जलस्य ह्रासेह्रासभाक्त्वम् तच्चलनादिभाक्त्वम् एकस्यापि तद्भे दात्भेद भाक्त्वमिति तदाह वृद्धिह्रास भाक्त्वमुपाधेरस्य कुत: उपाधीदेशादावन्तर्भावादह मित्याद्यभिमान क्रोडीकृतत्वात् कुतएतदि त्यत आह एव मुभयस्य दृष्टांतस्य दार्ष्टांतिकस्य सामंजस्यम् ननु शरीरांत: परमात्म प्रवेशेसत्युपमागवेषणं न तस्याद्भिवजीव प्रवेश इत्यत आह ॥ २० ॥

## दर्शनाच्च ॥ २१ ॥

पुर: संपक्षी भूत्वापुरुष आविशत् अनेन अनेन जीवेनेत्यादिना परमात्मन

एवप्रवेशस्य दर्शनात् चकारोजीवस्य परमात्म व्यतिरिक्तत्व ग्राहकप्रमाणा भावसूचनार्थः पूर्वाधि करणे निर्विशेष मेवब्रह्मेत्युक्तं निषेध प्राधान्यात् एवंचनेति प्राधान्याद्ब्रह्मापिनस्यादित्या शिंक्याह ॥ २१ ॥

## प्रकृतैतावत्त्वंहिप्रतिषेधतिततोब्रवीतिच भूयः ॥ २२ ॥

प्रकृतं मूर्त्तामूर्त्तं रूपेण यदेतावत्त्व मियत्तातस्यभावः प्रकृतैतावत्त्वंतदेव प्रतिषेधति निराकरोति नेतिनेतिशब्दः कुतएतदि त्यतआह ततोब्रवीति-चभूयः ततस्तस्मात्प्रतिषेधा दनंतरंभयः पुनरन्यत् परमस्तीति ब्रवीतिचका-रोऽत्यंतस्ततोनिर्धारणसमुच्चयार्थः अथवाततो ब्रवीतिच भूयइतिततः प्रतिषे-धानंतरंभूयः पुनर्ब्रवीति अथनामधेय मसत्यसत्यस्य सत्यमित्यादिनांता दृशंब्रह्मचेत्कस्मा चचुरादिभिर्न गृह्यतइत्यतआह ॥ २२ ॥

## तदव्यक्तमाहहि ॥ २३ ॥

तद्ब्रह्म मव्यक्तं रूपादिहीन मव्यक्तंकुतः हियस्मादाहश्रुतिः नचचुषा गृह्यतेनापिवा चेत्यादिनास्मृति रपिअव्यक्तोय मित्यादिनानतु श्रुतिवचनात्ता दृशस्यसत्त्वे कथ विश्वासः कदाचिदपिअप्रत्यक्षताया मित्यत आह ॥ २३ ॥

## अपिसंराधनेप्रत्यक्षानुमानाभ्याम् ॥ २४ ॥

संराधनं भक्तिध्यान प्रणिधाना द्यनुष्ठानं तस्यसंराध्यमानस्य संराधनन्त-स्मिन्योगिनः पश्यन्ति तत्कुतः प्रत्यक्षानु मानाभ्याम् प्रत्यक्षम् श्रुतिः प्रत्यगा-त्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ततस्तुतं पश्यति निष्कलमित्यादिः अनुमानंस्मृतिः ज्योतिः पश्यन्ती-त्यादिश्च श्रुतावविश्वसितस्य प्रत्यक्षेणापि विश्वासमाहापि शब्दः ननुसंराध्य संराधक भाव श्चेत्तर्ह्येव ब्रह्मभेदः ब्रह्मणोविशेषात्मत्वंच स्यादित्यत आह ॥ २४ ॥

## प्रकाशादिवच्चवैशेष्यं प्रकाशश्चकर्मण्यभ्यासात् ॥ २५ ॥

यथाप्रकाशका: सवितृप्रभृतयौ गुलिकरकोदक प्रभृतिषु कर्मसूपाधिभूतेषु सविशेषादृवावभासंतेनच स्वाभाविकीम विशेषात्मतां जहतिएव मुपाधिनिमित एवायमात्मभेद: स्वतस्त्वैकात्म्यमेव तथाहिवेदांते अभ्यासेना सकृज्जीव प्राज्ञयोरभेद: प्रतिपाद्यते अचराचित्वे वंयोज्यानिकर्मण्युपाधौ प्रकाशश्च उपाधौस्थितो भिन्नरूपेण वैशेष्यमेवावलंवतएवं प्रकाशादिवत् स्वरूपेणा वैशेष्यमलंवतेपर: आद्यप्रकार स्तदवलंबने परत्वाभावं परमेश्वरस्याह कुत: अभ्यासात् जीवब्रह्मणोर भेदस्येतिशेष: तथापि परिच्छिन्नस्य जीवस्य कथमनंतेन परमात्मनैक्य मुपपन्नं नैतद्युक्तिमार्गं ॥ २५ ॥

## अतोनन्तेनतथाहिलिंगं ॥२६॥

हियस्माद्यथोक्तं तथालिंगं ब्रह्मवेद ब्रह्मैवभवतीति इदानींस्वमत विशुद्धौ भेदाभेदवाद मुत्थापयति ॥ २६ ॥

## उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २७॥

तुशब्द: संराध्य संराधकयो रौपाधिकं भेदंव्यावर्तयतितत्तस्तु तमित्यादिनाध्या तव्येयभावस्य परमित्यादिनागंतव्यगंतव्यभावस्य यत: सर्वाणिभूतानिइत्यादिनाम्नि यंतृनियम्यभावस्य भेदस्यतत्त्वमसि अहंब्रह्मास्मीत्यादिना ऐक्यस्योभयस्य व्यपदेशाद्भेदाभेदौ जीवब्रह्मणो रहिकुण्डलवत् यथाहे:कुण्डलाकारो नात्यंतंभिन्न: पृथ गुपलंभात् नचात्यन्तमभिन्न: दण्डायमाने तस्मिन् तथानुपलंभात् एवंजीवोपि नन्वेवंजीवस्या नित्यत्वं स्यादित्यत आह ॥ २७ ॥

## प्रकाशाश्रयवद्वातेजस्त्वात् ॥ २८॥

अथवा प्रकाशाश्रय वदेतत्प्रति पत्तव्यम् यथाप्रकाश: सावित्र: तदाश्रयश्च सवितानात्यन्तभिन्न: उभयोरपि तैजसत्वाविशेषात् अथच व्यपदेश भाजौ भवतएव मित्यपीति समाधत्ते ॥ २८ ॥

## पूर्ववद्वा ॥ २९ ॥

वांशब्देन भेदाभेद इत्याह किन्तु यथा पूर्वमुपन्यस्तं प्रकाशादि वचा-वैशेष्यमिति तथैतत्नन्वेवंभेदश्रुतेरपि निर्वाहिकुतोयमेव पक्ष इत्यत आह ॥ २९ ॥

## प्रतिषेधाच्च ॥ ३० ॥

नान्योतोऽस्ति द्रष्टेत्यादिना ब्रह्मणो व्यतिरिक्तस्य प्रतिषेधात् चकारो भेदश्रुतेर सत्त्वं न भेदाभेद दुर्भणत्व समुच्चयार्थः पूर्वाधिकरणे प्रतिषेधा दन्यस्यब्रह्मणः श्रुत्योक्तत्वादस्ति ब्रह्मेत्युक्तं तर्हि ब्रह्म व्यतिरिक्त मप्यस्ति श्रुत्युक्तत्वादित्या क्षिपति ॥ ३० ॥

## परमतः सेतून्मान सम्बन्ध भेदव्यप देशे-भ्यः ॥ ३१ ॥

परमेश्वरा त्परमन्य दस्तिकुतः सेतून्मान सम्बन्ध भेदव्यपदेशेभ्यः सेतुव्य-पदेशः पुरुषोत्तरादित्वं पुरुषोत्तर मित्योद्दतितिभ्यः नहिसर्वसाम्या त्परस्येते उपदेशा उचिताः ॥ ३१ ॥

## सामान्यात्तु ॥ ३२ ॥

तुशब्दो ब्रह्मणः परमन्यद्रावर्तयतिकथंतर्हि सेतुशब्दो ब्रह्मणी त्यत आह ॥ ३२ ॥

## सामान्यात्बुद्ध्यर्थः पादवत् ॥ ३३ ॥

बुद्ध्यर्थं उपासनार्थः तत्रनिदर्शनं पादवत् यथापादामनसो वागादयः अथवा कार्षापणस्य पादाद्यवहारार्थं तद्वत्तर्हि सम्बन्धभेदयोः कथंव्यपदेश इत्यत आह ॥ ३३ ॥

## स्थानविशेषात् प्रकाशादिवत् ॥ ३४ ॥

स्थानमित्यस्थानं तस्यविशेषो बुध्याद्युपाधि राहित्यं सुषुप्तावस्थायां मनुपरि मितत्वेन सतांपतिरतोन सम्बन्ध ज्ञानदूषणं भेदपक्षेस्थाने चादित्य-मण्डले चिणोव विशेषस्तस्मात् नतुस्वरूप भेदोपदेश: प्रकाशादिवदित्युपमो-पानातम् यथैकस्या प्रकाशस्य सौरस्य यथोपाधि योगादुपजातस्य भेदव्यपदे-शो भवति उपाध्यु पगमात् सम्बन्ध व्यपदेशो भवति चादिशब्देन यथासूची पाशादिषूपाध्यपेक्षये यतोव्यपदेशो भवतस्तद्वत् नतुकस्मात् मुख्यं सम्बन्धं परित्यज्यउपचरित: स्वीक्रियते इत्यत आह ॥ ३४ ॥

## उपपत्तेश्च ॥ ३५ ॥

स्वमपीतो भवतीति स्वरूपसम्बन्ध मेवामनन्तीति चाप्योपाधि प्रलय-न्तरेण नचनगर यदस्युपपत्ति: अतउपपत्तेर यमेवसम्बंन्ध: भेदोपिनान्य इत्यइति चकारार्थ: उक्तेभ्योहेतुभ्य: परोक्ष निवृति नैतावतर स्वपक्षसिद्धि रित्यत आह ॥ ३५ ॥

## तथान्यप्रतिषेधात् ॥ ३६ ॥

यथासेत्वा दिव्यपदेशोनवच्छिन्न उपपन्नस्तथा सएवाधस्तादित्यादिना ब्रह्मणोन्यस्य प्रतिषेधात् तथापि ब्रह्मणस्त्रेधा परिच्छेद शून्यत्वाभावात् परमन्य दस्तुमेय मित्यत आह ॥ ३६ ॥

## अनेन सर्वगतत्वमायामशब्दादिभ्य: ॥ ३७ ॥

अनेन सेत्वादि निराकरणे नान्य प्रतिषेधेनच सर्वगतत्वं त्रेधा परिछेद शून्यत्वं किंतर्कमात्रेण तत्रेत्याह आयामशब्दा दिभ्य: आयामशब्दो व्याप्ति वचन: शब्द: यावानाकाश इत्यादि: आदि शब्देन नित्यत्वादि शब्दोर्थोवातेभ्य: पूर्वाधिकरणे निर्गुणमेव ब्रह्म तत्पदार्थ लक्षणातोधिकं किंचिदस्ति तर्हि निर्गुणस्यापि कर्मफल पारतं त्रात् सेतून्मानादिक मित्याशिप्याह ॥ ३७

## फलमतउपपत्तेः ॥ ३८ ॥

फलं सुखदुःखादि अतः परमेश्वरात् कुतश्चेतनोपि स्वतंत्रः कृतं शुभाशुभं विज्ञाय तदनुसारि प्रयच्छतीत्युपपत्तेः किंतकर्मा अमित्याशं क्याह ॥ ३८ ॥

## श्रुतत्वाच्च ॥ ३९ ॥

अन्नादीवसुदान इत्यादिनाचकार ईश्वर प्रेरितोगच्छेदित्यादिस्मृतिमाह ईश्वर फलदातृत्व माक्षिपति ॥ ३९ ॥

## धर्मंजैमिनिरतएव ॥ ४० ॥

जैमिनिस्त्वाचार्यो धर्मं फलस्य दातारं मन्यते अतएव श्रुतोपपत्तिभ्यामिवश्रुतंज्योतिष्टोमेनेत्यादिनाउपपत्तिरीश्वरस्य हाताऽक्षति : पिकर्मण्यपि दद्यात् सुखं दुःखादि कृतेपि नदद्या त्स्वतंत्रत्वा देवसमाधत्ते ॥ ४० ॥

## पूर्वन्तुवादरायणोहेतुव्यपदेशात् ॥ ४१ ॥

तुशब्द ईश्वरानधिष्ठितस्य कर्मणः फलदातृत्वं व्यावर्तयति किंतुयः पूर्वमुक्त सएवेश्वरं फलदातारं बादरायण आचार्यो मन्यते कुतःहेतु व्यपदेशात् हेतुरीश्वरो धर्माधर्मयोः फलस्यचए षह्मे येत्यादि श्रुत्वायोयोयांया मित्यादि स्मृत्याचव्यप दिश्यतेहितोः कारणस्य व्यपदेशो हेतु व्यपदेशस्तस्मात् ॥ ४१ ॥

## इति सूत्र प्रदीपिकायां तृतीयाध्यायस्य द्वितीयः पादः ॥

द्वितीयेपादे तत्त्वंपदार्थौ निर्णीतौ तृतीयपादे पुनरुक्ताकाङ्क्षित पदार्थोप संहारेणसगुणनिर्गुण ब्रह्म वाक्यानां अर्थोवधार्यते सगुणो विद्याभेदो भेदश्च गुणोपसंहारोनुपसंहारश्चोपासनार्थः ततः सर्वांतकरणे प्राणोत्पादे ब्रह्माप्नोति इतिफलं निर्गुणेतु विद्यायाऐक्य मेव अथानंदादि गुणानामुप संहारःप्रत्यक्स्वरूपैकरस वाक्यार्थ बोधः फलमित्यत आरभ्यते ॥

## सर्ववेदांतप्रत्ययंचोदनाद्यविशेषात् ॥ १ ॥

सर्व वेदांत प्रत्ययानि विज्ञानानि यस्मिन् तत्सर्ववेदांत प्रत्ययं प्राण विज्ञानं सर्ववेदांत प्रत्ययानि विज्ञानानि तस्मिंस्तस्मिन्वेदांते तान्येतानि भवितु मर्हंति कुतश्चोदनाद विशेषात् आदिशब्देन संयोग रूप समाख्यानां ग्रहणं यो हवैज्येष्ठं च श्रेष्ठं च वेदेतिछंदोगानां वाजसनेयिनां चचोदनाया अविशेष: ज्येष्ठश्च श्रेष्ठश्च स्वानां भवतीति प्रयोजने संयोगोप्यविशिष्ट:रूपमपि ज्येष्ठ श्रेष्ठ गुणकमेव समाख्यापि प्राण विद्येति ॥ १ ॥

## भेदान्नेतिचेन्नैकस्यामपि ॥ २ ॥

वाजसनेयिनां छंदोगानां पंचाग्नि भेदां नैकाविद्येति चेत्तन्न एकस्यामपि विद्यायामयं भेदोन दोषाय साम्यानां पंचानामप्य ग्नीनां प्रत्यभिज्ञायमान-त्वादेवमन्यथापि ज्येष्ठत्वादिगुणा नामेकरूपत्वादभेद: तेषामेवेता मित्यादिना शिरोव्रतादि धर्मभेदाद्विद्याभेद इत्यत आह ॥ २ ॥

## स्वाध्यायस्यतथात्वेनहिसमाचारेधिका-राच्चसववच्चतन्नियम: ॥ ३ ॥

स्वाध्यायस्य चचर्मेनविद्याया: कथंचिदयस्मात्तयात्वेन स्वाध्यायधर्मत्वेन समाचारे वेदव्रतोपदेशपरेग्रन्थे आथर्वणिका इदमपि वेदव्रतत्वेन व्याख्यात मित्यामनन्तिने तदचीर्णव्रतोधीते इति चाधिकृत विषयादेतच्छब्दादध्ययन शब्दाच्चतदाश्चाधिकाराद्विसववच्च तन्नियम: तस्यशिरो नियमोपितेषा मेवतत्र निदर्शनं सववत् यथासप्त सौर्यादय: शतौदनपर्यंता सएवैकाग्नि सम्बन्धात्तेषा मेवतद्वत्नतुल्यायमात्रेण कथमवाचचित्कं स्वीकर्तुं शक्य मित्यत आह ॥ ३ ॥

## दर्शयतिच ॥ ४ ॥

सर्ववेदायत्पद मित्यादिना विदोकत्वं चकारोव्याययमाण शंकाया चतुर्थोर्थं दर्शयति पूर्वाधिकरणे विद्यैकत्वं निरूपितं तत्रिष प्रयोजन मित्याशंक्याह ॥ ४ ॥

## उपसंहारोर्थाभेदाद्विधिशेषवत्समानेच ५

शाखांतरोप दिष्टानां गुणानां शाखान्तर विज्ञानमुपसंहारः स्वीकारः कार्यःकुतः अर्थस्यप्रयोजनस्य विशिष्ट ज्ञानोपकारस्या भेदात् समानैयोभयत्रापि तस्मिन्नेकस्मिन् ज्ञानेस्थिते अत्रनिदर्शनं विधिशेषवत् विधिशेषाणा मग्निहोत्रादि धर्माणां शाखांतरेश्रुतानां यथाशाखांतर उपसंहारस्तद्वत् पूर्वाधिकरणे शोद्गनाद्य विशेषात् विद्यैक्यमुक्तं अत्रापि प्राणविद्येति सामाख्यया एवैक्यात् विद्यैक्यमिति वदंतं अपवदति सूत्रावयवेन ॥ ५ ॥

## अन्यथात्वंशब्दादितिचेन्नाविशेषात् ६ ॥

उद्गानस्य कर्त्तृत्व मुद्गीथरूपत्व- वाजसनेयि केछान्दोग्ये च प्रतीयतेत्वं नउद्गायेति वाजसनेयि केतमुद्गीथ मुपासांच क्रिरेइति शब्दभेदादिति चेन्न-नकुतः अविशेषात् देवासुर संग्रामादे र्भूयसंउभयत्रापि विद्यांत मांद्य ॥ ६ ॥

## नवाप्रकरणभेदात्परोवरीयस्त्वादिवत् ७

नवानैव विद्यायाऐक्यं कुतः छान्दोग्ये ओमित्येतदक्षरमुद्गीथ मित्युपक्र-म्योद्गीथावयवस्योद्गीथत्वं नो पास्यमभिध्याय प्राणस्यापि उद्गीथत्वमाहतस्मादुद्गीथमितिवाजसनेयिकेतुसमग्राया उद्गीथभक्तेः कर्तृत्वं नउद्गायति अतः प्रकरण भेदात्परोवरीयस्त्वादिवदेकस्यां शाखायां निदर्शनं सएवपरोवरीयानुद्गीथ इत्याकाशे परोवरीयस्त्वादिधर्मिण्युद्गीथे हिरण्यश्मश्रुत्वादि धर्मिष्विव परस्परं नगुणोप संहारस्तद्वत् ॥ ७ ॥

## संज्ञायाश्चेत्तदुक्त मस्तितुतदपि ॥ ८ ॥

संज्ञायाः प्राणविद्येत्यस्या अभेदाद्विद्यायाअप्यभेदइतिचेत् चोद्यं तदुक्तं निराकृतं नवाप्रकरण भेदादित्यत्र तदपिसंज्ञाया ऐक्यमपिप्रसिद्ध भेदेष्वपि परोवरी यस्त्वादावुदय इत्यग्निहोत्र दर्शपूर्ण मासादौ काठकमिति अस्तितु

अस्यैव पूर्वाधिकरणे ओमित्येतदक्षर मुद्गीथमिति छान्दोग्यानामुपक्रमादिना भेदउक्तः इदानीं तस्योंकारस्योद्गीथोपि विशेषणं नद्दष्टविधिर्नापवादोनचैक्यमिति बुद्धि सन्निधिता माह ॥ ८ ॥

## व्याप्तेश्चसमंजसं ॥ ९ ॥

चशब्दस्त्वर्थः सद्यध्यासापवादैक्यानि निराकरोतिव्याप्तेः सर्ववेदसाधारण्यात् ओंकारस्य सताद्दशो माभूदित्युद्गीथ शब्दंविशेषणमाह समंजसंचैतद्विशेषणम् अन्यथा व्याप्तस्यैव ग्रहणंस्यात् पूर्वाधिकरणे ओंकारस्योद्गीथ विशेषणमित्युक्तं सर्वप्राणेच व्याप्तत्वं तद्वदथापि विशिष्टत्वादि गुणाअन्यत्वव्याहृत्यर्था इतिहष्टांतेना भिप्याह ॥ ९ ॥

## सर्वाभेदादन्यत्रेमे ॥ १० ॥

इमेवशिष्टत्वादयो गुणायन्योक्ता स्तत्रासीरन्कुतः सर्वाभेदात् सर्वस्य प्राणस्य विज्ञानस्यै कस्याभेदात् पूर्वाधिकरणे प्राणस्य विशेषणत्वेन शाखांतरगता गुणावशिष्टत्वा दयउपसंहृताः नतु ब्रह्मणः सविशेषत्वमिति नशाखान्तरगता आनन्दादय उपसंहर्तव्याइति भाविन्याह ॥ १० ॥

## आनन्दादयःप्रधानस्य ॥ ११ ॥

यथशाखान्तरे आनंदादयो धर्मायोक्ताः प्रधानस्य ब्रह्मणस्तत्रापि उपसंहर्तव्याःकुतः सर्वाभेदादेवएवं चेत्प्रिय शिरस्त्वादीना मुपसंहारप्राप्ति रित्यत आह ॥ ११ ॥

## प्रियशिरस्त्वाद्य प्राप्तिरुपचयापचयौहि भेदे ॥ १२ ॥

प्रियशिरस्त्वादे रुपसंहाराप्राप्तिः कुतः हियस्मात् भेदेसत्युप चयापचयौभवतः नत्वभेदेपि प्रियशिरस्त्वादयश्च स्ययमपितारतम्येन वर्तते भोक्तृभेदाच्च-

प्रियशिरस्त्वादयः छलाचिन्तयोक्ताः संयद्वामसत्य कामत्वादीनाम प्राप्तिंदर्श-
यितुं यथाप्रिय शिरस्त्वादयो नोपसंहार्याः तद्वदानंदयो पीत्यत आह ॥ १२ ॥

## इतरेत्वर्थसामान्यात् ॥ १३ ॥

तुशब्दो शुपसंहार्यत्वं व्यावर्तयति इतरे आनन्दादय उपसंहर्तव्याकुतः अर्थसामान्यात् अर्थस्य प्रतिपाद्यस्य ब्रह्मणः सामान्यात् एकरूपत्वापन्नत्वात् पूर्वाधि करणे ब्रह्मणैक्याद्दाच्चे तत्पदार्थे आनन्दादीना मुपसंहारउक्तः शब्दसामर्थ्या त्तर्हितद्वदिन्द्रियेभ्यः पराह्यर्थाइत्यादीवाक्या वगतेरर्थादिन्द्रियादयः स्वतन्त्राः प्रतिपाद्यास्त इतिदृष्टान्ते नाक्षिप्याह ॥ १३ ॥

## आध्यानायप्रयोजनाभावात् ॥ १४ ॥

इन्द्रियेभ्यः पराह्यर्था इत्यादिना परम्परा पुरुषांतोक्तानसा प्रतिपाद्या कुतः प्रयोजनो भावात् तर्हिपुरुषोपि नप्रतिपाद्य इत्यत आह आध्यानाय ध्यानपूर्वकाय सम्यक् दर्शनाय पुरुषः प्रतिपाद्यः अध्यानमृचेन्द्रियादि प्रतिपादनेपि स्यादित्यत आह ॥ १४ ॥

## आत्मशब्दाच्च ॥ १५ ॥

गूढोत्मान प्रकाशतइति पुरुष आत्मशब्दात् तस्यैवगूढत्वा प्रतिपाद्यं प्रतिपत्त्यर्थमेवत्वियमुपरम्परानस्वतन्त्राचकारोनैतेषामन्यतम प्रतिपादने सर्व-मतिपादने वाऽध्याने सिद्धतीत्याह पूर्वाधि करणे संभवत्वे क वाक्यत्वे-वाक्यभेदोनयुक्तस्तर्हि आत्मावाइदमे वेत्यादौ हिरण्यगर्भः स्वीकरणीयस्तत्र वाक्यभेदा भावादिति दृष्टान्ते नाक्षिप्य समाधत्ते । अथवा वाजदेवेति छान्दोगानांयोयं विज्ञानमय इति वाजसनेयिकानां चैकवाक्यता भावाच्च पूर्ववद्विद्यैक्य मित्याक्षिप्य समाधत्ते ॥ १५ ॥

## आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥

आत्मावा इदमेक एवासीदित्यत्रात्मनः परमात्मनो गृहीतिर्ग्रहणं किंवत्

यथातस्मादाप तस्मादात्मन इत्यचक्षुष्टिप्रसङ्गेन तद्वत् कुतइत्यत आह उत्त-
रात् सपिबतीत्यादेः ॥ १६ ॥

## अन्वयादितिचेत्स्यादवधारणात् ॥ १७ ॥

अथ. प्रभृतीनां सृष्टे रन्व यादवगतत्वात् नपर आत्म शब्दाभिधेय इतिचेत् तत्रस्यात् परमात्म शब्दाभिधेयो भवेत् कुतः आत्मा वाइदमेक एवे त्यवधारणात् अथवा सदेवेत्यादिनासच्छब्देनात्मनो ग्रहीतिरितरवद्वाजसनेयके कतमआत्मेति यथाआत्मेति यथाआत्मशब्दे नात्मग्रहीतिस्तद्वत् कुत उत्तरात्पि तदात्म मिदंसर्वं मित्युप संहारगततादात्म्य शब्दात्सदेवे त्युपक्रम्य न्वयात्मनो ग्रहण मितिचेत् तत्रयेनाश्रुत मित्यादिना एकविज्ञानेन सर्व विज्ञानस्य सदेवेत्यनेनोत्पत्तेः प्रागन्यासत्त्वस्य, चावधारणात् तस्यचात्मग्रहदे उपपद्यत्वं नान्यथा पूर्वाधि करणे संदिग्ध सदुपक्रमस्य वाक्यशेषादि र्णयतत्रः एवमित्याप्य शिष्यन्त्याचामन्ती त्यसदेवर्तमानोप देशत्वेन विधित्वसंदेहे अशिष्यवाचा मेदितिवाक्य शेषादाचमनस्य विधित्वनिश्चय इत्याशिप्य समाधत्ते ॥ १७ ॥

## कार्याख्यानादपूर्वम् ॥ १८ ॥

पुरस्ताद्यो परिष्टाचाद्भिः परिदधातीति छान्दोगानाम शिष्यन्वाचा मेदशित्वाचा मेदिति वाजसनेयानि यदाचमनं नतद्विधेयं कुतः कार्याख्यानात् प्रायश्चित्यर्थः कार्यत्वेन प्राप्तस्यस्मार्तस्या ख्यानादनुवादात्. किंतर्हि विधेय मित्यत आह अपूर्वमेव तदेनमनग्नं कुर्वंतो मन्यंतइति अनघेता चिन्तनंप्राप्तं विधेयं पूर्वाधि करणे प्रसाप्त मनानुवादेना नग्नताचिन्तनं विधेयःमित्युक्त मिहतु वाक्ययोः कस्यविधेयत्वं कस्यानुवादत्व मित्यनिश्चयात् द्वयोरपि विद्यादय विधित्वे नान्योन्यं गुणानुप संहार इत्याशिप्य समाधत्ते ॥ १८ ॥

## समानएवंचाभेदात् ॥ १९ ॥

समानेपि शाखाभेदे वाजसनेयके एवं गुणोपसंहारो यथाभिन्न शाखा-

यांक्षत: शाण्डिल्यविद्यायां मनोमयत्वादीनां गुणानां वृहदारण्यकेच मनोमयत्वादीनां प्रत्यभिज्ञाय मानत्वा द्विद्याया अभेदस्तस्मात् पूर्वाधिकरणे एकशाखायाम भ्यासाच्छांडिल्य विद्याभेद प्रसक्तावपिप्रत्यभिज्ञानाद्विद्यैक्य-गुणोपसंहार: उक्तस्तर्हि इहापिसत्यस्यब्रह्मणोमण्डलहृदयवर्तिनए क्यात्उप-निषदोरप्युभयत्र चिन्तनमिति दृष्टान्तेना क्षिपति ॥ १८ ॥

## संबन्धादेवमन्यत्रापि ॥ २० ॥

तस्योपनिषद हरिति तस्योपनिषद मिति यथा शांडिल्य विद्यायां वृह-दारण्ये गुणोपसंहार: एवमन्यत्रापि आदित्येचक्षुषिचोप निषदो रविभागेन चिन्तनमकुत: एकविद्या सम्बन्धात् सिद्धान्त माह ॥ २० ॥

## नवाविशेषात् ॥ २१ ॥

त्वदुक्तं नैवकुत: आदित्ये हरिति अक्षुण्यहमिति स्थलयोर्वि शेषात् उप-निषदोरपि विभाग: नतुस्थान भेदाद्धर्मभेदो नाश्चयनीयति इत्यत आह ॥२१॥

## दर्शयतिच ॥ २२ ॥

तस्यैतस्यय देवरूप मित्यादिनाति देशैस्थान भेदात् धर्मभेदो चकारो राजादीनांस्थान भेदाद्धर्मभेद प्रसिद्धिमाह पूर्वाधिकरणे आदित्यादिस्थान भेदात् धर्मानुप संहारउक्त: अथतु ब्रह्मण: प्रत्यभिज्ञायमानत्वात् दुपसंहार इति प्रत्युदाहरणे नाक्षिप्याति देशेन समाधत्ते ॥ २२ ॥

## संभृतिद्युव्याप्त्यपिचात: ॥ २३ ॥

ब्रह्मज्येष्ठा वीर्यासंभृतानि ब्रह्माग्रे ज्येष्ठंदिव माततानेतिराणाय नीया-नां खिलेषु आधिदेवं संभृति द्युव्याप्त्यादयोपि धर्मास्तेनाध्यात्म दहरोप कोशल्यादिविद्यास्वपिउप संहर्तव्या कुत: अतएव स्थानभेदादेव पूर्वाधिकरणे असाधारण प्रत्यभिज्ञाना.च्छांडिल्यादौ विद्याभेदउक्त: इहतु असाधारण गुण-प्रत्यभिज्ञाना द्विद्यैक्यमिति प्रत्युदा हरणे नाक्षिप्य समाधत्ते ॥ २३ ॥

## पुरुष विद्यायामिव चेतरेषाम नाम्ना-
## नात् ॥ २४ ॥

ताण्डिनां पैंगिनां च रहस्येपुरुषस्या युस्त्रेधा विभज्य तत्सवनत्रयं परिक-ल्प्या ऽशिषादीनि दीक्षात्वेनोच्यन्ते येयंपुरुष विद्यातस्यां येधर्मास्तस्यैवं विदुषोयज्ञस्ये त्यादिनायः पुरुषोयज्ञ इतरैस्तैत्तिरीकैः धर्माः परिकल्पिता स्तस्मिंस्तेनोप संहर्तव्याः कुतस्तेषां ताण्डिपैंगि वदनाम्नानात्यतस्तेतस्ये त्यादिना ह्यात्मायजमानः श्रद्धापत्नीत्यादि पठन्ति पूर्वाधि करणे पुरुषयज्ञस्य विद्यासन्निधेर्विद्यांगत्ववत् सर्वंप्रविध्येत्या देरुपनिषत्सन्निधे र्विद्यांगत्वमिति दृष्टान्ते नाक्षिप्य समाधत्ते ॥ २४ ॥

## वेदाद्यर्थभेदात् ॥ २५ ॥

सर्वंप्रविध्ये त्यादिमंत्रजातं प्रवर्ग्यादि र्वाकर्मवा तत्तच्छाखोप निषदारम्भे पठ्यमानानि नविद्यासूप संहर्तव्यानि कुतस्तेषांवे हृदयवेदादयोर्था स्तेषांभे-दात् पूर्वाधि करणे विद्यासन्निधौ श्रुतस्यमन्त्रादे र्विद्यायामर्थं भेदेसामर्थ्याद् उपसंहारउक्तः तद्वदामंत्रसन्निधौ श्रुतस्या प्युपायनस्य तदंतरेणापि ह्यानसम्भ-वात् ह्यनुपसंहार इत्याक्षिप्य समाधत्ते ॥ २५ ॥

## हानौतूपायन शब्दशेषत्वात् कुशाछन्दः
## स्तुत्युपगानवत्तदुक्तम् ॥ २६ ॥

तदाविद्वान् पुण्यपापे विधूयेत्यादौ यद्यपि तस्मिन् उपायनंनास्ति नव-शाख्यमिति तुशब्दश्चात्र हानौकेवलायां श्रूयमाणायामथर्वणादावु पायनं सन्निपतेत् कुतः उपायन शब्दशेषत्वात् तस्याः तथाहिकौषीतकिरहस्ये तस्युकृतदुष्कृते विधुनुतेतस्य प्रियाज्ञातयः सुकृतमुपयन्ति अप्रिया दुष्कृतमिति

अथवाधूञ्कम्पनेधातोश्चलनार्थोयंविधूतशब्दः उतहानाविति अश्वइवरोमाणि विधूयेत्यादौ नसुकृत दुष्कृतयो श्चलनं सम्भवति किंतुतयोर्हानिः परित्यागः कृतउपायन शेषत्वात् तस्यहानौ सत्यांकुशाछन्दः स्तुत्युपगान वदित्युपमानं भाल्लविनां कुशावानस्पत्या इत्यविशेषश्रवणात् शाट्यायनिनामौदुम्बराइति विशेषःकुशानांयथा वाक्यचिदेवा सुरच्छन्दसाम विशेषे देवच्छंदासि पूर्वाणीति पैंगिनामाम्नायिति सूर्य इति विशेषःयथवा क्वचिद्दत्विग इति अविशेषा दुपगानात् पूर्वत्वंविशेषःयथाषषोडशि स्तोत्रेकालानियमे समयाध्युषिते प्राप्ते भाल्लविनामाध्वर्युरुपगायदिति विशेषामाह स्तात् कौषीतकि रहस्यादौ उपायनस्य विशेषः तदुक्तंद्वादशमनष्यां अपि तुवाक्यशेषः स्यादन्याय्यत्वा द्विकल्पस्य विधीनामेकदेशः स्यादितिएष वैससदश प्रजापति यंशमन्वायन इति नानुयाजेषु येयजामहंकरोतीति चविधि प्रतिषेधयोः समावेशे विकल्पेप्राप्ते अभिभिराह अपित्वित्यादि तुशब्दोविकल्पं वारयतिकुतः अन्याय्यत्वाद्विकल्पस्या इष्टदोषग्रस्तत्वेन ततोविधीना मेकदेशःस्यात् अनुयाजवर्जितेषु येयजामहः कर्तव्यइति पर्युदासःस्यात् अस्मिन्नर्थे नानुयाजे ष्वियजामहंकरोतीति वाक्यशेषोप्यनु कूलःस्यात् यथात्रनविकल्पस्तद्वदुपायनेपि नविकल्पः यद्यप्यन्य सुकृतदुष्कृतयो रन्येननोपादानं तथापि विद्यास्तुतिरिति द्रष्टव्यं पूर्वाधिकरणे विद्यासाम र्थ्यात्कर्मणांपरित्यागउक्तःनैतद्विद्यासामर्थ्यम् अर्द्धमार्गे परित्यागादिति इदानीमाशिङ्क्य समाधत्ते ॥ २६ ॥

# साम्परायेतर्तव्याभावात्तथाह्यन्ये॥ २७॥

सम्पराय एवसांपरायः तस्मिन्देह परित्यागावसर एवसुकृतदुष्कृतयोर्हानिः नत्वर्धमार्गे विरजांतीर्त्वा कुतस्तर्तव्याभावात् उत्पन्नज्ञानस्य सुकृतदुःष्कृताभ्यां प्राप्तव्यस्या भावात् तथाह्यन्येपियस्मात् यथाअभिव्याख्यातं तथातांडिनः अश्वइवरो माणिविधूये त्यादिना शाट्यायनिनश्च तस्यपुत्राः दायमुपयन्ति इत्यादिनाप्यादावेव परित्यागमा मनंतिनतु विरजांनदीं तीर्त्वेत्यर्थतः स्याप्रत्यय श्रवणात् तत्रैवकुतोन परित्याग इत्यत आह ॥ २७ ॥

## छन्दतस्तूभयाविरोधात् ॥ २८ ॥

छन्दतइच्छातः शरीरे सतिब्रह्मचर्यादि साधनपरित्यागावसरे परित्यागः एवंचोभयस्य निमित्तस्य नैमिनिकस्यच तांडिशाट्यायनिनोर्वा विरोधः पूर्वाधि करणे शरीरपरित्यागावसरएवसुकृत दुःष्कृतयोः परित्यागः निमित्त नैमितिका विरोधेनेत्युक्तं अत्रापि सगुणनिर्गुण ब्रह्मप्रतिपादक वाक्यानां ब्रह्मप्रतिपादकत्वा विरोधेन निर्गुणेष्वपिगते रुपसंहार इति दृष्टान्ते नाचि-न्त्यसमाधत्ते ॥ २८ ॥

## गतेरर्थ वत्त्वमुभयथा न्यथाहि विरोधः ॥ २९ ॥

गतेर्देवया नस्यपथोऽर्थवत्त्वं प्रयोजनवत्त्वम् उभयथा सगुणेनिर्गुणेच व्यवस्थयाकृतः ह्रियस्मात् अन्यथा निर्गुणेपि चेद्गतिः पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपै तीत्यादिना विरोधः स्यात् किमिदानीं श्रुतिविरोधा दनुपपन्न मप्याहर्तव्य मित्यत आह ॥ २९ ॥

## उपपन्नस्तल्लक्षणार्थोपलब्धे र्लोकवत् ३० ॥

उपपन्नोयङ्गते रुभयथाभावः कुतस्तल्लक्षणार्थो पलब्धे स्तस्य गतेर्लक्षणभूतः कारणभूतोयोर्थः प्रयोजनं पर्यंकारोहणादिपर्यंकविद्यादौ सगुण उपलभ्यते नतुनिर्गुणे तथनिदर्शनं लोकवतयथा ग्रामादिप्राप्तौ मार्गस्यार्थवत्त्वंतद्वत् पूर्वाधि करणे सगुणनिर्गुण विद्यासुव्यवस्था गतेरुक्ता एवंसगुणास्वपि गतेर्व्यवस्थास्त्वि दिति दृष्टान्ते नाचिन्त्यापवदति ॥ ३० ॥

## अनियमः सर्वेषाम विरोधः शब्दानुमानाभ्याम् ॥ ३१ ॥

सर्वेषां सगुणाना मुपासनानाम श्रुतगतीनामपि गतेरनिय मः अविशेषः

प्रकरणस्य नियामकस्य विरोधिकुतो नियम इत्यत आह अविरोधः नविरोधः प्रकरणिकृतः शब्दानुमानाभ्यां शब्दः श्रुतिर्येचेमेरण्ये श्रद्धांतप इत्युपासते इत्यविशेषण गतिमाह अनुमानंस्मृतिः शुक्लकृष्णा गतिह्येते जगत इत्यादिका पूर्वाधि करणे सगुणविद्या सुगतिः सर्वत्रोक्ता ततः पूर्वनिर्गुणासुनित्युक्तं सोयंनियमो ऽनुपपन्नोज्ञानिना मपिव्यासादीनां शारीरश्रवणादि दर्शनात्ततोन निर्गुणज्ञानिन विदेहकैवल्यं सगुणेन क्रममुक्ति रित्याक्षिप्य समाधत्ते ॥ ३१ ॥

## यावदधिकार मवस्थिति राधिकारिकाणाम् ॥ ३२ ॥

अधिकारिणां परमेश्वरनियोगे वर्तमानानां व्यासादीनामा रब्धफलेन कर्मणा कल्पभागिना वस्थिति रवस्थानं नतुब्रह्मज्ञानस्य पाक्षिकफलत्वेना फलात्वेन वातर्हि कियंतंकाल मित्यतआह यादवधिकार मधिकार कर्म यावत् तावदेवनतु परिहारात् पूर्वाधिकरणे आधिकारिकाणां प्रारब्धकर्मण एवशरीरांतर सम्भवात् नकर्मान्तरस्य निमित्ततेत्युक्तं एवमिहापि तत्प्रकरण पठित निषेधतएवोपलक्षणात यासर्वत्र प्रपञ्चनिषेधे सिद्धे मशाखान्तरीय निषेधानां शाखांतरे ब्रह्मप्रमिति दृष्टांतेन उपसंहार इत्याक्षिप्य समाधत्ते॥३२॥

## अक्षरधियांत्ववरोधःसामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ ३३ ॥

अक्षरधिया मस्थूलत्वादि बुद्धीनां चान्यत्रावरोधः स्वीकारः स्यात्कुतः विशेषधर्म निराकरणस्य सामान्यंतस्यब्रह्मणः प्रतिपाद्यस्य एकस्वभावः सत्त्वंच सर्वत्रताभ्यां औपसदव दितिनिदर्शनं यथाजामदग्न्ये अहीनेपुरोडाशिनीषूप सत्सुचोदिता सुपुरोडाश प्रदानमन्त्राणामग्ने र्वै होत्रंवेरध्वर मित्यादिना सुत्रात् वेदोत्पन्ना नामध्वर्युभिः सम्बन्धोभवति अध्वर्युकर्तृकत्वात् पुरोडाश-

प्रदानस्य प्रधानतन्त्रत्वात् सांगानामेव सिद्धान्त परतंत्रत्वात् तत्तद्विशेषणानां यत्र क्वचिदुत्पन्नानामन्तरेण सर्वत्राभि सम्बन्ध इत्यर्थः, ख़दुक्तं प्रथमेकाण्डे गुणमुख्य व्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग इत्यत्र शावर मुदाहरणं यावत्योत्यादि सामायजुर्वेद विनियोगस्य श्रवणात् उच्चैः साम्नेत्युत्पत्ति विधेर्गुणत्वा दुपांशुयजुषेति विनियोग विधेर्मुख्यत्वा त्तयोर्व्यतिक्रमे विरोधेत-दर्थत्वात् विनियोगविध्यर्थत्वा दुत्पत्तिविधेर्मुख्येनयजुषउपांशुस्वरेण वेदस्वरा-दर्थत्वादिसाम:संयोगइत्यत्रसम्बन्धइतियोज्यं पूर्वेणावरामुदाहरणमति रोचि-तंतुतत् पूर्वाधि करणे प्रतिपाद्य मन्त्रैक्य प्रत्यभिज्ञानात् विद्यैक्यमन्तरधिया मुपसंहारउक्तः इहप्रतिपाद्य भेदादिया भेद इति प्रत्युदा हरणे नाक्षिप्य समाधत्ते ॥ ३३ ॥

## इयदामननात् ॥ ३४ ॥

द्वासुपर्णेत्यत्र ऋतंपिबन्ता वित्यत्रचविद्यायामेकांकुतः इयत्ता परिच्छिन्नस्य द्वित्वसंख्योप देशस्योभ यत्रामननात् पूर्वाधि करणे पिबंतावित्यस्य साक्षि-त्विकत्व मुपपाद्यमन्त्र द्वयेपिभोक्तृ परत्वेनार्थैक्यात् विद्यैक्यमुक्तं इहार्थैक्येपि नविद्यैक्यमिति रूपामिदमभ्यासेन प्रत्यु दा हरणे नाक्षिप्य समाधत्ते ॥ ३४ ॥

## अन्तराभूतग्राम वत्स्वात्मनः ॥ ३५ ॥

उषस्तकहोड ब्राह्मणयोर्विद्यै कत्वंकुतः आत्मनोन्तरा सर्वान्त रत्वेनो-भयत्र पाठादितिशेषः भूतग्रामवदिति निदर्शनं व्यतिरेके यथाभूतग्रामस्य पृथिव्यादेर्न सर्वान्तरत्व मइदात्मन आत्मनि सर्वान्तरत्वं नद्व्यादिकत्वाम्बयेतु यथाएको देवइत्यादौ सर्वान्तरत्व मेकस्यतद्वत् ॥ ३५ ॥

## अन्यथाभेदानुपपत्तिरितिचेन्नोपदेशान्तरवत् ॥ ३६ ॥

अन्यथाविद्यैकत्वे आत्मनोभेदा नुपपत्तिरिति चेन्नयथा तात्त्विनात-त्वमसीति नवकृत्वउपदेशभेदो विद्यैक्ये तद्वदत्रापिस्यात् पूर्वाधि करणे

अभ्यासश्चादरार्थउक्तः उत्तरत्रापि तथेत्याक्षिप्य समाधत्ते ॥ ३६ ॥

## व्यतिहारोविशिंषन्तिहीतरवत् ॥ ३७ ॥

तद्योऽहंसोऽसौयो सोऽसोऽहमित्यादा वीश्वरबुद्धि यदीश्वरेस्वात्मबुद्धिरिति व्यतिहारेण बुद्धिद्वयं करणीयं अनेकबुद्धि करणनिदर्शन मितरेवत् यथासर्वात्मादिबुद्धिः क्रियतेतद्वत्कुतः हियस्मात् त्वंवाऽहमस्मिभगवो वैत्वमसीति विशिंषन्त्याम्नातारःपूर्वाधि करणे जीवब्रह्मणोरितरेतरात्मत्वं निर्देशभेदात् द्विरूपामतिः कर्तव्येत्युक्तमेव मिहापिजयतीमात्मा कानिति पंतिपाप्मानमितिचफल भेदनिर्देशा द्वियाभेदइति दृष्टान्तेनाक्षिप्य समाधत्ते ॥ ३७ ॥

## सैवहिसत्यादयः ॥ ३८ ॥

सयोहैतं महद्यक्षमित्यादिना तद्यत्सत्यमसौ स आदित्यइत्यादिनाय श्चायंदक्षिणेक्षन्पुरुषइत्यादिना अयोक्षासाएकैवहियस्मात् तत्सत्यमिति प्रकृताकर्षणादयः सत्यादयः सर्वेगुणाउभयत्रोप संहर्तव्याः पूर्वाधिकरणे तत्सत्य-मिति प्रकृताकर्षणेन रूपाभेदात् गुणोपसंहारउक्तः इहतुरूप भेदाद्गुणा नुपसंहारइति प्रत्युदाहरणे नाक्षिप्य समाधत्ते ॥ ३८ ॥

## कामादीतरत्रतत्र चायतनादिभ्यः ॥ ३९ ॥

कामादि सत्यकामादि दहरविद्यायां य एष आत्मा मितरत्रअयोवं विज्ञानमय इत्यादि बृहदारण्यकोक्त उपसंहर्तव्यं तत्रच य इषित्यादिकं तदपिछान्दोग्योक्त दहर उपसंहर्तव्यंकुतः आयतनादिभ्यः पूर्वाधिकरणे उपासना येपिस्तुत्यर्थ खेनगुणानोप इत्युक्तंतद्दिहापि प्राणाग्निहोत्रस्य ॥ ३९ ॥

## आदरादलोपः ॥ ४० ॥

नलोपः पूर्वातिथिभ्यो श्रीयादित्या देर्शाभाव्या नामादरादिति पूर्वपक्षः राद्धान्तमाह ॥ ४०

## उपस्थितेऽतद्वचनात् ॥ ४१ ॥

तथाह्युक्तं प्रथमामागच्छेदित्यत्र भोजने सति भक्तेन प्राणाहुतीनां विधानात् भोजनालोपेऽपि प्रत्यगागत मुपस्थितं तद्भक्तंद्रव्यं अतोऽस्मा द्भक्तद्रव्यात् प्राणाग्निहोत्रस्य निष्पत्तिः नन्वन्यस्मात्कस्माच्चित् यद्भक्तमित्यनेन तस्याग्निहोत्र द्रव्यत्ववचनात् अतोभोजन लोपेऽपिलोपो ऽग्निहोत्रस्य पूर्वाधिकरणे नित्यभोजनाना श्रितप्राणाग्निहोत्रस्यनित्यत्वमुक्तमेवं चेन्नित्याङ्गाव बद्धोपासनानां नित्यत्वमिति दृष्टान्तेनाक्षिप्य समाधत्ते ॥ ४१ ॥

## तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रति- बन्धफलम् ॥ ४२ ॥

तेषांकर्मगुणयाथात्म्य निर्धारणाना मुद्गीथरस तमत्वादीनां ननित्यवन्नियमः नसर्वदाकर्मण्य नुष्ठीयमाने नुष्ठानंकुतस्तद्दृष्टेः तस्यानियमस्यतेनोभौकुरुत इत्यादिदृष्टे रवगमात् ननूभयोः करणैकिमयमेव हेतुरित्यत आह्ह हियस्मात् पृथक्फलं अप्रतिबन्धः अतिशयः यदेवविद्यया करोतीत्यादिना श्रूयतेअतः फलभूयार्थिन उपासनानिगोदोहनादिवत् पूर्वाधिकरणे फलभेदात् कर्माङ्गानां नित्यानित्यादिनिरूपणेनप्रयोगप्रभेदउक्तःइहतु वायुप्राण योस्तत्त्वा भेदात्अनिलभेष फलैक्यात् उपासन. प्रयोगैक्यमिति प्रत्युदाहरणे नाक्षिप्य समाधत्ते ॥ ४२ ॥

## प्रदानवदेवतदुक्तम् ॥ ४३ ॥

वाजसनेयकेवदिष्याम्येवाह मित्यादिना वागादिभ्यः प्राणोऽधिको वधारितो ध्यात्ममधिदैवंच ज्वलिष्याम्येवाह मित्यग्न्यादि भ्योवायुः एवंछान्दोग्येपि संवर्गविद्यायां वायुप्राणावव धारितौ विद्याया ऐक्यमपि तत्रैतौवायुप्राणौ भिन्नस्वरूपौनतु विद्याभेदो यथैकस्मिन्नग्निहोत्रे सायंप्रातः प्रवृत्तिभेद इत्येतस्मिन्नर्थे निदर्शनं प्रदानवत् यथात्रिपुरोडाशिन्यामिष्टौ इन्द्रायराज्ञे

इन्द्रायस्वाराज्ञे इत्यत्र राजादि रूपभेदात् पृथक्प्रदानंतद्दायु प्राणयोरपि भेदस्तदुक्तं पूर्वमीमांसायां सद्धर्मेनंतावा देवता पृथक्प्रानात्संकर्षः सर्वेषाम-भिगमयन्नवद्यतीत्यस्मादेक देवतया परित्याग: प्राप्तस्तं परित्यागंवाग्रब्दो वारयतिकुतः पृथक्प्रानात् राजादिगुणानां पूर्वाधिकरणे एकप्रयोग सम्भवा-द्वायुप्राणोर्भेदेनप्रेया वित्युक्तमिरत्तु मनश्चिदादीनां कर्मोक्तत्वं नैकप्रयोगां-गत्वमिति प्रत्युदाहरणे नाचिन्त्य समाधत्ते ॥ ४३ ॥

# लिङ्गभूयस्त्वात्तद्धिवलीयस्तदपि ॥ ४४ ॥

वाजसनेय केग्निरहस्ये मनोधिकृत्यषट्त्रिंशत्सहस्त्राण्य पश्यदात्मनोग्नी नर्काग्मनोमयान्मनश्चित् इत्यादिना चाम्नाता अग्नयः स्वतंत्रानक्रियानुप्रवे शिन: कुतः तथाहिते त्यादेर्लिंगस्य भूयस्त्वादधिकत्वात् सन्तिलिङ्गानि [illegible]न्यग्ने:प्रकरणात् कर्मानुप्रवेशिन इत्यतआह तद्धिवलीय: हियस्मात् लिङ्गंप्र करणात् बलीय: तदप्युक्तं पूर्वस्मिन्काण्डे श्रुतिलिङ्गवाक्य प्रकरणस्थानसमा ख्यानांसमवाये पारदौर्बल्य मर्थविप्रकर्षादिति एकद्वित्रिचतुःपंचषविलंवात् परस्यपरस्यदौर्बल्यंपूर्वस्यप्रावल्य मित्याक्षिपति पूर्ववादी पूर्वाधि करणे ॥ ४४ ॥

# पूर्वविकल्प:प्रकरणात्स्यात क्रियामानस-वत् ॥ ४५ ॥

मनश्चिदादय: क्रियैवस्यात् कर्थपूर्वस्मिन् क्रियामये ग्नौविकल्प: सङ्कल्प: विशेषोभिधीयते यतस्तदपिकुतः क्रियामयस्याग्ने: प्रकरणात् विकल्पस्य तत्प्रकरणात्क्रियारूपत्वं कद्दष्ट मित्यतआह मानसवत् यथादशरात्रस्य दश-मेहन्य विवाक्येपृथिव्या: पात्रेसमुद्रस्यसोमस्य प्रजापति देवतायै गृह्यमाणस्य ग्रहणासादन हरणो पहानभक्षणानि मानसान्येवाम्नायंते सचमानसोपि ग्रहकल्प: क्रियाप्रकरणात्क्रियाशेष: एवमप्यस्मि कल्पइत्यर्थ: केवलप्रकरणं कर्थलिङ्गं बाधते इत्यत आह ॥ ४५ ॥

## अतिदेशाच्च ॥ ४६ ॥

तेषामेकैकंएतावान् यावान सोपूर्वइत्यति देशस्तस्मादपि परिहरति सिद्धान्ती ॥ ४६ ॥

## विद्यैवतुनिर्द्धारणात् ॥ ४७ ॥

तुशब्दोग्नीनां क्रियारूपत्वं वारयति किंतर्हि विद्यैवकुत: विद्याचितएवेति निर्धारणात् मन्त्रसमक्षतं निर्धारणं नबाधकं प्रकरणस्येत्यत आह ॥ ४७ ॥

## दर्शनाच्च ॥ ४८ ॥

लिङ्गाना मितिशेष: चकार: समुच्चकारिणोन पेक्षामप्याहलिङ्गानि चोक्तानि लिङ्गसूत्रे लिङ्गमपि कथिद्बाधकं नप्रकरणस्येत्यत आह ॥ ४८ ॥

## श्रुत्यादिवलीयस्त्वाच्चनबाध: ॥ ४९ ॥

नबाध: प्रकरणेनलिंगबाधात् स्वातन्त्र्यमनश्चिदादीनांकुत: श्रुत्यादीनां वलीयस्त्वात् संतिचाचतानि श्रुतिस्तावद्विद्याचितएवेतिलिंगं सर्वदासर्वमयाग्नि भूतानिवावं तुविद्यया हैवेतेएवंविधाचिताभवन्ति ननुत्वय।पि प्रसिद्धेनाग्निनातिदेशात्क्रियानुप्रवेशिनस्ते इत्यतआह ॥ ४९ ॥

## अनुवन्धादिभ्य: प्रज्ञान्तरपृथक्त्ववद्दृष्टश्चतदुक्तम् ॥ ५० ॥

अनुवन्धस्तएवतेषु मनश्चिदादिषु क्रियावयवा आधानादयो मनसैवाधीयन्त इत्यादिनोक्तायेन सोयमनुबन्ध: आधानादिसंपादन मितियावत् आदिशब्देनातिदेशादय: नह्निक्रियानु प्रवेशिष्वग्निषु इदंसमंजसंतेभ्य एतेस्वतंत्रा: प्रज्ञांतर पृथक्त्ववदिति निदर्शनं यथाप्रज्ञान्तराणां शाण्डिल्यादिविद्यानांपरस्परंकर्मभ्यश्चपृथक्त्वंतद्वत् ननुप्रकरणा दुत्कर्षोऽदृष्टचर: कथमिवस्वीरणीय इत्यत आह दृष्टश्चाविष्टे: राजसूयप्रकरणपठिताया: प्रकरणादुत्कर्ष: वर्णत्र-

यानुबन्धात्तस्या राजसूयत्वाच्च राजसूयस्तदुक्तं प्रथमेकाण्डिकत्वर्थेय मितिचेन्न वर्णसंयोगादिति आग्नेयोष्टाकपालोहिरण्य दक्षिणाइत्याद्यवेष्टि: क्रतोराजसूयस्य प्रकरणेपठिता अतस्तदर्थेयमिति चेन्न कुत: यदिवाब्राह्मणो यजेतवार्हस्पत्यं मध्येनिधायाहुती नामाहुतीर्हुत्वातमभिघारये यदिवैश्योवैश्वदेवं यदिराजन्य ऐन्द्रियमितिवर्णै: सहसंयोग: सम्बन्ध: नचराजसूयस्य राजाऽस्या राज्यकामो राजसूयेन यजेतेतिश्रुते: तस्मात्तस्या राजसूय प्रकरणा दुत्कर्ष: ननुमानसवत्क्रियांगं भविष्यती त्युक्त मित्यतआह ॥ ५० ॥

## नसामान्यादप्युपलब्धेर्मृत्युवन्नहिलोकापत्ति: ॥ ५१ ॥

नसामान्यादपि क्रियांगत्वं मनश्चिदादीनां कुत: केनाप्यंशेन कस्यचित्सामान्यस्योपल ब्धिवदित्यतआह मृत्युवत् सचएवमृत्यु रित्यादित्य पुरुषस्याग्निर्वैमृत्यु रित्यग्नेर्मृत्युत्वंचतयोरैक्यं तद्वत् स्त्रियस्मादसौ वैलोकोग्निरिति लोकस्याग्नि भावापत्ति: स्यात् अत्यन्तवैलक्षण्ये लोकदृष्टान्त: ननुयत्रांजुहोति इतिपरेण लोकस्याग्नित्वं प्रतीयतेनचान्यचताद्दग्वाक्य मित्यत आह ॥ ५१ ॥

## परेणचशब्दस्यताद्विध्यंभूयस्त्वात्त्वनुबन्ध: ॥ ५२ ॥

परेणचायं वाक्लोक: एषोग्निश्चिदित्यभिनुत्तरेब्राह्मणे ताद्विध्यं केवलविद्या विधित्वं शब्दस्यप्रयोजनं लक्ष्यतेन शुद्धंकर्माङ्ग विधित्वंयतआह विद्ययातदा रोहतीत्यादि तथापुरस्तादपि यदेतन्मण्डल मित्युपक्रम्याहसो-मृतोभवतीत्यादि तत्सामान्यादिहापितत्वं मन्वनुबन्ध: कथंतर्हीत्यतआह भूयस्त्वात्त्वनुबन्ध: तुकार: कर्माङ्गतां व्यावर्तयति आधानादीनाम ग्न्यवयवानां संपाद्यानां भूयस्त्वादहुत्वा दनुकरणे मनश्चिदादीनां पुरुषार्थत्वमुक्तं संप्रति पुरुषस्यै वाभावादित्या क्षिपति ॥ ५२ ॥

## एकआत्मनःशरीरेभावात् ॥ ५३ ॥

एकेलोकायतिका देहव्यति रिक्तस्यात्मनोऽसत्वमाहुः ज्ञानादीनामात्म धर्मत्वेनाभि मतानां शरीरे सतिभावात् असतिचा भावात् शरीरस्यैव ज्ञानादयोधर्माः सिद्धान्तमाह ॥ ५३ ॥

## व्यतिरेकस्तद्भावाभावित्वान्नतूपलब्धिव-
## त् ॥ ५४ ॥

देहादात्मनो व्यतिरेकः कुतस्तद्भावा भावित्वात् तस्यदेहस्यभावेपि प्रा-णचेष्टादीना मभावित्वाद सत्वादतस्तेन देहधर्माः तत्रनिदर्शन मुपलब्धिवत् यथाभूत भौतिकाना मनुभवन मुपलब्धिर्विषयत्वेन नविषयि धर्मोव[illegible] दापततितद्वत् प्राणचेष्टादयोपि नदेहधर्माः पूर्वाधि करणे शरीरात्मनो र्भेदा-दात्म धर्माणाम सम्भवः शरीरद्वत्युक्तं एवमेक शाखागतोद्गीथ धर्माणांप्राणादि दृष्टीनांनहिशाखांतरी योद्गीथादिषु प्राप्तिरिति दृष्टांते नाक्षिप्यसमाधत्ते ॥५४॥

## अङ्गाव वद्धास्तु नशाखासुहि प्रतिवेद-
## म् ॥ ५५ ॥

ओमित्ये तदक्षरं लोकेषुपञ्च विधमित्येवमाद्याः प्रतिवेद मुपासना न-स्वशाखास्वेव उद्गीथादि श्रुत्यविशेषात् तुशब्दोव्यवस्था नियमभेदार्थः नन्वन्य-वेद पठितानां कथमन्यत्र परिग्रह इत्यतआह ॥ ५५ ॥

## मंत्रादिवद्वाऽविरोधः ॥ ५६ ॥

वाशब्दः शंकानिराकरणार्थः यथाकुत रसोतितेषां मन्त्रोनपठितस्तेषामपि तिममन्त्रणाश्मा दानमेवाश्मे रित्येवमादि मंत्राणां यत्रस्यदानं आदिशब्देन प्रयाजादीनां यद्दर्शतद्वत् शाखान्तरीयाणा मप्युद्गीथादि धर्माणांमद्दण

विरोध: पूर्वाधि करणे उद्गीथादिश्रुत्या सन्निधिंबाधित्वोद्गीथा द्युपासनानां सर्वशाखा सूपयोगउक्त: एवमन्यत्र व्यस्तोपासनस्यविधिश्रुति: फलश्रुतिश्च समस्तोपासनस्य संनिधानात् प्राप्तश्रुत्यर्थत्वं बाधित्वा विधेयमिति दृष्टान्ते नाचिप्य समाधत्ते ॥ ५६ ॥

## भूम्न:क्रतुवज्ज्यायस्त्वंतथाहिदर्शयति ॥५७॥

भूम्न:प्राचीन शालादिभि र्ध्यायस्य समस्तवैश्वानरस्य ज्यायस्त्वंविवक्षितं क्रतुवदिति निदर्शनं यथाक्रतोर्दर्श पूर्णमासादे: सांगस्यानुष्ठेयत्वं तथाहिदर्शयति श्रियस्मात् यथोक्तमस्माभिस्तथाश्रुतिर्दर्शयति मूर्धात्वेष इत्यादि पूर्वाधि करणे सत्यामपि सुतेजस्त्वादि गुणविशिष्टद्युलोकादि वैश्वानरोपासनानां फलभेदश्रुता वुपास्यैक्यमुक्तं तद्वदन्यासामपि ब्रह्मोपासनानामैक्यंस्यादिति दृष्टान्ते नाचिप्य समाधत्ते ॥ ५७ ॥

## नानाशब्दादिभेदात् ॥ ५८ ॥

शांडिल्यदहरोप कोशलादि विद्यानानाभिन्ना एवकुत: शब्दादि भेदात् वेदोपासीतेत्यादि शब्दधादिशब्देन रूपाख्यादि भेदस्तस्मात् पूर्वाधि करणे शब्दान्तरादि प्रमाणादुपास्तीनां भेदउक्तस्तद्वदिहापि विकल्प समुच्चय नियमयो: प्रमाणाभावात् यथाकाम्यमिति प्रत्युदा हरणे नाचिप्य समाधत्ते ॥५८॥

## विकल्पोविशिष्टफलत्वात् ॥ ५९ ॥

साचात्कारफल हेतुभूतानां विद्यानां विकल्प: कुत: अविशिष्टफलत्वात् एकस्यसाचात्कार फलस्यप्रत्येकं तासांदर्शितत्वात् एकस्मिन्क्रतेन्यस्य वैयर्थ्यमितिभाव: पूर्वाधि करणेह्यहोपासना मुपास्य साचात्कार पर्यंतत्वात् विकल्पनियम इत्युक्तम्वत् प्रतीकोपासनाना मपितस्यार्थत्वात् विकल्पइति दृष्टान्ते नाचिप्य समाधत्ते ॥ ५९ ॥

## काम्यास्तु यथाकामं समुच्चीयेरन्नवापूर्वहेत्वभावात् ॥ ६० ॥

तुशब्दःकाम्यानां विकल्पं व्यावर्तयति काम्याविद्या यथाकामं काममनतिक्रम्यवर्तन मेवकामानति क्रममाह समुच्चीये रन्नवेतितासां समुच्चयो विकल्पोवा इच्छान पूर्वहेत्वभावात् पूर्वहेतोः फलैक्यस्य काम्यस्याभावात् अतः फलभूमार्थि समुच्चयोनाम्यस्वताच सयएतमेव वायुमित्याद्याः पूर्वाधिकरणे प्रतीको पासनानां भिन्नफलत्वा यथाकाम मुक्तंतदयुक्तं फलप्राप्त्यङ्गाश्रितो पासनेषु समुच्चया नियमान फलभेदस्या नैकान्ति कत्वादित्याचिपति ॥ ६० ॥

## अंगेयथाश्रयभावः ॥ ६१ ॥

कर्माङ्गेषु उद्गीथादिषु यथाश्रयभावः यथैषामाश्रयाः स्तोत्रादयः संभूयभवन्ति एवंप्रत्ययाश्चपि ॥ ६१ ॥

## शिष्टेश्च ॥ ६२ ॥

यथाचाश्रयाः स्तोत्रादयः त्रिषुवेदेषु शिष्यन्त एवमाश्रिता अपिप्रत्यया ॥ ६२ ॥

## समाहारात् ॥ ६३ ॥

होतु सदनाद्दै वापिदुरुद्गीथ मनुसमा हरतीति होत्रात्कर्मण उद्गातुः स्वकर्मणस्तस्य समाहारः समाधानं तस्माल्लिंगात् समुच्चयः ॥ ६३ ॥

## गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥

विद्यागुणंच विद्याश्रयं सन्तमोंकारं वेदत्रयसाधारणं श्रावयतिते नेयंत्रयीत्यादिना अथवाकर्म गुणाना मुद्गीथादीनां सर्वप्रयोग साधारण्यश्रुतेरपि तदाश्रितानां समुच्चयः समाधत्ते ॥ ६४ ॥

## नवातत्सहभावाश्रुतेः ॥ ६५ ॥

नवेतिसमुच्चयनियम मव्यावर्तनंकुतः तत्सहभावाश्रुतेःतासामुपासनानां सहभावस्य समुच्चयस्या श्रुतेरश्रवणात् मन्यसमुच्चयोपिन श्रूयते इत्यत आह ॥६५॥

## दर्शनाच्च ॥ ६६ ॥

दर्शयत्यपि श्रुतिरसह भावमेवं विद्वैब्रह्मेत्यादिना ॥ ६६ ॥

## इति श्री सूत्रदीपिकायां तृतीयाऽध्याय-स्य तृतीयपादः ॥

एवंतावत्पूर्वपादे परापर ब्रह्मविद्यानां गुणोपसंहार निरूपणे न परि-माण मवधारितं इदानींतासां कर्मनिरपेक्षाणा मेवपुरुषार्थ साधनत्वं निरू-प्यते तत्रब्रह्मविद्यायाः केवलायाः पुरुषार्थत्वमाह ॥

## पुरुषार्थोऽतःशब्दादितिबादरायणः ॥ १ ॥

अतोवेदान्त विहितात् ज्ञानात् पुरुषार्थोभवतीति बादरायण आचार्यो-मन्यतेकुतःशब्दात्तरतिशोकमात्मविदिति श्रुतेः ॥ १ ॥

## शेषत्वात्पु रुषार्थवादो यथान्येष्वितिजै-मिनिः ॥ २ ॥

कर्तृत्वेनात्मनः कर्मशेषत्वात् तद्विज्ञानेकर्माणि चारयति विद्यास्तुतयेक-र्मांनु ज्ञानमेतत् व्रीहिप्रोक्षणादिव द्विषयद्वारेण कर्मसम्बन्ध एवेति एत-स्मिन्नवगत प्रयोजन आत्मज्ञानेया फलश्रुतिः सार्थवाद इतिजैमिनि राचा-र्योमन्यते यथान्येषुद्रव्यसंस्कार कर्मसुयस्य पर्णमयीत्यादिषु फलश्रुतिरर्थ वादस्तद्वत् आत्मविज्ञानस्य कर्माङ्गत्वेन लिंग मित्यत आह ॥ २ ॥

## आचारदर्शनात् ॥ ३ ॥

आचारो जनकादीनां ब्रह्मविदां जनको हेत्यादिनातस्य दर्शनात् गम्य-
यमाचार: श्रुतेरभाव ऽप्रयोजक: इत्यत आह ॥ ३ ॥

## तच्छ्रुतेः ॥ ४ ॥

तस्याविद्याया: कर्माङ्गत्वंयदेव विद्यतेत्यादिश्रुती: कर्मफलैविद्याजन्याति
शयाभावेन फलोपकार्यंग मित्यतआह ॥ ४ ॥

## समन्वारंभणात् ॥ ५ ॥

तंविद्याकर्मणी समन्वारभेते इत्यस्मात् तथापिक्रमस्तु प्रवृत्तस्य नात्म-
ज्ञानावसर इत्यत आह ॥ ५ ॥

## तद्वतोविधानात् ॥ ६ ॥

तद्वतोज्ञानवत एकाकुटुम्ब इत्यादिना विधानात् तथापिकर्मणां पा-
क्षिकत्वान्न नित्यवदेवज्ञानांग मित्यत आह ॥ ६ ॥

## नियमाच्च ॥ ७ ॥

कुर्वन्नेत्यादि चकारो नियमाभावेपि ज्ञानस्या पुरुषार्थता माह सूत्रोक्तं
राद्धान्त माह ॥ ७ ॥

## अधिकोप देशात्तुवादरायणस्यैव तद्दर्श-
## नात् ॥ ८ ॥

तुशब्दो जैमिनीयंमतं व्यावर्तयति कुत: अधिकोप देशात् संसारिण:
निरुपाधिकस्य परमात्मन: सर्वेषुवेदांतेषु देशात् यन्मतं वादरायणस्यैवत
त्तथैवस्थितं तद्दर्शनात्य: सर्वज्ञइत्यादिभ्य: ननूक्तमाचारा दित्यत आह ॥८॥

## तुल्यन्तुदर्शनात् ॥ ९ ॥

तुशब्दःपूर्वपक्षा चारस्यविद्यान्तर विषयत्वमाह तुल्यं समाचारस्य दर्शनं एतद्धस्मे त्यादिना यक्ष्येत्यादि श्रुतिरस्ति मित्यतआह ॥ ९ ॥

## असार्वत्रिकी ॥ १० ॥

असर्वविद्या विषयेयंश्रुति: किन्तुप्रकृतोद्गीथ विद्याविषयैवतं विद्येत्यादि-नाफले समुच्चयश्च इत्यत आह ॥ १० ॥

## विभागःशतवत् ॥ ११ ॥

विभागोयं नसमुच्चयः विद्याद्यान्यस्यारंभणं कर्मणाऽन्यस्य शतवत् यथाशत-माभ्यां दीयतामित्यत्र विभागस्तद्वत् ननूक्तंतद्वतो विधाना दित्यत आह ॥११॥

## अध्ययनमात्रवतः ॥ १२ ॥

नमात्रवतः यदप्युक्तं नियमाश्चेत्यत आह ॥ १२ ॥

## नाविशेषात् ॥ १३ ॥

त्वदुक्तंनकुर्वन्नेवेत्यविदुषइति विशेषस्या श्रवणात् प्रकरण सामर्थ्या-द्विद्वानेव सम्बध्यत इत्यत आह ॥ १३ ॥

## स्तुतयेऽनुमतिर्वा ॥ १४ ॥

वाशब्दो ऽविदुषस्तयानियाम वस्याविध्येयत्वमाह नतुकर्मश्रुति विद्यास्ताव कत्वमित्यत्रापि किंनियामक मित्यत आह ॥ १४ ॥

## कामकारेणचैके ॥ १५ ॥

अवगतपरमार्था: प्रजांनकामयन्ते कामकारेणेति श्रुत्यर्थनिर्देश: चकारो विद्वदनुभवं दर्शयति ननुत्वाश्रयादि शरीरिकत्वं कर्मा भाव इत्यत आह ॥ १५ ॥

## उपमर्दंच ॥ १६ ॥

क्रियाकारका देरामनन्ति यत्नत्वस्ये त्यादिना चकारस्ताद्दक् प्रत्ययं समुचिनोति तथापिकथं ब्रह्मस्थस्य कर्माभाव इत्यतआह ॥ १६ ॥

## ऊर्द्ध्वरेतस्सुचशब्देहि ॥ १७ ॥

ऊर्द्ध्वरेतस्सु आश्रमेषु विद्याश्रूयते नतथकर्माणि चकारःकर्मिणां विद्यानधिकार माहतएवन संतीत्यत आह शब्देहि हियस्मात् त्रयोधर्मस्कन्धा इत्येतस्मिन् शब्देवगम्यते पूर्वाधि करणे ऊर्द्ध्वरेतः स्वाश्रमेषुविद्यायाः कर्मनि-रपेक्षता उक्तादिदानींतएवाश्रमान संतीत्याक्षिपति अथवा पुरुषार्थाधि करणे ज्ञानस्यासङ्गा यस्य मोक्षफलत्वमुक्तं तन्नसम्भवति गृहस्थादीनामपि ब्रह्मनि-ष्ठत्वस्य संस्थानस्या भिध्यानात् तदनुष्ठित कर्मणाच ज्ञानसहकारित मतीति रित्याक्षिप्यते ॥ १७ ॥

## परामर्शं जैमिनिरचोदना चापव— दतिहि ॥ १८ ॥

जैमिनिराचार्यं त्रयोधर्मस्कन्धा इत्यादिशब्दनिर्दिष्ट फलनामा श्रमाणां परामर्शमात्रं मन्यते कुतः अचोदनायतःविधायक शब्दाभावइत्यर्थः ननुविधिः कल्पनीय इत्यतआह अपवदति हियस्मादादारहवा इत्यादिना अपवदति अतोनकल्प्योविधिः चकारोगृहस्थस्य प्रसिद्धि विरोधमाह परिहरति ॥ १८ ॥

## अनुष्ठेयंबादरायणः साम्यश्रुतेः ॥ १९ ॥

अनुष्ठेयमाश्रमांतरं बादरायण आचार्योमन्यते वेदेश्रवणात् नचाधर्यं व्यादिविषयत्वं तत्कुतः साम्यश्रुतेः गार्हस्थ्येन त्रयोधर्मस्कन्धा इत्यादिना ननुतावतापि विधिर्नसिद्धो दित्यतआह ॥ १८ ॥

## विधिर्वाधारणवत् ॥ २० ॥

वाशब्दोविध्यभावं निराकरोति विधिरेवायम पूर्वार्थत्वात् धारणवत् उपरिहि देवेभ्यो धारयतीत्यत्र तद्वत् सतिचाश्रमान्तरेब्रह्मसंस्थत्वं नकर्मिणा मित्यभिप्रायः एवन्ताव दनुष्ठेय माश्रमान्तरंगार्हस्थ्येन साम्यस्तुते रित्युक्तंतर्हि रसतमस्याना मंशाश्रितत्वेन स्वर्गलोक माहवनीय इत्यादिस्तुति साम्यात् स्तुत्यर्थत्वमिति प्रत्युदाहरणेन सूत्रावयवेनाक्षिप्या वयवान्तरेण समाधत्ते ॥२०॥

## स्तुतिमात्र मुपादाना दितिचेन्ना पूर्व— त्वात् ॥ २१ ॥

सएषरसानां रसतम इत्यादिस्तुतिमात्रं नविधिः उद्गीथादि कर्माङ्गानां स्तावकत्वेनो पादानादिति चेत्तन्न कुतः अपूर्वत्वात् रसतमाद्यर्थस्य नह्यवि- धिकल्पन मेवदोष इत्यत आह ॥ २१ ॥

## भावशब्दाच्च ॥ २२ ॥

भावशब्दो विधिशब्द उपासीतेत्यादि चकारो ऽपूर्वाधिगमे कल्पन मदोषइत्याह एवंतावत् उद्गीथादेः स्तुत्यर्थत्वा भावकाशादुपास्यविषय समर्पकत्वं रसतमत्वादेर्न्याय इत्युक्तंतच्छ्राख्यानानामपि विद्यास्तुत्यर्थत्वात्काश काशात्पारिप्लव शेषत्वेऽप्यायो नुष्ठानपर्यवसानत्वं सम्भवतीति दृष्टान्तेन सूत्रावयवे नाक्षिप्य समाधत्ते ॥ २२ ॥

## पारिप्लवार्था इति चेन्न विशेषि- तत्वात् ॥ २३ ॥

अथहयाज्ञवल्क्यस्येत्याद्याख्यानश्रुतयः पारिप्लवार्था इतिचेत् तन्न कुतः पारिप्लवमाचक्षीतेत्युपक्रम्य मनुर्वैवस्वत इत्यादिना विशेषितत्वात् नन्वेव- मपार्थं तद्विनियोगवर्णना दित्यत आह ॥ २३ ॥

## तथाचैकवाक्यतोपबन्धात् ॥ २४ ॥

चकार उपलक्षणार्थत्वं वारयति तथा आख्यानानां पारिप्लवार्थत्वे ऽसतिसन्निहित विद्योपयोगोऽन्याय्य स्तद्वतोपाख्यानानां कुत: एकवाक्योप बन्धात् तत्तदाख्यानानां विद्याभि: सम्बन्धस्योपलंभात् पूर्वाधि करणे आख्यानानां विद्यासन्निधि विद्याशेषत्वमुक्तं तर्हिविद्या प्रकरणे यज्ञेनेत्यादि वाक्येन यज्ञादीनां विद्यायां विनियोगात् तेषांविद्या शेषत्वमिति दृष्टान्त नाभिप्राय समाधत्ते ॥ २४ ॥

## अतएवचाग्नींधनाद्यनपेक्षा ॥ २५ ॥

चकार: कारणांतरं व्यावर्तयति यतोऽज्ञानात्पुरुषार्थ: अतएवविद्याया: स्वफलेऽग्नींधनादि कर्मणामनपेक्षा पूर्वाधि करणे विद्याफले कर्मानपेक्षा उक्तायथा फलेतद्वदुत्पत्तावपि इति दृष्टांते नाभिप्राय समाधत्ते ॥ २५ ॥

## सर्वापेक्षाचयज्ञादिश्रुतेरश्ववत् ॥ २६ ॥

चकाराद्विद्याया उत्पत्तावनपेक्षत्वं वारयति सर्वापेक्षा सर्वस्या श्रमा- दिकर्मजातस्यविद्याया उत्पत्तावपेक्षाकुत: यज्ञादिश्रुते: विविदिषन्ती त्यादिना श्रुत्वायाअश्ववदिति योग्यतायांनिदर्शनं अश्वोरथस्य वहनेपेक्षितोन लांगलकर्षणे विद्यायाउत्पत्तौ कर्मपेक्षाअध्यात् फलेतर्हिकर्मापेक्षं न भवतुनद्यतो स्पता- यन्य दनुष्ठेय मित्यत आह ॥ २६ ॥

## शमदमाद्युपेत: स्यात्तथापितुतद्विधेस्तदं- गतयातेषामवश्यानुष्ठेयत्वात् ॥ २७ ॥

तुशब्द: शंकानिराकरणार्थ: कुत: तद्विधे: तेषांशमादीनाम् इत्याद्युपक्रम्य पश्येदितिविधे: सविधि: स्वतन्त्र इत्यत आह तदंगतयातस्या विद्याया अंगत्वेन विधियैतस्ततो विद्यार्थिनां तेषामवश्या नुष्ठेयत्वादंतरंगसाधनत्वंतेषां

पूर्वाधिकरणे विविदिषंति पंचमलकारा अयमेव विधिरलः एवंचानर्थं भवतीति विधिरिति दृष्टान्तं नाश्रित्य समाधत्ते ॥ २७ ॥

## सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्॥२८॥

नचवापर्व विदीत्यादिना सर्वान्नानुमति रनुज्ञामापि प्राणात्यये परस्या-मापदि कुतः तद्दर्शनात् तथा प्राणात्यये सर्वान्नभक्षणस्य मटचीहतेरित्यादिना दर्शनात् ननु श्रुतस्य कथमाक्षेपः क्रियते इत्यत आह ॥ २८ ॥

## अबाधाच्च ॥ २९ ॥

आहारशुद्धौ सत्त्वशुद्धिरित्यादेः शास्त्रस्य च शिष्टाचारस्य च ननु-शास्त्रद्वयं विरुद्धविषयं भवतीत्यत आह ॥ २९ ॥

## अपि च स्मर्यते ॥ ३० ॥

जीवितात्यय मापन्नो योऽन्नमत्ति यतस्ततः इत्यादिना आपत्कल्प मपि स्मर्यतेपीत्याद्यनन्तु निषेधाभावे नेदमनुज्ञासामर्थ्यात्कल्पयितुं शक्य मित्यत आह ॥ ३० ॥

## शब्दश्चातोऽकामकारे ॥ ३१ ॥

अकामकारः कामकारनिवृत्ति प्रयोजनाः कठानां तस्मात् ब्राह्मणः सुरां न पिबेदिति सर्वान्ननिषेधकशब्दः पतीक्षाविधेरभावात्कोऽप्युपपन्नः चकारो बौद्धिकं प्रतिषेधमाह पूर्वाधि करणे यथा शास्त्रान्तर विरोधात् सर्ववचनं विद्यायाः स्तावकमुक्तं तद्वद्विविदिषा वचनमपि विद्यायाः स्तावकमिति अन्यथाकर्मणा मनेकत्वा भावात् मुमुक्षोरेवा नुष्ठेयमिति दृष्टान्तं नाश्रित्य समाधत्ते ॥ ३१ ॥

## विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥

चकारस्त्वर्थे सर्वमुमुक्षो रेवानुष्ठेयत्वं कर्मणां वारयति किं त्वनुष्ठेय

मुमुक्षूणामप्याश्रमकर्माग्निहोत्रादिकं कुतः विहितत्वात् यावज्जीव मग्निहोत्र मित्यादिना एवंविधया साधनानि नस्युरित्यत आह ॥ ३२ ॥

## सहकारित्वेनच ॥ ३३ ॥

सहकारित्वं साधनत्वं यज्ञेनेत्यादिना विद्यासाधनत्वेनापि विहितत्वा दित्यर्थः ननुतर्हिदर्शपौर्णमासादीनां विद्यासहकारित्व पक्षेकर्म भेदोत आह ॥ ३३ ॥

## सर्वथापितएवोभयलिङ्गात् ३४ ॥

तएवाग्नि होत्रादयोधर्मा अनुष्ठेयाः कुतः उभयलिंगात् श्रुतिस्मृतिलिंगात् विविदिषंती त्यादिश्रुतिः अनाश्रितः कर्मफलमित्यादिका स्मृतिस्तए हि प्रसिद्धवदुत्पन्नानां कर्मणांविनियोगंकुर्वं त्यावेदकस्य लिंगंतस्मात् ननु-साधन संपन्नस्ययदि विद्यायां कश्चनातिशयः श्रुतोवादृष्टोवास्यात तदायज्ञा-दीनां सहकारित्वं कल्प्यमानमुचितं स्यादित्यतआह ॥ ३४ ॥

## अनभिभवंचदर्शयति ॥ ३५ ॥

एषह्यात्मानन्नश्यतियंब्रह्मचर्येणेत्यादिनाचकारोनप्रत्यक्षमप्याह पूर्वाधि-करणे नित्यानां यज्ञादीनां विद्यायां पृथकनियोगात् ननित्यानित्य संयोग विरोध इत्युक्तंमाभूत गृहस्थाश्रमकर्मणि विरोधः विधुरादिकेपुरुषा दित्या-शङ्क्य समाधत्ते ॥ ३५ ॥

## अन्तराचापितुतद्दृष्टेः ॥ ३६ ॥

अन्तरा विधुरादीनां मन्तरालवर्तिनां विद्याया मधिकारः कुतः तद्दृष्टे-स्तस्याधिकारस्य रैक्वादिषुदृष्टेः तुकारस्त्वं तरालवर्तिना मनधिकारं व्यावर्त-यति चकारोन्येषा मप्यधिकारं समुच्चिनोतिनन्विदं दर्शनमस्मार्तं मित्यत आह ॥ ३६ ॥

## अपिस्मर्यते ॥ ३७ ॥

संवर्तप्रभृतीनां मन्तराळवर्तिनां महायोगित्वं पुराणादौ नहुकर्मंहीना नामश्रुयान्त: करणानां कथंविद्याया मधिकार इत्यतभाह ॥ ३७ ॥

## विशेषानुग्रहश्च ॥ ३८ ॥

तेषामपि जपोपवासादि कर्मविशेषै रनुग्रह:चकारा ज्जन्मान्तर कृतैरपि एवंचेदा श्रमकर्मणा मनुष्ठानं व्यर्थं मित्यतभाह ॥ ३८ ॥

## अतस्त्वितरज्ज्यायोलिंगात् ॥ ३९ ॥

तुशब्द:आश्रमकर्मणा मनुष्ठानस्या वैयर्थ्यमाह अतोन्तरालवर्तित्वादि नग्दाश्रम वर्तित्वंज्यायः श्रेष्ठंविद्या साधनं कुतः श्रुतिस्मृतिलिङ्गाश्च श्रुतिलिंग मनाश्रमीन तिष्ठेदित्यादि तस्मात चकारस्ताभ्यां विहितत्वमप्याह पूर्वाधि करणे ऽनाश्रम कर्मिणामपि विद्यासाधनत्वमुक्तं एवंचेदाश्रम भ्रष्टानामपि तद्वदेवानाश्रमि.कत्वेन विद्यासाधनत्व मिति दृष्टान्ते नाक्षिप्य समाधत्ते ॥३९॥

## तद्भूतस्यतुनातद्भावोजैमिनेरपिनियमात द्रूपाभावेभ्य: ॥ ४० ॥

तुशब्दे उत्तमाश्रमाधिरूढस्यामरणं तस्मिन्न वावस्थानमाहतद्भूतस्यसंन्या-साश्रमाश्रमिणो ऽतद्भाव: अतदाश्रमावस्थितिस्तित्परित्यागमात्रं वार्ने।तज्ज-मिनि राचार्यस्य मतंकिमु बादरायणस्य कुत: नियमातद्रूपा भावेभ्य: नियमस्ततोन पुनरियादिति अतद्रूपं ययाब्रह्मचर्यादा श्रमश्रयगमनं तद्रूप्यते शब्देनैवं संन्यासादिभ्य: आश्रमान्तरं अभावश्च शिष्टाचारस्य संन्यासादिनां गार्हस्थ्य स्वीकारस्तेभ्य: पूर्वाधिकरणे शास्त्राभावश्च तत्प्रत्यवरोहितमित्युक्तं तद्वदेवशास्त्रा भावास्तेषां प्रायश्चित्त मपीत्याक्षिपति ॥ ४० ॥

## नचाधिकारिकमपिपतनानुमानात् तद-योगात् ॥ ४१ ॥

अधिकारलक्षणे षष्ठाध्याये उक्तमाधिकारिकं ब्रह्मचारीपशुबन्धहढा-धानस्य प्रायश्चित्तत्वादिति अवकीर्णी अयमिति ब्रह्मचारी स्त्रियमुपेयाद्गर्दभं पशुमालभेतेति ब्रह्मचारिणः स्त्रीगमने गर्दभः पशुः सोऽपि तद्वदुपनयन होमवत् यथोपनयन होमो लौकिकाग्नौ तद्वत् अयमपि पशुर्लौकिक एवक्तः आधा-नस्य दारसंग्रहपुरःसरत्वाद्ब्रह्मचारिणो ऽप्राप्तत्वादिति यदुक्तं तदपि नैष्ठिक-ब्रह्मचारिणः एवंप्रायश्चित्तं कुतः आरूढो नैष्ठिकं धर्ममित्यादिना अप्रतिसन्धेयस्य पतनस्यानुमानात् स्मरणात् छिन्नशिरस इवप्रतिक्रिया भावान्नैष्ठिकस्य प्रायश्चित्ता योगादिति पूर्वपक्षः रात्रा समाप्त ॥ ४१ ॥

## उपपूर्व मपित्वेके भावमश नव-त्तदुक्तम् ॥ ४२ ॥

तुशब्दः प्रायश्चित्ताभावं व्यावर्तयति एके आचार्याः गुरुदारादिभ्यो ऽन्यत्र ब्रह्मचर्यं अवनमुप पूर्वमपि उपपातकमप्याहुः किमुतप्रायश्चित्तस्य सत्वं अतः प्रायश्चित्तस्याभावं मन्यामहे अशनवत् यथामधु मांसादिभक्षणं उपकुर्वाण-स्यपुनः संस्कारः प्रायश्चित्तं तद्वत् तदुक्तं प्रमाणलक्षणे समाविप्रतिपत्तिः स्यात् यववराहादि कारण पूर्वपक्षे आर्यम्लेच्छयोर्यववराहादिषु समाविप्र-तिपत्तिः स्यात् इति सूत्रं सिद्धान्तं तेनव्यवहारादि शब्दानामार्ये प्रसिद्धानामेव स्वीकार इत्यत्र तदर्थं सूत्रभाष्यस्ववातश्चिमिषत्वादिति याशब्दोक्तं अप्रसिद्धं व्यावर्तयति शास्त्रस्यैवार्यं प्रसिद्धिः स्वीकरणीया कुतः तस्य शास्त्रस्य यत्रान्या-ओषधयो म्लायन्ते इत्यादि निमित्वात् नियामकत्वात् अथवातस्यार्थस्य प्रसिद्धेः शब्दार्थसंगति पक्षे निमित्तत्वात् पूर्वाधि करणे अरूढपतितानामपि प्रायश्चित्त मस्तीत्युक्तं प्रायश्चित्तवदात्र आरोपितेषां स्यादिति दृष्टान्ते नाशिष्य समाधत्ते ॥ ४२ ॥

## बहिस्तूभयथास्मृतेराचाराच्च ॥ ४३ ॥

तुशब्दः कृतप्रायश्चिते व्यवहाराभावमाह यद्यवकोर्णित्व मुपपातकं यदि-
वामहापातकं उभयथापि शिष्टैस्ते कृतप्रायश्चित्ता अपिबहिष् कार्याः कुतः
स्मृतेराचाराच्चस्मृतिरारूढयतित मित्यादावाचारः शिष्टानांचकारा प्राय-
श्चिताभिधानादपि पूर्वाधि करणे वचनाद व्यवहार्यत्वमुक्तं तद्दर्शयति हीतिव-
चना दंगावबद्ध मुपासनं स्वामिनइति हष्टान्ते नाचिच्य समाधत्ते ॥ ४३ ॥

## स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥

अंगावबद्धा न्युपासनानीति स्वामिनोयजमानस्य कर्माणीत्यात्रेय आचा-
र्यो मन्यते हेतुमाह फलश्रुति रितिवर्षति ह्यास्य त्यादेरिति पूर्वपक्षः राद्धा-
न्तस्तु ॥ ४४ ॥

## आर्त्विज्यमित्यौडुलौमिस्तस्मै हिपरि
## क्रीयते ॥ ४५ ॥

आर्त्विज्यमित्यौ डुलोमिराचार्यो मन्यते हियस्मात् तस्मैसांग कर्मसिद्ध्यर्थे
यजमानेनर्त्विक परिक्रीयते पूर्वाधिकरणे बकोदाल्भ्य इतिवाक्यशेषा दंगो-
पासन मृत्विक्कर्मेत्युक्तं एवमिहापि विधिरश्रित वाक्यशेषादय मुनिरिति
हष्टान्ते नाचिच्य समाधत्ते ॥ ४५ ॥

## सहकार्यंतरविधिः पक्षेणतृतीयंतद्वतोवि-
## ध्यादिवत् ॥ ४६ ॥

सहकार्यंन्तरस्य मौनस्य वाक्यपांडित्यवद्विधिरेवाश्रयणोयः यदुक्तं तन्मौन
मित्यतआह तृतीयंवाल्य पांडित्य' चोक्तंकस्मैत दित्यत आह तद्वतआत्मानं
विदित्वे त्यादिनोक्तोयः सन्यासीतद्वान् विद्यावान्तस्य तस्यचेदृशे विधान-

मित्यत आह पक्षेणेति भेद दर्शनस्य प्राबल्यमभिप्रेत इत्यर्थः सहकारि विधानिनिदर्शनं विश्वादिवत् यथापौर्णमासादावाधानादिकं तद्वत् विद्यार्थो त् संन्यस्यति तर्हिकस्मात् छांदोग्ये कुटुम्ब इत्यादिना गृहस्थेनोपसंहार इत्यत आह ॥ ४६ ॥

## कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४७ ॥

तुशब्दो विशेषणार्थः कृत्स्नभावास्य विशेष्यते बहुलायासानिहि बह्वन्यान्यकर्माणि यज्ञादीनि तं प्रतिकर्तव्यतयो पदिष्टानि आश्रमान्तर कर्माणि यथा संभवमहिंसेन्द्रियसंयमनादीनि तस्यापि विद्यन्ते तस्मात् गृहमेधिनोपसंहारेण विरुद्धति ननु यथा ब्रह्मचारि वानप्रस्थयोर श्रौतत्वं न तद्दृष्टान्ते नेतरस्याप्यस्य श्रौतत्वमित्यत आह ॥ ४७ ॥

## मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥

इतरेषां ब्रह्मचारिवानप्रस्थाश्रमवृत्तीनामप्युप देशात्त्रयोधर्मस्कन्धा इत्यादिनाकिंवत्मौनवत्संन्यास उपलक्षणमेतत् गृहस्थस्यापि संन्यासवत् गृहस्थवत् ब्रह्मचारिवानप्रस्थयोरपि श्रौतत्वमेवस्यादित्यर्थः पूर्वाधिकरणे मौनशब्दस्य ज्ञानातिशये प्रसिद्धत्वात् मौनविधि राश्रितः एवंबालशब्दस्यापि कामचारादि कारिणि प्रसिद्धत्वात् अत्रापितदर्थ इति दृष्टान्ते नाक्षिप्य समाधत्ते ॥ ४८ ॥

## अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥

बाल्यं न तिष्ठासेत्यत्र बाल्येना बाल्यार्जनामेतत् यद्रागद्वेषादि अनावि ष्कुर्वन् अप्रकटयन् न तु कामचारादिकृतः रागादिराहित्ये विद्योपकारस्यान्वयात् पूर्वाधि करणे विद्योपयोगाच्चरागादिकं बालशब्दार्थः. सम्भवादित्युक्तं अत्रापियुक्तं विद्यानांफलस्येहलोक एवसम्भवात् ऐहिकफला विद्येति दृष्टान्ते नाक्षिप्य समाधत्ते ॥ ४८ ॥

## ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शना-त् ॥ ५० ॥

कर्मान्तरेणा सतिप्रतिबन्धे ऐहिकमस्मिन्नेव जन्मनि विद्याफलं कर्मान्तरेण सतिप्रतिबन्धे जन्मान्तरेपि विद्याजायते कुतः गर्भस्थएव वामदेवः प्रतिबुबुधे ब्रह्माहमभवमिति वदन्तोजन्मान्तरे संचितात्तु साधनाज्जन्मांतरे विद्योत्पत्तिं दर्शयति पूर्वाधिकरणे विद्याया एकरूपेपि यज्ञादीनां साधनानाम नेकरूपता द्दश्यास्यादित्युक्तं तर्हि भनियत साधनत्वान्मोक्षेप्य नियतएवस्यात् कर्म फलव-दिति दृष्टान्ते नाश्रित्य समाधत्ते ॥ ५० ॥

## एवंमुक्तिफलानियमस्तदवस्थावधृतेस्तद-वधृतेः ॥ ५१ ॥

यथाविद्या साधनानां विद्याफले विशेषदृष्ट परत्वचेतिनैवं मुक्तिलक्षणे-फलेकुतस्त दवस्थावधृतेः मोक्षावस्थायाब्रह्मरूपाया एकरूपत्वे नास्थूलमनणि स्वादिनाच श्रुतेरवधारणात् पदाभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥ ५१ ॥

## इति श्री मत्परमहंस सपरिव्राजकाचा र्यानन्दात्मपूज्य पादशिष्यस्य श्री शंकरानंद भगवतः कृतौसूत्रदीपिकायां तृतीयाऽध्या-यस्य चतुर्थः पादः ॥ ३ ॥

तृतीयेध्याये साधनचिंता वृत्ताचतुर्थे फलचिन्ता प्रवर्तते तत्रापि प्रथमेन पादेन जीवन्मुक्तिः प्रतिपाद्यते तत्राप्यावृत्त्याद्यधिकरणचतुष्टयं प्रासंगिकं मध्यसुसाधनाध्याय शेषमपिप्रमाणफलत्वेनाच फलाध्यायेसंगतं तत्राह यत्तो-पासनानां श्रवणादीनां चार्थसिद्धा वृत्तिरित्याह ॥

## आवृत्तिरसकृदुपदेशात् ॥ १ ॥

प्रत्ययानामावृत्तिः करणीयाकुतः श्रोतव्योनिदिध्यासितव्य इत्यादिना ऽसकृदुपदेशात् ननुश्रवणादीनां प्रत्येकं सकृत् श्रवणप्रत्ययावृत्तिः कथंसिद्ध-तीत्यत आह ॥ १ ॥

## लिङ्गाच्च ॥ २ ॥

रश्मींस्त्वंपर्यावर्तयतादित्यादेः चकाराद्दर्शनसामर्थ्यादपि पूर्वाधिकरणे आत्म ज्ञानावृत्तिः करणीये त्युक्तन्तत्रजीवो नित्यप्रत्यक्षः नित्यापरोक्ष एवात्मातस्य ज्ञानस्यार्थं नियमावृत्ति रित्याक्षिप्य समाधत्ते ॥ २ ॥

## आत्मेतितूपगच्छन्तिग्राहयंतिच ॥ ३

तुशब्दोन्यचत्वं यहंव्यावर्तयति योयंपरमात्मेतित्वं वाअह मस्मीत्यादिनाच उपगच्छन्ति गृह्णितिच ग्राहयंत्यपिच एषत आत्मेत्यादिना पूर्वाधिकरणे जीवपरमात्मनोर भेदग्रहउक्तः एषतआत्मेत्यादिश्रुत्या तद्वदात्मनो ब्रह्मेत्या-दावपि प्रतीकेप्यभेदग्रह इति दृष्टान्ते नाक्षिप्य समाधत्ते ॥ ३ ॥

## नप्रतीकेनहिसः ॥ ४ ॥

प्रतीको पासनेमनो ब्रह्मेत्यादौ नात्मेति ग्रहीतव्यम् हियस्मात् सउपा-सको नात्मत्वेन प्रतीकानि ग्रहीतुंशक्तः पूर्वाधिकरणे मनोब्रह्मेत्यादौ नैकदृष्टि रित्युक्तम् एवं चेन्नियामका भावात् ब्रह्मणिमन आदिदृष्टिः करणीयेति वुद्धि सान्निध्यादा क्षिप्य समाधत्ते ॥ ४ ॥

## ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

मनआदौ ब्रह्मदृष्टिः कार्याब्रह्मण उत्कर्षात् उत्कृष्टदृष्टेः निकृष्टे कृतायां निकृष्टस्योत्कृष्टता भवति ॥ ५ ॥

## आदित्यादिमतयश्चांग उपपत्तेः ॥ ६ ॥

उद्गीथाद्यंगेषु आदित्यादिमतयः कर्तव्याः कुतउपपत्तेः एवंह्युद्गीथादीना मादित्यादि मतिसंस्कारे कर्मसमृद्धिरतिशयः स्यात् चकारो नादित्यादिषु उद्गीथादि मतयइत्याह एतच्चतुष्टयं प्रासंगिकं पूर्वाधिकरणे आदित्यादि मतय उद्गीथादि संस्कारत्वेन करणीया इत्युक्त तासुयथाकर्म परतंत्रत्वात् नोभयनियमः एवमन्यास्वपि विद्यासु अविशेषादिति बुद्धिस्थत्वेन दृष्टान्ते नाक्षिप्य समाधत्ते ॥ ६ ॥

## आसीनःसम्भवात ॥ ७ ॥

प्रतीकाद्युपासनासु आसीन एवोपासनां कुर्यात् कुतः सम्भवात् प्रत्ययावृत्ते प्रविष्टस्य ननूपासनस्य निर्गुण ब्रह्मज्ञानवदनियतिरासनस्य कुतोनस्या दित्यत आह ॥ ७ ॥

## ध्यानाच्च ॥ ८ ॥

ध्यायत्यर्थ एषएकसमान प्रत्यय प्रवाहकरणं ध्यायतिश्च प्रशिथिलांगचेष्टेषु प्रतिष्ठितदृष्टिष्वेक विषयाक्षिप्तचित्तेषु वकादिषुदृष्टा चकार आसीनस्य नियममाह ननुमच्छता मपिध्यायत्यर्थः संभावित इत्यत आह ॥ ८ ॥

## अचलत्वंचापेक्ष्य ॥ ९ ॥

ध्यायंतीव पृथिवीत्यादावुक्तं चकारो गमनध्यानयो रितरेतरव्याहतिरित्याह ननुकिमिदं यौक्तिकमेवेत्यां शंक्यनेत्याह ॥ ९ ॥

## स्मरन्तिच ॥ १० ॥

समेशुचौदेशे इत्यादिना चकारात्पठंत्यपि त्रिरुन्नत मित्यादिना पूर्वाधिकरणे आसीनेन समान प्रत्ययः प्रवाहःकरणीयः संभवादित्युक्तं अत्रापि वैदिकत्वेन दिग्देशादि नियमः संभावित इति दृष्टांते नाक्षिप्य समाधत्ते ॥ १० ॥

## यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥

दिग्देशकालेषु ननियमः यत्र यस्यां दिशि यस्मिन्काले वा मनः स्वास्थ्यं तत्रैवो पासनं कुतः अविशेषात् विशेषा नुपलंभात् पूर्वाधिकरणे दिग्देशाद्य नियमत्वात् चित्तप्रसादा विशेषेण हेतुना तथाकाम्या नामपि यावदिच्छं चिन्तनमिति दृष्टान्ते नाश्रित्य समाधत्ते ॥ ११ ॥

## आप्रायणात्तत्रापि हि दृष्टम् ॥ १२ ॥

अभ्युदयफलानां प्रत्ययानामाप्रायणात् आमरणादावृत्तिः क्रियस्मात् तत्रापि मरणेपि यचित इत्यादिश्रुतिभ्यः यंयंवापीत्यादिस्मृतिभ्यश्च प्रत्ययावर्त्तनं दृष्ट अपिशब्दात्पूर्वमपि सातत्येतदा तद्भाव भावित इत्यादिस्मृतिभ्यः पूर्वाधिकरणे सदातद्भाव भावित इत्यादिस्मृत्याप्रा यणादभ्युदय प्रत्ययानामा वृत्तिरुक्ता तद्वदत्रापि प्रकृतिस्त्वां नियोक्ष्यतिनाभुक्तंक्षीयते कर्मेत्यादिस्मृतिभ्यो विदुषः प्रारब्धानाशो त्तराघविशेषः नचपूर्वस्य विनाशइति दृष्टान्ते नाश्रित्य समाधत्ते ॥ १२ ॥

## तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥

तस्यब्रह्मणो धिगमे उत्तराघस्याश्लेषः पूर्वाघस्य विनाशः कुतस्तद्व्यपदेशात्तयोरश्लेष विनाशयोर्व्यपदेशः अश्लेषस्यतद्यथा पुष्कर पलाश इत्यादिना विनाशस्य तद्यथेषीकातूल इत्यादितस्मात् पूर्वाधिकरणे अत्रापेक्षेण विनाशानुक्तौ भवेतांमास्तु सुकृतस्यामुक्तस्ये त्याश्रित्य समाधत्ते ॥ १२ ॥

## इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥

इतरस्य सुकृतस्यापि यथादुष्कृतस्यैव महासंश्लेषः एतदुपलक्षणं विनाशस्यापि उभेउहैव एषतरतीत्यादिश्रुतिः तुशब्दोवधारणार्थः पातिशरीरस्य पतने

यत इदंसिद्ध' शरीरस्य पातेविदुषी मुक्तिर्भवत्येव पूर्वाधि करणे सुकृतस्यापि क्षयउक्त: तथाचसद्य: शरीरपात: स्यादित्याक्षिप्य समाधत्ते ॥ १४ ॥

## अनारब्धकार्येएवतुपूर्वेतदवधे ॥१५॥

तुशब्द: आरब्धकार्ययो: क्षयंव्यावर्तयतिद्ध पूर्वंसुकृते दुष्क तेतेनारब्धकार्ये तयोरपिइतरयोरि याक्षयं व्यावर्तयति एवकार: कुतोयं नियमइत्याह तदवधेस्तस्य शरीरपातस्यावधे: कारणात् तस्यतावदेव चिरमित्यादि वाक्येन पूर्वाधिकरणद्वयेण सगुणविद्यायां निर्गुणविद्यायां चानारब्धकार्ययो: सुकृतदुष्कृतयो: क्षयउक्तस्तत्र यथानिर्गुण विद्याया मुत्पन्नाया मन्निरुक्तो वा यनुपयोग: एवं सगुणाया मपीति दृष्टान्तो नाक्षिप्य समाधत्त अथवा पूर्वाधि करणे काम्यस्य सुकृतस्य क्षयउक्त: काम्यवक्षि त्वस्यापि विद्याक्षय सम्भवात् नविद्याया इतुत्व मित्याक्षिप्य समा धत्ते ॥ १५ ॥

## अग्नि होत्रादि तुतत्कार्यायेवत द्दर्श—नात् ॥ १६ ॥

तुशब्दो नित्यस्याग्नि होत्रादि: कर्मण: क्षयव्यवर्तयति नित्यमग्नि होत्रादितत्तस्या विद्याया: कार्यायैव परंपराया हुतस्तदर्शनात् तस्याग्निहोत्रादे र्विद्याकार्यत्वस्य तमेतमित्यादि दर्शनात् किंविषयं पुनरिदमश्ले ष विनाशवचनं किंविषयं सादौविनि योगवचन् एकेषांशाखानां तस्यपुत्रादायमुपयन्तीत्यादि चतउत्तरं पठति ॥ १६ ॥

## अतोन्यापिह्येकेषामुभयो: ॥ १७ ॥

अतोग्निहोत्रादे नित्यात्कर्मणो न्यापिह्यस्तिसाधुकृत्याया फलमभिसंधाय क्रियतेतस्या विनियोग एषमुक्त एकेषांशाखिनां सुहृद: साधुकृत्यामितिसस्या एवेदंसंश्ले ष विनाशनिरूपण मितरस्याप्येव मित्यादिना तथैवजाती-

यस्य काम्यस्यकर्मणो विद्यांप्रत्यनुप कारकत्वे संप्रति उभयोरपि जैमिनि बादरायणयो राचार्य्ययो: पूर्वाधिकरणे विद्यांगत्वे नकर्मानुष्ठेय मित्युक्तंतद्दृढं- गाय यद्यपि पासनेषु नित्यकर्मानुष्ठानं तत्साधित मेवेति दृष्टान्ते नाक्षिप्य समाधत्ते ॥ १७ ॥

## यदेवविद्ययेतिहि ॥ १८ ॥

विद्ययासंहितं तद्रहितंचकर्म विद्यांगंहि यस्मात् यदेवविद्ययेति वाक्या- न्तरात् कर्मणो विद्यायोगेऽति शयमाहननुकर्मणो ऽफलत्वे वचनमिदं सार्थकं पूर्वाधिकरणे ऽङ्गावबद्धोपासना सहितस्य कर्मण: फलाधिक्यं तस्यकेवलस्य ब्रह्माविद्यासाधनत्वं सामर्थ्यादित्युक्तम् एवमत्रापि सामर्थ्यादा रब्धकार्य्ययो रपिप्रकारांतरेण क्षयाभावात् ब्रह्मज्ञाना देवोभयो रपिक्षय इति दृष्टान्ते नाक्षिप्य समाधत्ते ॥ १८ ॥

## भोगेनत्वितरेक्षपयित्वासंपद्यते ॥ १९ ॥

भोगेन भोगेनैव इतरे सुकृतदुष्कृते आरब्धकार्ये क्षपयित्वानन्तरं सम्प- द्यते ब्रह्मतस्यतावदे विरमित्यादि श्रुति: ॥ १९ ॥

## इति श्री सूत्र प्रदीपिकायां चतुर्था ऽध्या यस्य प्रथम: पाद: ॥

प्रथमपादे सगुणनिर्गुण विद्याविदो ऽनारब्धकार्य्ययो: आरब्धकार्य्ययो र्यावदवस्थानं तावन्नमुक्ति: तत्क्षयेच देहकैवल्य मितिस्थितं द्वितीयेतयोर्न सगुणविद: करणानां लयेनाविदद्गुत्क्रान्तौ कश्चन विशेष इत्युच्यते ततत्तत्तमे- षक्रम मात्रित्यथा चोत्क्रान्तं लयमाह ॥

## वाङ्मनसिदर्शनाच्छब्दाच्च ॥ १ ॥

अस्यसौम्य पुरुषस्य प्रयतोवाङ्मनसी सम्पद्यतेमन: प्राणेप्राणस्तेजसिते- ज: परस्यांदेवताया मित्यत्रापि वृत्तिर्मनसि संपद्यते कस्मात् दर्शनात् मरणा-

देवयाय: प्रथमोपसंहारस्य वृत्तिवृत्तिमतोर भेदेन वाङ्मनसि शब्दा भकारो ऽप्रकृतत्वमाह ॥ १ ॥

## अतएवचसर्वाण्यनु ॥ २ ॥

इंन्द्रियैर्मनसि संपद्यमाने रित्यत्र सर्वाण्योन्द्रियाणि वृत्तिभिर्मनो नुवर्तन्ते श्रुतएव दर्शनात् शब्दाच्चे ति चकारोऽत्रापि पूर्ववत् पूर्वाधिकरणे मनसोवाच: कारणत्वाभावात् तत्रतस्य : सर्वात्मना नत्व यद्वत्युक्तं अत्रतुमनस: परंपराया विकारत्वाद भूतेप्राणेलय: स्यादिति प्रत्युदा हरणे नाक्षिप्य समाधत्ते ॥ २ ॥

## तन्मन:प्राण उत्तरात् ॥ ३ ॥

उक्तंमनोवृत्या प्राणोविलीयते कुत: मन: प्राणइत्युत्तरात् वाक्यात् पूर्वाधिकरणे प्राणस्या वविकारत्वात् विकारे विकाराणां नसर्वात्मनालय इत्युक्त्वा ऽत्र तुन्याया भावात् प्राणस्ते जसीति श्रुतेस्ते जस्ये व तस्यलय इति प्रत्युदा हरणे नाक्षिप्य समाधत्ते ॥ ३ ॥

## सोध्यक्षेतदुपगमादिभ्य: ॥ ४ ॥

सप्राणस्तदध्यक्षे जीवेवृत्या प्रलीयते तस्मिन्नध्यक्षे प्रविलयश्चात्मान मन्तकाले सर्वेप्राणा अभिसमायंतीत्यादिना भ्युपगमाद विशेषेण आदिशब्देन तमुत्क्रामंत सर्वेप्राणा इत्यादि विशेषादपि कथंतर्हि प्राणस्ते जसीति श्रुतिरित्यत आह ॥ ४ ॥

## भूतेषुतच्छ्रुते: ॥ ५ ॥

सप्राणसंयुक्तो ध्यक्षस्ते ज: सहचरितेषु भूतेषुदेह बोजभूतेषु सूक्ष्मेषुव्यवतिष्टत इत्यवगंतव्यं प्राणस्ते जसीतिश्रुति: एकस्मिं स्ते जसिश्रुति: कथंतेज: सहचरितेषु भूतेषु इत्यत आह ॥ ५ ॥

## नैकस्मिन्दर्शयतोहि ॥ ६ ॥

नैकस्मिन्ते वतेजसि शरीरांतर प्राप्तिवेलायां जीवोवतिष्टते कुत:ह्वियस्मात् दर्शयत: श्रुतिस्मृती पृथिवोमय इत्याद्याश्रुति: स्मृतिरयं व्योममात्रा इत्यद्याप्रश्न

प्रतिवचनेचयाय: पुरुषं वैयस इति पूर्वाधिकरणे प्राणस्यात्मद्वारा तेजसिवृत्ति श्रयउक्त: सविदुषएवे त्याचिंत्य समाधत्ते ॥ ६ ॥

## समाना चासृत्युप क्रमाद मृतत्त्वं चानुपोष्य ॥ ७ ॥

समाना चोत्क्रांतिर्वाङ्मनसीत्याद्या विद्वदविदुषो रासृत्युपक्रमात् आउत्तरमर्गो पक्रमात् ननुविदुषो मृतत्वंप्राप्तस्य कुतो गमन मित्यत आह अमृतत्वंचानुपोष्या ऽदग्ध्वाविद्यादि क्लेशबीजानि इदम मृतत्वमपि पूर्वाधिकरणे ब्रह्मविदो विदुषय समानोत्क्रांति रुक्तासैवा नुपपन्नातेज: कार्यस्य ब्रह्मणिकारणे सर्वात्मना लयोपपत्ते रित्याचिंत्य समाधत्ते ॥ ७ ॥

## तदापीतेः संसारव्यपदेशात् ॥ ८ ॥

तत्तेज आदिभूतसूक्ष्मं श्रोत्रादिकरणा श्रयभूतं आपीतेरा संसारामोक्षा इत्यतिष्ठतेयोनि मन्येप्रपद्यन्तेइत्यादिना संसारव्यपदेशात् कुतस्तर्हिल्क्रमे तेजोगृह्यत इत्यत आह ॥ ८ ॥

## सूक्ष्मंप्रमाणतश्चतथोपलब्धे: ॥ ९ ॥

चकारस्त्वर्थं श्रोत्रसोदर्शनं व्यावर्तयति तत्तेज: सूक्ष्मंस्वरूपत: परिमाणतश्चतदाह प्रमाणातश्च कुत: नाडीनिष् क्रमणादिभ्यस्तथा सूक्ष्मस्योपलब्धे: ननुसूक्ष्म शरीरस्य स्थूलशरीरांतरस्थत्वात् तन्नाशेनाश इत्यत आह ॥ ९ ॥

## नोपमर्दनात: ॥ १० ॥

अतएव सूक्ष्मत्वात् स्थूलशरीरस्योपमर्देन सूक्ष्मशरीरं नोपमर्द्यते नन्वस्मिन् एवशरीरे जमय उपलभ्यमाना स्तोतिरिक्त तेज: कल्पनीय मित्यत आह ॥ १० ॥

## अस्यैवचोवपपत्तेरेषऊष्मा ॥ ११ ॥

अस्यैवस्थूल शरीरस्यैवोष्मा सूक्ष्मशरीरे सत्युपलब्धेर सत्युनुपलब्धेरित्युपपत्तेश्चकारः श्रुतिमप्याह सएवैष इत्यादिकां पूर्वाधिकरणे संसारव्यपदेशेन तैजसो ह्वत्तिलयउक्तः अथापि मरणव्यपदेशाद्द्युपादानोत्क्रान्ति प्रतिषेध इति सिद्धान्तोपक्रमेण सूत्रेणाक्षिपति ॥ ११ ॥

## प्रतिषेधादितिचेन्नशारीरात् ॥ १२ ॥

सूत्रावयवेन सिद्धान्तमाह नतस्यप्राणा उत्क्रामन्तो त्यस्मात्प्रतिषेधा द्विद्यावतोन गमनमितिचेत्तन्न कुतः शारीरात् जीवादयं गमन प्रतिषेधोन शरीरात् एवंशंकितै पुनाराशांतमाह ॥ १२ ॥

## स्पष्टोह्येकेषाम् ॥ १३ ॥

शरीरा दात्मनः प्राणानां गमनं कुतः द्वियस्मात् एकेषांशाखिनां शरीरप्रेक्ष्यस्पष्ट अपादानभावः श्रूयते सउत्क्रयतो त्यादिना देहस्यैवापा दानतयोप लंभात् ॥ १३ ॥

## स्मर्यतेच ॥ १४ ॥

स्मर्यतेपि महाभारते गत्युत्क्रांत्योरभावःसर्वभूतात्मेत्यादिनापूर्वाधि करणे सउत्क्रयतीत्यादिना देहस्यपञ्चतत्वा त्तदपादानो त्क्रान्ति प्रतिषेधःअतस्ताद दचापिगताः कलाः पंचदश प्रतिष्ठा इति वचनादिं द्रियाणां भूतेषुलय इत्याक्षिप्य समाधत्ते ॥ १४ ॥

## तानिपरेतथाह्याह ॥ १५ ॥

तानींद्रियाणि भूतानिच निर्गुण विद्यावतः परेपरमात्मनिप्रलीयन्ते कुतः द्वियस्मात् तथाहश्रुतिः पुरुषं प्राप्यास्तंगच्छन्तीति पूर्वाधिकरणे विदुषइन्द्रियाणां परस्मिन् प्रविलयउक्तः सत्यमनुपपत्तः इत्याशा प्युपपत्ते रित्याक्षिप्य समाधत्ते ॥ १५ ॥

## अविभागोवचनात् ॥ १६ ॥

इन्द्रियाणां भूतानांच ब्रह्मणिप्रविलये ब्रह्मणा ऽविभागविकांनिर्गुण

विद्यावतो ह्रुतिमतामेषां प्रविलय इत्यर्थः कुतः वचनात् भिद्यंतेचासां नामरूपे इत्यादिः व्यवस्थिताधिकरणमा स्त्युपक्रमा द्विदुषो ऽविदुषश्च समानागतिरुक्ता सा नुपपन्ना विदुषोप्य नियतनाडी गमना दित्याक्षिप्य समाधत्ते अथवा पूर्वाधिकरणे निर्गुण विद्यावतो ऽविभागेन परस्मिन्निंद्रिय प्रलयइत्युक्तं तद्वत्सगुण विद्यावतोपि स्यादिति दृष्टान्ते नाक्षिप्य समाधत्ते ॥ १६ ॥

## तदोकोऽग्रज्वलनंतत्प्रकाशितद्वारोविद्या सामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्चहार्दानुगृहीतःशताधिकया ॥ १७ ॥

तस्यविज्ञानात्मन ओकआयतनं हृदयं तस्यहृदयस्याग्रस्यज्वलनेन प्रकाशितानि द्वाराणियस्य सोयंतत्प्रकाशितद्वारः सर्वोपिजन्तुश्चक्षुरादिभ्यः स्थानेभ्यः उत्क्रामति विद्वांस्तुहार्देन ब्रह्मणानुगृहीतःशताधिकया मूर्धन्ययानाड्या कुतः विद्यासामर्थ्या दुपासनासामर्थ्या त्तत्सामर्थ्यादप्यनयैव गच्छन्तीतिको नियम इत्यत आह तच्छेषगत्यनु स्मृतियोगाचतस्या विद्यायाः शेषभूता मूर्धन्यनाडी गतिरुत्तरमार्ग इतियावत् तस्याअनुस्मृति रनुस्मरणं तस्ययोगस्तस्मादपि चकारः सामर्थ्य मनाक्षिप्याह पूर्वाधिकरण मूर्धन्यनाड्या सगुणविद्या विदुत्क्रामतीत्युक्तं तद्दिवसे मृतस्यैव नरात्रौतत्र रश्मीनामभावा दित्याक्षिप्य समाधत्ते ॥ १७ ॥

## रश्म्यनुसारी ॥ १८ ॥

अथैतैरेव रश्मिभिरूर्द्ध्वमा क्रमते एषदिवसे रात्रौ चरश्म्यनु सारीयाति ॥ १८ ॥

## निशिनेतिचेन्नसंबंधस्ययावद्देहभावित्वा-दर्शयतिच ॥ १९ ॥

निशिरात्रौ रश्म्यनुसारीन यातीतिचेत्तन्न रश्मिसंबंधस्य यावद्देहभावि-

त्वात् अमुष्मा दित्यादिना दर्शयति चकारोदिनाद्यनि शास्तुरश्मीनां सशीप-संभमाह पूर्वाधिकरणे रात्रौमृतस्यापि रात्रौरश्मीनां सद्भावेनोत्तर मार्गगमन मुक्तं तद्दक्षिणायने मृतस्या नुपपन्नं इत्याशंक्य समाधत्ते ॥ १९ ॥

## अतश्चायनेपिदक्षिणे ॥ २० ॥

अतश्चातएव तस्यानियत कालत्वात् अयने दक्षिणेपि विद्वान विद्याफल माप्नोत्येव यत्रकाल,इत्यादिना दक्षिणायने मृतानां पुनरावृत्ति:स्मर्यंत इत्यत आह ॥ २० ॥

## योगिन:प्रतिचस्मर्यतेस्मार्तेचैते ॥ २१ ॥

योगिन: स्मार्तयोग विदस्तान् प्रतिस्मर्यते कालविनियोग: स्मार्तेचैते योग सांख्ये भाष्यकारो ब्रह्मविद: प्रत्यस्मरणमाह द्वितीयस्त्वयोर श्रौतत्व माह प्रातिवाह्नि कारक्तो कारेण तत्वाचिन्तेयम् ॥ २१ ॥

## इति श्री सूत्रदीपिकायां चतुर्थाऽध्यय स्य द्वितीय: पाद: ॥

पूर्वपादे उत्क्रान्ति र्निरूपिता इदानी मुत्क्रान्तस्य विदुषो र्चिरादिका गतिर्निरूप्यते ॥

## अर्चिरादिनातत्प्रथिते: ॥ १ ॥

सर्वोब्रह्मप्रेप्सु रर्चिरादिनैव मार्गेणरंहति कुत: तत्प्रथितेस्तु स्यमार्गस्य विदुषां प्रथिति: प्रसिद्धे: येचेमेऽरण्ये इत्यादिना पूर्वाधिकरणे विदुषोर्चिरादि मार्गेणगमनमुक्तं समार्गोन नियत: वायोरितस्मिन्न श्रवणा दित्याशंक्य समाधत्ते ॥ १ ॥

## वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

वायुमब्दात्सवत्सरा द्ध्वमोर्क प्राप्ये तिशेष: कुत: अविशेषविशेषाभ्यांस-वायुसंचक मित्यविशेष: सवायुमागच्छती त्युत्क्रमनंतरंतद सोनमार्गेण सचा-

गच्छतीति विशेषमाहताभ्यां पूर्वाधिकरणे वायोरब्दार्मतर्यमुक्तं तथापि लोकादीनामर्चिरादि सन्निवेशानुपपत्तिः तदवस्था नियामकाभावादिति प्रत्युदाहरणे नाचिप्य समाधत्ते ॥ २ ॥

## तड़ितोऽधिवरुणः संवन्धात् ॥ ३ ॥

तड़ितो विद्युल्लोकादधि अनन्तरं वरुणालोकः वरुणस्य विद्युता सम्बन्धादिन्द्रप्रजापति लोकयोर्वरुणादधि आगंतुकानामन्ते निवेशइति न्यायेन सन्निवेशः पूर्वाधिकरणेचिंरादिमार्गे वरुणादीनां तडितोधि सम्बन्धउक्तः सूचितमार्गो वस्थितस्तथापि तस्मिन्मार्गे चिंरादिभोग भूमिषुगंतुं विद्वानेकाकी प्रभुस्तातीन नियतो मार्गीय मित्याचिप्य समाधत्ते ॥ ३ ॥

## आतिवाहिकास्तल्लिङ्गात् ॥ ४ ॥

अतिवहंतीत्यातिवाहिकाचेतना देवाअर्चिरादयः कुतस्तल्लिंगात् तेषांचेतनानां तत्पुरुषोमानव इतिपको करणेन लिंगात् नन्वचैवायं पुमान्नेतारस्त्वित्यत आह ॥ ४ ॥

## उभयव्यामोहात्तत्सिद्धेः ॥ ५ ॥

उभयस्यनेतृणां सपिण्डित करणत्वेन स्थानानां स्वयमेव व्यामोहोऽचेतनत्वं तस्मान्नेतृणां चेतनानांसिद्धिः तस्मात्तावैवनेता इतिभेषः वरुणादि लोकेतेषां नेतृणाम भावात् पूर्वमपि चेतना नस्यु रित्यत आह ॥ ५ ॥

## वैद्युतेनैवततश्रुतेः ॥ ६ ॥

वैद्युतेनैवा मानवेनैव ततस्मात् विद्युल्लोका दूर्ध्वंनीयते कुतः तच्छ्रुतेः तस्यामानवस्य पुरुषस्य गेहत्वस्यतान् वैद्युतादित्यादिश्रुतेः पूर्वाधिकरणे आतिवाहिकैः सगुणविद्या विदोनीयन्त इत्युक्तं तदनुपपन्नं एतस्य प्राप्यस्य ब्रह्मणः परत्वेन निर्गुणविद्या विदप्यत्रैव गच्छतीत्याचिप्य समाधत्ते ॥ ६ ॥

## कार्यंवादरिरस्यगत्युपपत्तेः ॥ ७ ॥

यदर्चिरादीनां गच्छन्तीति ब्रह्मतत्कार्यं वादरिराचार्यो मन्यते कुतःअस्य-

कार्यस्य गतेरर्चिरादि गमनस्य तत्रोपपत्तिःसम्भवोग त्युपपत्तिःतस्याः ननुनायं तर्कगम्योर्थ इत्यत आह ॥ ७ ॥

## विशेषितत्वाच्च ॥ ८ ॥

ब्रह्मलोकानि त्यादिना चकारस्तर्कस्य श्रुतिमूलस्य कर्तव्यतामाह ननु-कार्यस्यापि ब्रह्मशब्दो नोपपद्यते इत्यत आह ॥ ८ ॥

## सामीप्यात्तुतद्व्यपदेशः ॥ ९ ॥

तुशब्दः तत्रब्रह्मशब्दानुपपत्तिं वारयति कातर्ह्युपपत्तिरित्यत आह सामीप्यात् कार्यस्य ब्रह्मणः परेण ब्रह्मणा अतस्तस्य ब्रह्मशब्दस्य व्यपदेशात् ननुकार्यं प्राप्तावनावृत्तिर्नोपपद्यत इत्यत आह ॥ ९ ॥

## कार्यात्ययेतदध्यक्षेणसहातः परमभिधानात् ॥ १० ॥

कार्यस्य ब्रह्मलोकस्यात्यये विनाशितस्य ब्रह्मलोकस्या ध्यक्षेण परमेष्ठिना सहातः परमेष्ठिनः परंब्रह्म भवति कुतः अनावृत्त्या ह्यभिधानात् नत्विदंवि-श्वास्य मेवेत्यत आह ॥ १० ॥

## स्मृतेश्च ॥ ११ ॥

ब्रह्मणा सहित्याद्यायाः चशब्दाच्छ्रुते रपिते ब्रह्मलोक इत्याद्यायाः पूर्व-पक्ष माह ॥ ११ ॥

## परंजैमिनिर्मुख्यत्वात् ॥ १२ ॥

ब्रह्मशब्दस्य परब्रह्मणि मुख्यत्वात्यद्गम्यमर्चिरादिना तत्परमेवेति जैमि-निराचार्य आह नन्वनुपपत्ते मुख्यार्थं परित्याग इत्यत आह ॥ १२ ॥

## दर्शनाच्च ॥ १३ ॥

तयोर्ध्वमायन्नमृतत्वमेतीत्यमृतत्वप्राप्तेः चकारोमुख्यार्था नुपपत्तेर भाव-माह प्रजापतेःसभावेश्मे त्यादिना स्पष्टं कार्यं ब्रह्मावगम्यते इत्यत आह॥१३॥

## नचकार्येप्रतिपत्त्यभिसंधिः ॥ १४ ॥

विश्वप्रपद्य इति प्रतिपत्ते रभिसंधिःकार्येब्रह्मणि नचनैवनाम रूपनिर्वा हकस्यब्रह्मणः प्रकृतत्वात् पूर्वाधिकरणे ऽर्चिरादि प्राप्यस्यब्रह्मणः कार्यत्वमुक्तं एवंचेत्प्रतीकोपासको रपितद्गम्य मित्याशंक्य समाधत्ते ॥ १४ ॥

## अप्रतीकाव लंवनान्नयतीति वादरायणः उभयथाऽदोषात्तत्क्रतुश्च ॥ १५ ॥

प्रतीकावलंवनाये नभवंतिते ऽप्रतिकावलंवनाः तानप्रतीकव्यातिरिक्तान ऽमानवपुरुषो नयतीति वादरायण आचार्योमन्यते नच नयनेन्याय विरोध इत्यत आह उभयथा ऽदोषात् उभयथा प्रतीकालंवनानाम नयनेन्येषां नय नेन्यायस्य प्रतीकावलंवन व्यतिरिक्त विषयत्वे ना दोषात् अत्रकोहेतु रित्यत- आह तत्क्रतुश्चतस्यब्रह्मणः क्रतुः संकल्पःतत्क्रतुर्ब्रह्म प्राप्तोहितुः चशब्दस्तद्धा-. प्राप्तोन नुप्रतीको पासनानां फलाभावात् ब्रह्मलोक एवफलं कथम मित्यत आह ॥ १५ ॥

## विशेषंचदर्शयति ॥ १६ ॥

यावन्नाम्नो गतमित्यादिना प्रतीकोपासनेषु फलस्य चकारोऽश्रुतफलेषु ब्रह्मलोक. फलंकल्पमिति कल्पनाभाव माह ॥ १६ ॥

## इति सूत्रदीपिकायां चतुर्थाऽध्यायस्य- तृतीयः पाद ॥

पूर्वपादे सगुणविद्याविदोर्चिरादिगतिः कार्यब्रह्मप्राप्तिश्च फलमुक्तमिदानीं निर्गुणविद्याविदः तत्संपत्ति रुच्यते ॥

## संपद्याविर्भावःस्वेनशब्दात् ॥ १ ॥

परंज्योति रुपसंपद्य स्वे नकेवले नैवात्मना विर्भवति कुतः स्वे नरूपेणा भिनिष्पद्यत इति स्वशब्दात्कः पुनर्विशेषः पूर्वोतरयोः स्वरूपयो रित्यत आह ॥ १ ॥

## मुक्तःप्रतिज्ञानात् ॥ २ ॥

योऽत्राभिनिष्पद्यत इत्युक्तःससर्वसम्बन्ध विनिर्मुक्तः कुतः यआत्मे त्यादिना तादृशस्यैव प्रतिज्ञानात् परंज्योति रुपसंपद्यतेति ज्योतिषि सम्पत्तेः कथमात्म रूपेणाविर्भाव इत्यत आह ॥ २ ॥

## आत्माप्रकरणात् ॥ ३ ॥

ज्योतिः शब्देनात्मा भिधीयते कुतः प्रकरणात् यआत्मेत्यादेः पूर्वाधि करणे स्वेनसता संपत्तिरुक्तास्य सुषुप्तिवत्त्वा दित्या चिप्य समाधत्ते ॥ ३ ॥

## अविभागेनदृष्टत्वात् ॥ ४ ॥

परंज्योतिरुप संपद्यस्वेन रूपेणाभि निष्पद्यतेयः सत्वविभागेन कुतः तत्त्वमसीत्यादे दृष्टत्वात् पूर्वाधिकरणे अविभागेन ब्रह्मसंपत्ति रुक्तातद्ब्रह्म स्वभावेन सविशेष मित्याचिपति ॥ ४ ॥

## ब्राह्मेणजैमिनिरुपन्यासादिभ्यः ॥ ५ ॥

ब्राह्मेण स्वे नरूपेणापहतपाप्मत्वादिनासर्वज्ञत्वादिनाच निष्पद्यते इति- जैमिनि राचार्यो मन्यते कुतः उपन्यासादिभ्यः उपन्यासोय आत्मेत्यादि शब्दे- नस तत्पर्ये तीत्यैश्वर्यादिभ्यः ॥ ५ ॥

## चितितन्मात्रेणतदात्मकत्त्वा दित्यौडुलोमिः ॥ ६ ॥

चिन्मात्रेण चैतन्य मेवात्मनो रूपमतस्त न्मात्रे णैवाभि निष्पद्यते तदे वकुत इत्यत आह एवं वा अर इत्यादिना तदात्मकत्वात् चैतन्यमात्रात्म कत्त्वात् आत्मनोवस्तुतः सत्यसङ्कल्पत्वादीना मुपाधि धर्मत्वादित्यौ डुलोमि राचार्यो मन्यते ॥ ६ ॥

## एवमप्युपन्यासात्पूर्वभावादविरोधं वादरायणः ॥ ७ ॥

एवमपि पारमार्थिक चेतन्यरूपेण स्वरूपाभ्युपगमेपि पूर्वस्याप्युपन्यासा दिभ्योवगतस्य ब्राह्मस्य ऐश्वर्यरूपस्य भावादगाख्याना दप्यविरोधं वादरायण आचार्यो मन्यते वादरायण मतंसिद्धांत: पूर्वाभिकरणे ब्रह्मणि विशेषा सम्भवाञ्च विशेष प्रकृतावपि सविशेषत्व श्रुति रौपाधिक विशेषे व्यवस्थापिता नैवंयोगोसङ्कल्पातिरिक्तसाधन वानिति प्रत्युदाहरणे नाक्षिप्य समाधत्ते ॥७॥

## संकल्पादेवतच्छ्रुतेः ॥ ८ ॥

पित्रादयः सङ्कल्पादेव समुत्तिष्ठन्ति नतुनिमित्तांतरात् कुतः तस्यसङ्कल्पा देवअस्यपितरः समुतिष्ठन्तीति तादृशस्य समुत्थानस्य श्रुतेः ॥ ८ ॥

अतएव सत्यसङ्कल्पत्वा देवानन्याधिपतिश्च अस्यनान्योधि पति रपि पूर्वा

## अतएवचानन्याधिपति ॥ ९ ॥

धिकरणे संकल्पातिरिक्तसाधनानां सगुणविद्या विदोयोगिनो साधनत्वमत तच्छ्रुते:नैवमत्र श्रुतिरस्ति अतोपिमनोतिरिक्तानां साधनानाम सत्वमेवेति प्रत्युदा हरणे नाक्षिप्य पक्षांतर माह ॥ ९ ॥

## ततभावंवादरिराह्येवं ॥ १० ॥

मनोतिरिक्तानां शरीरेन्द्रियादीनामभावं वादरि राचार्योमन्यते कुतः श्रियस्मात् एवमाह श्रुतिः सैवैतानी त्यादिना ॥ १० ॥

## भावंजैमिनिर्विकल्पामननात् ॥ ११ ॥

जैमिनिराचार्यो मनोवच्छरी रस्यापिमेन्द्रियस्यभावं मुक्तंप्रति मन्यते कुतः सएकधाभवती त्यादिना विकल्पस्या मननात् ॥ ११ ॥

## द्वादशाहवदुभयविधम्वादरायणोत:१२

वादरायणो मुनिराचार्योत एवलिंगदर्शना दुभयविधं मन्यन्ते भावम भावंद्वादशाहवत् यथा द्वादशाहः सत्रमहोनश्च तद्वत् अतः सिद्धांतः ननुशरीराभावे सुषुप्तिवन्न विषयोपलंभ इत्यत आह ॥ १२ ॥

## तन्वभवेसंध्यवदुपपत्ते ॥ १३ ॥

शरीराभावे सम्ध्ये यथो पलब्धिमात्रा: पित्रादिकामा भवन्ति एवंमोक्षे-पिस्तु: तथासत्वुपपत्ते: ॥ १३ ॥

## भावे जाग्रद्वत् ॥ १४ ॥

पूर्वाधि करणे सएकधा भवति त्रिधाभवतीति वाक्योदा हरणेना नेक-शरीर ग्रहणमुक्तं तत्क मेण नयुगप दित्याचिप्य समाधत्ते ॥ १४ ॥

## प्रदीपवदावेशस्तथाहिदर्शयति ॥ १५ ॥

शरीरांतराणां स्वीकारे शरीरांतरात् शरीरांतरेष्वावेश: प्रदीपवत् यथैकस्य प्रदीपस्य प्रदीपसहस्रेषु आवेश:तद्वत्कुतएतत् हियस्मात् तथादर्शयति श्रुति: सएकधा भवतीत्यादिना मुक्त स्यानेक शरीर वासिनोपि पश्चातत्वेन कम्मप्ये-दिति निषेधादित्यत आह ॥ १५ ॥

## स्वाप्ययसंपत्त्यरन्यतरापेक्षमाविष्कृतम्हि ॥ १६ ॥

स्वाप्यय: सुषुप्ति: संपत्तिस्तयो रन्यतरापेक्षे यत्रत्वस्ये त्यादि प्रतिषेध वच-नेकृत: हियस्मातसुषुप्तोमुक्तो वाद्रदमाविष कृतमुदाहृतं पूर्वाधि करणे शरी-रेन्द्रियाणां कर्तृत्वमुक्तं योगिन: तद्वज्जगत् व्यापारकर्तृत्व मपीति इष्टान्ते नाक्षिप्य समाधत्ते ॥ १६ ॥

## जगद्व्यापारवर्जं प्रकरणाद सन्निहि तत्वाच्च ॥ १७ ॥

योगिनां भौतिक कैश्वैर्यस्वातंत्र्येन भूतेष्वित्याह जगद्व्यापार वर्जकृत: प्रकरणात् सर्वभूतस्रष्टवाक्येषु परमात्मन: प्रकृतत्वात् नचतेपि परमात्मवत्प्रकृ-तादृत्वाच्च असन्निहितत्वाद्योगिनां चकारो महाभूत स्रष्टौयोगिनाम शक्यत्व मप्याह ॥ १७ ॥

## प्रत्यक्षोपदेशादितिचेन्नाधिकारिकमण्ड-स्थोक्तेः ॥ १८ ॥

प्रत्यक्षोपदेशात् अप्नोतिस्वाराज्य मित्यादिर्योगिनां जगद्व्यापा रस्यातन्त्र्यामिति चेन्न कुत: अधिकारकोयं आदित्य मण्डलस्थस्यास्योक्त: ननूपाधि व्यतिरिक्तस्य ब्रह्मणो सत्वे कुतोयं विभाग इत्यत आह ॥ १८ ॥

## विकारावर्तिचतथाहिस्थितिमाह ॥ १९ ॥

विकारावर्त्यपि नित्यमुक्तं परमेश्वरं नकेवलं विकारमात्र गोचरंसाविन्न मण्डला द्यधिष्ठानं तथाहि यस्मात् स्थितिमाह आम्नाय: एतावानस्य महिमेत्यादिना नन्वस्यपादत्रय मुपलभ्यते नत्वन्यत्किंचि दित्यत आह ॥ १९ ॥

## दर्शयतश्चैवंप्रत्यक्षानुमाने ॥ २० ॥

एवंविकारा वर्तिरूपं श्रुतिस्मृती दर्शयत: श्रुतिर्नतत्र सूर्यइत्याद्या स्मृतिर्न जायते इत्याद्याचकारो सूत्रे रपि सत्त्वमाह ननु परमेश्वरस्य जगत्कर्तृत्वमुक्तं तत्समानशीलाश्च योगिन इत्यतआह ॥ २० ॥

## भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

अनादिसिद्धेन परमेश्वरेण भोगमात्रं समानं योगिनां यथैतां देवलिंगं योगिनां जगद्व्यापाराभावे चकारादने केश्वरादिदोषश्च नन्वेवंसतिसाति शयत्वात अंतवत्त्वमैश्वर्यस्य स्यात्ततश्चमावृत्ति रितिचेत् ॥ २१ ॥

## अनावृत्ति:शब्दात्अनावृति:शब्दात् २२॥

ब्रह्मलोकप्राप्तानां तेषांन पुनरावृत्ति: कुत: नसपुनरावर्तत इत्यादि: शब्दात् सूत्राभ्यास: शास्त्रसमाप्तिंद्योतयति ॥ २२ ॥

इति श्री मत्परमहंस परिव्राजका चार्यानन्दात्म पूज्यपाद शिष्यस्य परमहंस परिव्राजका चार्य श्री मच्छंकरानन्द भगवत: कृतौसूत्र दीपिकायां चतुर्था ऽध्यायस्य चतुर्थ: पाद: ॥ ४ ॥

2560